mInarAja shrIvRiddhayavanajAtaka pUrvakhaNDa

# मीनराज श्रीवृद्धयवनजातक पूर्वखण्ड

## Document Information

Text title : vriddhayavanajataka part 1

File name : vriddhayavanajataka1.itx

Category : jyotisha, sociology_astrology

Location : doc_z_misc_sociology_astrology

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai clradu at yahoo.com

Latest update : August 11, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# मीनराज श्रीवृद्धयवनजातक पूर्वखण्ड

पूर्वखण्ड

०१. राशिप्रभेदाध्यायः ५०
०२. ग्रहयोनिभेदाध्यायः ३२
०३. आधानाध्यायः ४०
०४. जन्माध्यायः २६
०५. आयुर्दयाध्यायः १५
०६. दशाध्यायः ४३
०७. अन्तर्दशाध्यायः ७०
०८. अष्टकवर्गफलाध्यायः १२९
०९. सूर्यदर्शनचारफलाध्यायः ७२
१०. चन्द्रदर्शचाराध्यायः ७२
११. भौमदर्शनचाराध्यायः ७२
१२. बुधदर्शनचारध्यायः ७२
१३. गुरुदर्शनचारध्यायः ७२
१४. शुक्रदर्शनचारध्यायः ७२
१५. शनैश्चरदर्शनचारध्यायः ७२
१६. ग्रहाणां भावाध्यायः ८४
१७. सूर्यचाराध्यायः ६८
१८. चन्द्रचाराध्यायः ६६
१९. भौम्चाराध्यायः ६८
२०. बुधचाराध्यायः ६८
२१. गुरुचाराध्यायः ६८
२२. शुक्रचाराध्यायः ६८
२३. शनैश्चरचाराध्यायः ६८
२४. तनुस्थानचिन्ताध्यायः ७८

२४अ. तनुस्थानचिन्ताध्यायः ३१
२५. धनस्थानचिन्ताध्यायः ३१
२६. सहजस्थानचिन्ताध्यायः ३०
२७. सुखस्थानचिन्ताध्यायः ३०
२८. सुतस्थानचिन्ताध्यायः ३०
२९. रिपुस्थानचिन्ताध्यायः २९
३०. कलत्रस्थानचिन्ताध्यायः २९
३१. मृत्युस्थानचिन्ताध्यायः २८
३२. धर्मस्थानचिन्ताध्यायः २८
३३. कर्मस्थानचिन्ताध्यायः २८
३४. लाभस्थानचिन्ताध्यायः २८
३५. व्यायस्थानचिन्ताध्यायः २८
३६. लग्नदर्शनचाराध्यायः ७
३७. अनफायोगाध्यायः ३१
३८. सुनफायोगाध्यायः ३१
३९. दुर्धारायोगाध्यायः १८१

उत्तरखण्ड

४०. लग्नाश्रयोगाध्यायः १४३
४१. धनाश्रयोगाध्यायः १२०
४२. सहजाश्रयोगाध्यायः १२०
४३. सुखाश्रयोगाध्यायः १२०
४४. सुताश्रयोगाध्यायः १२०
४५. शत्रुभवाश्रयोगाध्यायः १२०
४६. कामाश्रयोगाध्यायः १२०
४७. मृत्युस्थानाश्रयोगाध्यायः ७४
४८. धर्माश्रयोगाध्यायः १२०
४९. कर्माश्रयोगाध्यायः १२०
५०. लाभाश्रयोगाध्यायः १२०
५१. व्ययाश्रयोगाध्यायः १२०
५२. सङ्ख्याश्रयोगाध्यायः ६

५३. वज्रनादियोगाध्यायः ५
५४. तन्वादिद्वादशभावधीशफलाध्यायः १४४
५५. द्वादशभावथानचिन्ताध्यायः १४५
५६. रश्मिचिन्ताध्यायः ५६
५७. राजयोगाध्यायः ६६
५८. स्त्रीजातक लग्नफलाध्यायः १२
५९. स्त्रीजातक चन्द्रराशिगुणाध्यायः १२
६०. स्त्रीजातक नक्षत्रगुणाध्यायः २७
६१. स्त्रीजातक भावफलाध्यायः ८४
६२. स्त्रीजातक राजयोगाध्यायः १४
६३. नक्षत्रगुणाध्यायः २७
६३अ. लग्नदर्शनचाराध्यायः ९
६३।ब् लग्नचाराध्यायः २७
६४. मृत्युज्ञानाध्यायः ४५
६५. अनिष्टसूचनाध्यायः ३१
६६. शुभस्वप्नाध्यायः ४१
६७. मिश्रिकाध्यायः ३०
६८. काकरुताध्यायः २९
६९. श्यामाचेष्टाध्यायः ८
७०. श्वाचेष्टाध्यायः १५
७१. गोचेष्टाध्यायः ५

---

पूर्वखण्ड

आध्याय ०१

राशिप्रभेदाध्यायः ५०

सृष्टौ विधात्रे जगतां शिवाय
संहारकाले स्थितयेऽच्युनाय ।
तुभ्यं नमः सर्वगताय नीत्यं
त्रयीमयायामलभास्कराय ॥ १॥

यदुक्तवान् पूर्वमनीस्तु शास्त्रं
होरामय लक्ष्मीतं मयाय ।

तन्मीनराजो नीपुणं स्वबुद्धा
वीचीन्त्य चक्रेऽष्टसहनमात्रम् ॥ २॥

या पूर्वकर्मप्रभवस्य धात्री
धात्रा ललाटे लीखीता प्रशस्तीः ।
तां शास्त्रमेतत् प्रकटं विधत्ते
दिमो यथा वस्तुघनेऽन्धकारे ॥ ३॥

आद्यः स्मृतो मेषसमानमूर्तिः
कालस्य मूर्धा गतीतः पुराणैः ।
सोऽजाविकासंधरकन्दराद्री-
स्तेनाग्नीधात्वाकररत्नभूमीः ॥ ४॥

वृषाकृतिस्तू प्रथीतो द्वीतीयः
सावक्रकभूयतनं विधातुः ।
..........द्रसानुद्वयगाकु नानां
कृषीबलानां च वीदारभूमीः ॥ ५॥

वीणागदाभृन्मीथुनस्तृतीयः
प्रजापतेः स्कन्धभुतप्रदेशः ।
प्रनर्तकीगायनशिन्मिकस्त्रा
क्रीडारनिद्यूतविहारभूमिः ॥ ६॥

कर्की कुलीरकृतिरम्बुसंस्थो
वक्षःप्रदेशो ..........
केदारवापीपुनिनानी रत्न
देवाङ्गनानां न विहार .......... ॥ ७॥

सिंहसु शैले ह्रदयप्रदेशः
प्रजापतेः पंचममहुराद्याः ।
तस्यातंचीदगगुहाबनाद्रि-
ब्रह्मा वनिभूमिवनप्रदेशाः ॥ ८॥

प्रदीपकां गृद्ध करेणे कन्या
नौस्था लले षष्ठमीति ब्रुवन्ति ।
कान्तार्धधारा जठरे विधातुः
स शाद्वलस्त्रीरंतिशिल्पभूमीः ॥ ९॥

वीथ्यां तुलापण्यधरो मनुष्यः
स्थितः सनाभीकार्टिवस्तिदेशः ।
शुद्धार्धवीणापणपन्तनाय-
सर्वानी वासोन्नतसस्यभूमिः ॥ १०॥

श्वभ्रेऽष्टमे वृश्चिकविग्रहस्तु
प्रोक्तः प्रभोर्मेढ्रगुदप्रदेशः ।
गुहाविलश्वभ्रविणाश्मगुप्ति
वल्मीककीदाजगराहिभूमिः ॥ ११॥

धन्वी मनुष्यो हयपश्चिमार्ध-
समाहुरुरु भुवनप्रणेतुः ।
समस्थितव्यससमस्तवाजी-
कृतास्त्रौभृद्वज्नरथाश्वभूमिः ॥ १२॥

मृगार्धपूर्वो मकरोऽम्बुमध्ये
जानुप्रदेशं तमुशन्ति धातुः ।
नदीवनारण्यसरोजरूप-
श्वभ्राधिवासो दशमः प्रदिष्टः ॥ १३॥

स्कन्धे ..........उरित्कः पुरुषस्य कुम्भो
जंघोरुमेकादशमाहुराद्याः ।
..........ओदकाधारकुसस्यपक्षी-
स्त्रीशौणिक पूतनिवेशदेशाः ॥ १४॥

जते तु मीनदयमन्यराशिः
कालस्य पादौ कथितौ वरिश्चैः ।
स पुण्यदेवद्विज ..........आर्थभूमि-
..........वासः ॥ १५॥

..........स्यावरजङ्गमाख्य
सर्वं रविन्द्रान्मकमाहुराद्याः ।
तस्योद्वोऽत्राप..........श्च दृष्टो
..........तदात्मकं तत् ॥ १६॥

तस्यार्धमार्कं विदिनं मघादि

सार्पादि चान्द्रं विहितं परार्धम् ।
क्रमेण सूर्यः प्रददौ ग्रहाणां
व्यस्तेन नाराधिपतिस्तथैश्च ॥ १७॥

बुधस्य शुक्रस्य धरासुतस्य
बृहस्पतेर्भास्करनन्दनस्य ।
दे..........गृहे तेषु यथानुरूपं
फलं विधेयं निपुणं विदग्धैः ॥ १८॥

एषां पुमांसो विषमाः प्रदिष्टाः
समा युवत्यः फलदास्तथैव ।
क्रूरस्वभावाः शुभमूर्तयश्च
चरागमिश्राः क्रमशश्च सर्वे
ज्ञेयाः स्वभावेन शुभाशुभेष ॥ १९॥

मेषो हरिः प्राग् नवमश्च नाथा
याम्याधिपो गोप्रमदामृगाश्च ।
नृयुक्तुलाकुम्भधरापरास्याः
कर्कालिमीनास्त्वथ चोत्तरायाः ॥ २०॥

एवां नवांशाः प्रभवन्ति सूर्यात्
सूर्यांशकास्याश्च निजालयस्थात् ।
आद्येषुनन्दागृहपालकानां
द्रेष्काणसंश्याः क्रमशो विचिन्त्याः ॥ २१॥

होराद्वयं भानुनिशाकराभ्या-
मोजे समे व्यस्तमुशन्ति तज्ज्ञाः ।
कुजस्य बाणा हषवश्च सौरे-
नष्टौ गुरोः सप्त शशाङ्कजस्य ॥ २२॥

भृगोः शरा पुंभवने प्रदिष्टा-
स्त्रिंशांशकाः स्त्रीभवने विलोमम् ।
सप्तांशकाः सप्तमराशिपूर्वाः
षष्टीर्विभागा भवनस्य मेषात् ॥ २३॥

चूडापदं द्विस्वरसप्तलिप्त-
माद्यं पुराणा गृहलिप्तिकानाम् ।

नृराशिसंज्ञाः पुरतो वरिष्ठा-
श्चतुष्पदाश्चैव तु दक्षिणस्थाम् ॥ २४॥

तथापस्यां प्रभवन्ति कीटा
जलोद्भवाश्चैव तथोत्तरस्याम् ।
सौम्योद्भवाः प्राग्बलवृद्धिभाजो
भवन्ति याम्यास्त्वथ पश्चिमस्याम् ॥ २५॥

गृहा ग्रहाणां विषयेणू योग्याः
फलार्थिभिर्हानिकरास्तथान्ये ।
द्युरात्रिसन्धौ प्रबलाश्च कीटा
दिवा पुमांसः पशुवश्च रात्रौ ॥ २६॥

यः स्वामियुक्तस्त्वथवादि दृष्टः
सौम्यग्रहैर्वा स भवेद्वरिष्ठः ।
राशिं गतो व..........शुभमध्यभागं
क्रूरैर्वियुक्तो बहुसौम्यदृष्टः ॥ २७॥

तनुविलग्नं सुभगं वरिष्ठं
मूर्धानदोहं सुरणं निवासम् ।
मूर्तिः फलं श्रीफलमिष्टदं च
संज्ञानकं पूर्वगृहं वदन्ति ॥ २८॥

कोशो धनं दर्भकसिद्धिमेदं
प्रभूषिणं भासुरक्तं द्वितीयम् ॥ २९॥

तृतीयमुत्पातहरं ..........
वदन्ति व्रीजाङ्कुरकं तमीड्यम् ॥ ३०॥

सुखं सुगम्यं ह्यथ बन्धुलीने
गृहं सुहृत्तुर्यवीनमारेम ।
मित्रं प्रशान्तं गुरुणा विशालं
नृणां कनीकं प्रचुरं कुतालम् ॥ ३१॥

सन्तानकं दात्रकरं सुतास्य
गृहीतसारं प्रवरं सुहोप्रम् ।
स्यात् पंचमं पूर्वकरं कृतालं

सारार्थवर्णेडकरं कृतीनाम् ॥ ३२॥

पुरावनिं सान्द्रकरं कृतीनां
षष्ठं प्रतीपं सुरिपुं च शक्तम् ।
संशोषिणं श्रीदमदं सुबालं
निराहतं वार्निकरं वृथाद्यम् ॥ ३३॥

स्यादपीनं कूर्दतरं वितानं
द्यूनं कलत्रं मदनं सुतारम् ।
द्यूनं ध्वनं सन्ततिदं सुकामं
..........आमित्रमात्रं रतिदं प्रसिदम् ॥ ३४॥

मृत्युं खनं छिद्रमय प्रकीर्णं
पैशानिकं दिष्ट्रिकमार्तिदं च ।
दशारिकं साङ्गारिकं नराणां
स्यात्तद्दकाख्यं कृकमादिकाख्यम् ॥ ३५॥

धर्मद्युतिं धीतिकरं विशा..........ं
तृणातिकं गोयरणं गुरुत्वम् ।
धृतिं विकांश प्रशमं वरिष्टं
सुधाविदङ्गं नवमं व्यनाकि ॥ ३६॥

नभस्तलं कर्म गरिष्ठमुक्तं
विभासीकं साधकमनिकं च ।
हितं विरात्रं दशमं किलीकं
कितारवं भारवमाहीमानम् ॥ ३७॥

आयत्तिगं लाभमितीह धारं
विना किल साधिकमद्भुतं च ।
सुतारमध्यं सुतमष्टिपादं
.......... रिष्फम् ॥ ३८॥

व्ययप्रद दातिकरं च दण्डं
विरालिनं सादानिकं सुबालम् ।
भानुं तथा द्वादशभं कुलालं
मलीभसं दारिहरं प्रवीणम् ॥ ३९॥

चतुष्टयास्थं कथिनं च केन्द्रं
सर्वैष्टदं कण्टकसंज्ञितं च ।
लग्नं चतुष्कं दशमं च कामं
सर्वाणी तुस्यानि फलेन कृत्वा ॥ ४० ॥

द्वितीयलाभाष्टमपंचमानीं
पणाफराख्यानि वदन्ति भानि ।
तृतीयधर्मारिव्ययालयानि
आपोक्लिमाख्यानु वदन्ति तज्ज्ञाः ॥ ४१ ॥

नभस्तलैकादशषद्वृकाणि
वृद्धिप्रदान्येव वदन्ति पुंसाम् ।
मृगाजचन्द्रर्क्षतुलाधराणां
वर्गोत्तमाख्याः प्रथमा नवांशाः ॥ ४२ ॥

गोकुम्भसिंहालिविसंचितानां
स्युः पंचमाश्चान्त्यभवाः परेषाम् ।
नृयुकुलीरो वृषभोऽजसंज्ञ-
श्चापो मृगो रात्रिबलाः षडेते ॥ ४३ ॥

पृष्टोदया द्वन्द्वविवर्जिताश्च
दिवाबलान्ये शिरसोद्गमन्ति ।
उच्छं रवेराद्यतमादशांश-
श्चन्द्रस्य सप्ताश्विसमो वृषाश्च ॥ ४४ ॥

मृगोद्गमो भूमिसुतस्य तज्ज्ञै-
स्तृयभागः परमः प्रदिष्टः ।
गजाश्विसंख्येन्दुसुतस्य षष्ठा-
ज्जीवस्य कर्कान्तिचिसंख्य एव ॥ ४५ ॥

स्यात् पंचमो भार्गवनन्दनस्य
मीनात् स्वराश्विस्तु शनेस्तुलस्य ।
विंशन्मितः पूर्णवलः प्रदिष्टः
अर्वागतीते नवमे तु पातः ॥ ४६ ॥

यः सप्तमस्तुङ्गगृहस्य राशिः
स नीचसंश्चः कविभिः प्रदिष्टः ।

तेनैव मानेन फलं विधत्ते
तुङ्गाद्विलोमं बहुदुःखकारि ॥ ४७॥

मूलत्रिकोणं दिनपस्य सिंहो
वृषः शशाङ्कस्य कुजस्य मेषः ।
कन्या तु चान्द्रेर्धिषणस्य चाप-
स्तु .......... भृगोः सूर्यसुतस्य कुम्भः ॥ ४८॥

मेषोऽरुण्.........श्वेततरो द्वितीयो
नीलभृतीयोऽरुणितश्चतुर्थः ।
आपाण्डुर पंचमुखः प्रदिष्टो
नारी विचित्रा सततं सरूपा ॥ ४९॥

तुलाधर कृष्णाररो अथ विभ्रुः
कीटः सुरक्तो नवमः प्रदिष्टः ।
मृगः सुमिश्रः कपितो घटाख्यो
द्युतीविहीनोऽनषसंज्ञितश्च ॥ ५०॥

इति श्रीवृद्धयवने राशिप्रभेदः प्रथमोऽध्यायः ॥

---

आध्याय ०२
ग्रहयोनिभेदाध्यायः
इनः पतङ्गे मिहिरोऽथ हिंसो
मित्रोऽर्यमाख्यो द्युमणिः खरांशुः ।
शूरः स्वगस्तीक्ष्णमयूखमाली
दिनाधिपो व्रध्नहतिं प्रदिष्टः ॥ १॥

शशी शशाङ्कः शशभृविशेशः
सामुद्रकः शीतकरो दरेज्यः ।
नक्षत्रनाथः कुमुदावबोधी
विधुहिमांशुः शशलांछनश्च ॥ २॥

वक्रः कुजो भूमिसुतस्तरीयो
राक्तङ्गभूमिर्लोहितगात्रकः स्यात् ।
क्षुधातुरः सीक्षिधरो महीजः
कीनांशकान्तः कविवल्लभश्च ॥ ३॥

सर्वश्ङ्गभोजी विषुधो बुधश्च
चान्द्रीः प्रणेता प्रियकृद्विरागी ।
स्याद्धौर्तिकः काशजजीयितज्ञो
विधानकारी प्रणतः सुतालः ॥ ४॥

जीवोऽङ्गिरा देवगुरुर्मतिज्ञो
वक्ता च वाचस्पतिप्रमेयः ।
पीताम्बरः पीतविधिः सुरेष्टः
संसिद्धिकर्मा पुरुहूतमन्त्री ॥ ५॥

शुक्रोऽस्फुजिदैत्यगुरुः सुधामा
काव्यो भृगुर्वीजनिधिः प्रणेता ।
महोशना संस्मृतिकञ् कृतज्ञः
कलावितानप्रबलः सुजात्यः ॥ ६॥

कोणः शनिर्भ्रुरिति प्रसिद्धः
कृष्णो यमो मन्द हतङ्कं काली ।
सौरिः सुतीव्रस्तृणकः करालः
प्रतीतकर्माध्ययनप्रदिष्टः ॥ ७॥

रक्तो रविः शीतकरः सितश्च
रक्तः कुजः सोमसुतस्तु पीतः ।
हरिद्रवर्णस्त्रिदशाधिपेज्यः
शुक्रः सितः सूर्यसुतोऽसितश्च ॥ ८॥

सहस्त्ररश्मिर्यवनेषु जातो
विभावरीशस्तु तथा कलिङ्गे ।
अवन्तिदेशोद्भव एव भौमः
कौशाम्बिकेयो हिमरश्मिपुत्रः ॥ ९॥

सिन्धौ प्रलायस्त्रिदएशेशमन्त्री
जनान्त्यभूर्भोजकटे भृगोश्च ।
सौराष्ट्रजस्तिक्ष्णकरस्य पुत्रो
राहुर्महावर्वरसंभवश्च ॥ १०॥

..........सुतोऽथ राःऊः

..........शशाङ्को विबुधः सुरेज्यः ।
प्रागाधिनाथाः क्रमशो विचिन्त्या
दिग्द्वारहेन्वर्थमलं विचिन्त्याः ॥ ११॥

पापो रविः सूर्यसुतश्च वक्रः
क्षीणाः शशी तत्सहितो बुधश्च ।
सौम्यो गुरुः सोमसुतः शशाङ्कः
शुक्रश्च सर्वे प्रभवन्ति तुङ्गे ॥ १२॥

शुक्रः शशाङ्कौ युवती प्रदिष्टौ
नपुंसकौ सूर्यसुतो बुधश्च ।
जीवार्कभौमाः पुरुषाः प्रदिष्टाः
षड्वर्गशुद्धाः पुरुषाः समग्राः ॥ १३॥

धृग्वेदानाथस्त्रिदशाधिपेज्यो
यजुर्विनेता भृगुनन्दनश्च ।
साम्नां तथा भूतनयः प्रसिद्धो
ह्यथिर्वदेतस्य शशाङ्कपुत्रः ॥ १४॥

शुक्रामरेज्यौ द्विजलोकनथौ
दिवाकरारौ पृथिवीपतीनाम् ।
वैश्याधिपः शीतकरश्च सौम्यः
शूद्राधिनाथो रविजः परेषाम् ॥ १५॥

स्वतुङ्गमित्रय गृहे नवांशे
सौम्येक्षितानां बलमेकमुक्तम् ।
स्त्रीसध्यगाभ्यं शशिभर्गवाभ्यां
पुंक्षेत्रगानां च तथा परेषाम् ॥ १६॥

काष्टाबलं स्यासुचिनिर्मलाभ्यां
सूर्यारयोर्याम्यदिशां तथैव ।
सूर्यात्मजस्यैव कलत्रगस्य
शुक्रय चन्द्रय तथोत्तरस्याम् ॥ १७॥

चेष्टाबलं भास्कररात्रिपाभ्यां
मृगादिगाभ्यां कुटिले परेषाम् ।
गर्वर्कशुक्रा दिवसे वरिष्ठाः

सदा बुधोऽन्ये प्रभवन्ति रात्रौ ॥ १८॥

स्ववर्षमासोदयवासरेषु
सौम्याः सितेऽन्ये च भवन्ति कृष्णे ।
सूर्यस्य शत्रू भृगुसूर्यपुत्रौ
सौम्यः समोऽन्ये सुहृदः प्रदिष्टाः ॥ १९॥

मित्रं दिनेशः शशलांछनस्य
समाः सजीवार्किसितज्ञभौमः ।
जीवार्कचन्द्राः सुहृदः कुजस्य
ज्ञोऽरिः समौ भार्गवसूर्यपुत्रौ ॥ २०॥

शुक्रद्युनाथौ शशीजस्य मित्रे
चन्द्रो रिपुर्जीवकुजार्किमध्याः ।
बृहस्पतेः शुक्रबुधौ पराख्यौ
समोऽर्कजोऽन्ये सुहृदः प्रदिष्टाः ॥ २१॥

सौम्यार्कजौ भार्गवनन्दनस्य
मित्रे समो देवगुरुः कुजश्च ।
अन्ये परे भास्करनन्दनस्य
मित्रे सितश्ज्ञौ रिपवस्तथान्ये ॥ २२॥

गुरुः समो जन्मविधौ विचिन्त्यो
दशायबन्धुव्ययवित्तशोकैः ।
मित्रं स्वमेषां प्रवदन्ति नित्यं
मित्रं सुमित्रं सममेव मित्रं
शत्रुः समः स्यात् क्रमशस्तु तज्ज्ञैः ॥ २३॥

दशे तृतीये नवपंचमे च
चतुर्थाछिद्रे मदने तथैव ।
पश्यत्ति पादात्तरपादवृद्धा
फलानि यच्छन्ति शुभाशुभानि ॥ २४॥

पित्ताधिको रक्तनखः सुरूपः
कन्याधिपस्ताभ्रनस्वः सुवक्रः ।
..........वरो भास्करवीर्ययोगात्
ता..........प्रतापी परहा सदैव ॥ २५॥

बुद्ध्याधिकः शास्त्रपरः कृतज्ञः
श्लेष्माधिको दीर्घतनुः प्रसन्नः ।
सुलोचनः सत्यरतः सुकान्ति-
श्चन्द्रस्य वीर्यान् मनुजः प्रदिष्टः ॥ २६॥

पापः कृतघ्नः पुरुषः कुशीलो
ह्रस्वः कुनेत्रः कुनखः प्रदिष्टः ।
कुप्यप्रियो दुर्विषहः प्रकामी
भौमस्य वीर्येण भवेदसत्त्वः ॥ २७॥

सुरूपदेहः सुभगः सुशीलः
प्रियंवदः शास्त्रपरः कृतज्ञः ।
गौरः सुधामा पृथुगात्रयष्टि-
र्ज्ञवीर्यतः सम्प्रवदन्ति मर्त्यः ॥ २८॥

सुचारूगात्रः प्रणतः प्रतापी
सुदीर्घगात्रः कफवान् सदैव ।
विद्याधिकः सत्यपरो मनस्वी
सुरेज्यवीर्यात् सततं नयज्ञः ॥ २९॥

धर्मी सुदीप्तिर्मनुजोऽतिदीर्घः
कफात्मकः प्राप्तयशः सदैव ।
नीरोगदेहः प्रियसाहसश्च
शुक्रस्य वीर्येण भवेत् सुदारः ॥ ३०॥

..........कृष्टदेहः प्रखलोऽतिह्रस्वो
हिंस्रः सदा द्रोहपरः प्रजानाम् ।
विद्याविहीनः सततं कुचैलो
वीर्याच्छनेः सम्प्रवदन्ति मर्त्यः ॥ ३१॥

सत्वाधिकाः सूर्यशशाङ्कजीवा-
..........ओधिकः सूर्यसुतः कुजश्च ।
..........ओधिकौ भार्गवसोमपुत्रौ
सर्वे मनुष्यप्रकृतिं नयन्ति ॥ ३२॥

इति श्रीवृद्धयवने ग्रहयोनिभेदाध्यायः ॥

आध्याय ०३

आधानाध्यायः

आधानपृच्छोद्भवसाम्यमुक्तं
फलं यतस्तस्य परीज्ञणार्थम् ।
योगान् विचित्रान् प्रवदान्यतोऽहं
चिह्नैर्यथा ग्रन्तुविनिश्चयः स्यात् ॥ १॥

लग्नं यदा पश्यति सूर्यसूनु-
र्नीचाश्रितः सौम्यदृशा विहीनम् ।
तदान्यजातः प्रवदान्ति मर्त्यं
सूर्यस्य वीर्येण दिवा प्रसङ्गात् ॥ २॥

भौमो यदा वैश्यसमुद्भवेन
सक्षीणचन्द्रो नृपसंभवेन ।
अस्तं गतो ज्ञो द्विजवर्णयोगात्
सर्वैरथ म्लेच्छसमुद्रभवेन ॥ ३॥

एषां मृतिर्दासजनादिनीचै-
र्द्वाभ्यां वधूभिर्विकृतिर्नरैश्च ।
चतुष्पदे मूर्तिषु ..........
आप्ये क्षितौ प्रान्तरके नृसंज्ञे ॥ ४॥

कीटे विलोमं प्रवदन्ति भावं
वाच्यं विलग्नाधिपतेः स्वभावात् ।
कलत्रतः सङ्गविधिः प्रदिष्टो
विकारवैकृत्यसमो ग्रहाश्च ॥ ५॥

यदा रविर्नेक्षति जन्मलग्नं
तदान्धकारे सुरतप्रयोगः ।
तस्मिन्नुदक्स्थे स्वनवांशभागे
दिवा प्रसङ्गः शनिना च रात्रौ ॥ ६॥

सर्वैरदृष्टे प्रवदेदरण्ये
स्य मध्ये जललग्नसंस्थे ।

कलत्रगः शीतमयूखमाली
यदा रविर्मूर्तिगतस्तदा स्यात् ॥ ७॥

सन्ध्या प्रयोगो व्ययगेऽथ भौमे
उर्ध्वं प्रशस्तं रविनन्दनेन ।
सीत्कारमिश्रं सुरपूजितेन
शश्वत् क्षतक्रान्तमुरुप्रचण्डम ॥ ८॥

शुक्रेण लीनं शशिना विदग्धं
स्यात् सोमजेनैव नितान्तदीर्घम् ।
आद्यस्य मासस्य भृगुर्विधाता
तस्मिन् भवेच्छोणितशुक्रसङ्गः ॥ ९॥

तद्रूपचेष्टाबलहानिदीप्त्या
गर्भस्य वाच्यं स्वफलं जनन्याः ।
द्वितीयमासाधिपतिः कुजश्च
तस्मिन् धनं तस्य भवेत् समन्तात् ॥ १०॥

जीवस्तृतीयस्य करांघ्रिवक्र-
ग्रीवादिकं तत्र भवेत् समग्रम् ।
सूर्यश्चतुर्थस्य पतिः प्रदिष्टः
अस्थीनि तत्र प्रभावन्ति पुंसाम् ॥ ११॥

मज्जा च मेदश्च सुमांसरक्तं
व्यक्तिं समायाति विभागतश्च ।
तस्मिन् स सौरिः किल पंचमस्य
तस्मिन् समन्तात् कृतिमाकृणोति ॥ १२॥

प्राप्नोति पुष्टिं विविधां च गर्भ-
व्यक्तिं समागच्छति कायजाताम् ।
षष्ठस्य चन्द्रो विभुतामुपैति
रोमाणि तत्र प्रभवन्ति गात्रे ॥ १३॥

नखाश्च जिह्वा गुदरन्ध्रभावे
गुप्तं स्वरं ब्रह्मभवे हि तत्र ।
..........चन्द्रसूनुः किल सप्त .......
तस्मिन् स्मृतिः स्यात् सततं नराणाम् ॥ १४॥

पंचेन्द्रियत्वं च विवेकिता च
कोऽहं कुतोऽत्राश्रयमभ्युपेतः ।
लग्नाधिनाथस्त्वथवाष्टमस्य
मासस्य तस्मिन् प्रचुरा बुभुक्षा ॥ १५॥

पक्षेन् मनुष्यस्य ततः सुतृप्तः
भुंक्ते जनित्र्या रसभावसङ्गात् ।
नक्षत्रनाथो नवमस्य नाथ-
स्तस्मिन् विरक्तिर्विविधा नराणाम् ॥ १६॥

गर्भाश्रयः दुःखमनन्तमेक्तं
कृतं स्मृतिः पूर्वशुभाशुभस्य ।
दिवाकरस्तन्मरतोऽधिनाथ-
स्तमिन् प्रदिष्टः प्रसवो नराणाम् ॥ १७॥

तस्मिन् यदि स्याद् व्ययगः शशाङ्कः
स्यादष्टमो भूतनयः प्रसूतिः ॥ १८॥

यो यस्य मासस्य भवेद्धि नाथः
संभोगमेनं तु य्दा प्रयाति ।
अर्वाग्विधत्ते स तदास्य जन्म
वीर्येण हीनो यदि वात्मजेन ॥ १९॥

योगो यदाभानगतः सुतारि-
द्विजीयदुश्चिक्यगतैः समस्तैः ।
भवेत् प्रसूतिर्दशमे परेण
तदा नराणां न च योषितानाम् ॥ २०॥

सूर्येण तासां प्रवदन्ति शोषं
योगं नृणां वाध्यमनेकरूपम् ।
क्लीवोदये क्लीवयुते नवांशे
क्लीवस्य जन्म प्रभवेन्नराणाम् ॥ २१॥

एवं पुमांसः प्रभवन्ति नार्यः
स्त्रीभावयोगाद्बहुधा विशेषः ॥ २२॥

नवांशनाथश्च यदा विलग्नं
पश्येत् सुहृत्केन्द्रगतः सुदीप्तः ।
तदात्मवर्गेण करोति जन्म
प्रधानभूतं मनसा नराणाम् ॥ २३॥

दुश्चिक्यजामित्रगताः प्रचण्डाः
सौम्या यदा कोशत्रिकोणसंस्थाः ।
पुंजन्मदास्तत्र भवन्ति दृष्टा-
श्चन्द्रेण जीवेन शशाङ्कजेन ॥ २४॥

मन्दारयोः सप्तमराशिसंस्थयो-
र्दा निषेको मरणं तदा पितुः ।
रवेः शशाङ्कात् त्वथ तज्जनन्या
एकान्तरोधः पुरुषस्य वाच्यः ॥ २५॥

यदा हिमांशुर्व्ययगो दिवाकर-
श्छिद्रं गतो भूतनयश्चतुर्थः ।
मृत्युस्तदा संभवते ह्युभाभ्यां
शत्रेण सौरेण तु बन्धनेन ॥ २६॥

मृत्युकरः शीतकरश्च रिष्फे
..........उस्वस्थितः सूर्यसुतः सभौमः ।
ज्ञ गर्भसंभूतिरिह प्रदिष्टा
योगैः ससौम्यैः प्रव्दन्ति कृच्छात् ॥ २७॥

मूर्तिस्थितस्तीक्ष्णकरः कुजो वा
सक्षीणमूर्तिविधुः रिष्फगो वा ।
वृचाफलः स्यात् सुरतोपचारो
नीचाश्रितैस्त्र्यादिभिरेव पुंसाम् ॥ २८॥

क्लीवस्य लग्ने बुधससौरयुक्ते
सुतस्थिते वा त्वथ रिष्फगे वा ।
क्लीवस्य जन्म प्रवदन्ति पुंसां
शुभेक्षिते तत्र यथा स्वरूपम् ॥ २९॥

यदा कुजः सप्तमराशिमाश्रितः
शनैश्चरो वा रविणा समाहितः ।

न मूर्तिगो देवगुरुः सितो वा
तदा न गर्भं प्रवदन्ति योषिताम् ॥ ३० ॥

नभस्तलस्थो यदि वासुरार्चित-
स्त्रिकोणगो देवगुरुः शशीतगुः ।
गर्भस्तदा संभवति प्रजा..........
नवांशको वा हिमरश्मिजस्य ॥ ३१ ॥

तृतीयजामित्रगतौ सितार्कौ
शनैश्चरो लाभगतो यदा स्यात् ।
पुमांस्तदा गर्भगतः प्रवाच्यो
जीवोऽथवा स्वोच्छगतस्त्रिकोणे ॥ ३२ ॥

पुंवर्गगे सूर्यसुते महीजे
दिवकरे लग्नमुपश्रिते वा ।
गर्भे पुमान् शीतकरेऽथवाम्बरे
स्वतुङ्गे शुक्रदृशा समन्विते ॥ ३३ ॥

कुम्भे विलग्ने मिथुनेऽथ कन्ये
..........के तत्सुतवर्गगे वा ।
.......... प्रवदन्ति गर्भं
तदा नराणां च नवांशके वा ॥ ३४ ॥

सौम्यान्विते तत्र यथा स्वरूपं
नरं स्त्रियं वा तनयैर्विहीनम् ।
पापान्विते चार्धमुशन्ति नार्या
अर्धं नरस्यैव भवेधि गर्भे ॥ ३५ ॥

स्त्रीलग्नगे रत्रिकरे च शुक्रे
समस्थिते सूर्यसुते सजीवे ।
स्त्रीगर्भमुक्तं धरणिसुतेन
स्ववर्गसंस्थे शशिना च दृष्टे ॥ ३६ ॥

हिमांशुः सुरपूजितोऽथवा
शुक्रेण दृष्टः समराशिसंस्थितः ।
तदाबलां गर्भगता नृणां च
शनैश्चरे वा रविभागमाश्रिते ॥ ३७ ॥

द्विदेहलग्ने हिमरश्मियुक्ते
स्वसंस्थे रविजे च लाभे ।
..........उ........देह्लग्नगतं ........
..........स्त्रिपत्वं प्रवदेदुभाभ्याम् ॥ ३८॥

शनैश्चरे मूर्तिगते शशाङ्के
षष्ठे बुधे सप्तमगे च शुक्रे ।
सूर्येऽष्टमे सौम्यविवर्जिते च
त्रयः पुमांसः प्रवदन्ति गर्भे ॥ ३९॥

एवं कुजे सम्प्रवदन्ति नार्यो
नपुंसकाख्यानि दिवाकरे च ॥ ४०॥

इति श्रीवृद्धयवने आधानाध्यायः ॥

---

आध्याय ०४

जन्माध्यायः

..........पश्यति देवमन्त्री
नीतो अथवा रात्रीकरः प्रपूर्णः ।
स्वोच्छाश्रितः केन्द्रगतः स्ववर्गे
सुशुद्धवीर्यस्य भवेत् प्रसूतिः ॥ १॥

लग्नाश्रिते शीतकरे बुधे वा
नीचाश्रीते वा गुरुणा तु दृष्टे ।
अन्येन जातं प्रवदन्ति मानवं
.......... ॥ २॥

शनैश्चरे लग्नगते च नीचगे
पापांशके पपयुते च दृष्टे ।
पापस्य लग्ने गुरुणा विमुक्ते
पापात् प्रसूतिं प्रवदन्ति चन्द्रे ॥ ३॥

स्वमीनसंस्थे रवीणा समन्विते
लग्ने चरे सूर्यसुतेन वक्रे ।
व्ययस्थिते वा धनगे च चन्द्रे

पितुः परोक्षस्य भवेत् प्रसूतिः ॥ ४॥

द्वारं वदेत् केन्द्रमुपगताश्च
तत्र ग्रहाभावत एव लग्नात् ।
दीपोऽर्कतो लग्नवशेन वर्तिः
स्नेहं शशाङ्कात् प्रवदेद्यथावत् ॥ ५॥

विलग्नभावोद्भवमूर्तिकाः स्यु-
र्नानाद्वदेद्वर्णविशेषमेषाम् ।
शस्या त्रीभागाद्गृहमुच्छनीचात्
तेषां वरङ्गगनि तथा परेषाम् ॥ ६॥

यदा शनिः पंचमधर्मगोऽथवा
भौमोऽथ बन्धुव्ययगः कचंचन ।
तदाङ्गभङ्गं प्रवदेत् समग्रं
कृष्टं बलोनं प्रवदन्ति किंचित् ॥ ७॥

हिमांशुमाली स्वनवांशकास्थितः
स्वोच्छेऽथ केन्द्रे सुरनाचपूजितः ।
तुल्यं तदा धातुविवृदगात्रं
शुक्रेण बध्नाटी समन्वितश्च ॥ ८॥

भौमेऽष्टमे सूर्यसुते विलग्ने
नभस्तलस्थे हिमराश्मिजे च ।
बने प्रसूतिं प्रवदन्ति योषितां
सूर्येण मार्गे मनुजैर्वीवर्जिते ॥ ९॥

शनैश्चरे मूर्तिगते हिमांशुजे
व्ययस्थिते नीचगते प्रभाकरे ।
विलोमजन्म प्रवदन्ति भूमिजे
सभर्गवे नालविवेस्टितस्य ॥ १०॥

चन्द्रेऽम्बरस्थे शशिजे च कामे
बृहस्पतौ मूर्तिगते स्तनान्तरे ।
गर्भस्य तल्लांछनमुक्तमाद्यै-
र्विपर्यये पृष्ठाविभागतश्च ॥ ११॥

जिवे विलग्ने भृगुजे व्ययस्थे
शशाङ्कजे लाभमुपाश्रिते च ।
बामाङ्गसंस्थस्तिलकः प्रवाच्यः
षड्वर्गशुद्धौ त्वथ दक्षिणस्थः ॥ १२॥

व्यये शशि लभगतः खरांशु-
स्त्रिकोणगः सूर्यसुतः सपापः ।
हीनाङ्गतां तत्र वदन्ति भूमिजे
गात्रान्धिकत्वं प्रवदन्ति भागतः ॥ १३॥

शनैश्चरे वीर्ययुते तु नै..........
सूर्येण नाम्नोद्भवमेव भूषणम् ।
चन्द्रेण माणिक्यभवं हिरण्यजं
सौम्येन शुक्रेण च रीतिसम्भवम् ॥ १४॥

जीवेन नानाविधमिष्टकामदे
भौमेन विन्द्याद्बहुवस्त्रसम्भवम् ॥ १५॥

गृहं शशाङ्केन सुदारसम्भवं
मनोशरूपं विविधान्वितं च ।
सुसूत्रमुक्तं मणिकूड्ंिटमान्वितं
षड्वर्गशुद्धेन च तुङ्गगेन ॥ १६॥

भौमेतु दग्धं स्वनवांशकस्थे
परांशकस्थे शिथिलस्वभावम् ।
कुवस्तुयुक्तं बहुपपद्दृष्टे
सौम्येक्षिते वा धनधान्ययुक्तम् ॥ १७॥

सूर्येण चित्रं बहुगैरिकाद्यैः
प्रभासमेतं बहुभूमिकं च ।
एकत्र रम्यं त्वपरत्र शिर्णं
पापेक्षिते वा तपनस्वभावम् ॥ १८॥

बुधेन रम्यं वा बहुवंशयुक्तं
पटावृनं् भूरिवनाढ्यमेव ।
शुचिप्रगल्भैः पुरुषैः समेतं
विचित्ररूपं प्रभया समेतम् ॥ १९॥

जीवेन नानाविधरत्नयुक्तं
सुभूरिशालं बहुमण्डलाढ्यम् ।
वितानचूलाध्वजसर्वदिक्ष
प्रमण्डितं धातुरसैर्वशलैः ॥ २०॥

स्वभावरस्यं सुविदग्धलोकं
मनोरमं स्फाटिककांचनाढ्यम् ।
तुङ्गं विशालं सुविभक्तमार्गं
विचित्रकाष्ठप्रभवं नितान्तम् ॥ २१॥

शीर्णी कुचेलैः मनुजैः समेतं
रक्तान्वितं स्त्रीरहितं सदैव ।
भवेद्गृहं कण्टकसंघयुक्तं
रौद्रं करालं विकृतप्रतापम् ॥ २२॥

शनैश्चरे केन्द्रगते स्वनीचगे
सुतस्थिते भूतनये सभास्करे ।
गृहं तृणैः सर्वत एव युक्तं
जीर्णं नितन्तं तपनस्वभावम् ॥ २३॥

शनैश्चरांशे हिमरश्मिपुत्रे
यदा तनुस्थः स्वगृहे शशाङ्कः ।
तदा गृहं नूतनविरुधावृतं
क्वचित् सुकाष्टैः परीतो विपश्चिताम् ॥ २४॥

जीवो यदा बन्धुगतः स्वभावगो
नभस्तलस्थो भृगुनन्दनस्तदा ।
चन्द्रोऽस्तगो मूर्तिगतः शनैश्चर-
स्तदावृतं वस्त्रवरैः सुमन्दिरम् ॥ २५॥

शनैश्चरे मूर्तिगते कुजेऽथवा
पापांशकस्थे बहुपापवीक्षिते ।
गृहाग्नयं जन्म वदेच्छुभांशके
कुटारके छिरयुते विरूपके ॥ २६॥

इति श्रीवृद्धयवने जन्माध्यायचतुर्थः ॥

आध्याय ०५

आयुर्दयाध्यायः

आयुः परं मानववारणानां
शतं सविंशं कुलसम्भवानाम् ।
द्वात्रींशतिर्जात्यतुरङ्गमाणां
खरोष्ट्रयोर्विंशतिवर्षसंख्या ॥ १॥

चतुर्विहीना च तथाविकानां
कासारगोशूकरमर्कटाणम् ।
चत्वारिविंशत् कथिता शुनां च
तदर्धतो व्यघ्रहरिद्दकाणाम् ॥ २॥

त्रिषष्टिसंज्ञः परभाजनानां
द्विजिह्वगृध्रप्रभवः सहस्रम् ।
संवत्सराः षड्वटटिद्दभानां
यूकापतङ्गाकृमिकीटकानां
मासार्धजचैव पिपीलिकानाम् ॥ ३॥

[वृक्षोद्भवो वर्षशतं प्रदिष्ट]
स्तेषां पताशो द्विगुणेन वाच्यः ।
अश्वत्यन्यग्रोधशमीसमुत्यः
शनि विवृद्धा द्विजवृक्षतश्च ॥ ४॥

केन्द्रेषु सौम्या यादि पापहीनाः
सवेषु जातस्या मितिर्न वाच्या ।
..........च्छाश्रिता वा मि ........पारसेङ्गा
विमित्रिता वा मनुनस्य तज्ज्ञैः ॥ ५॥

सुहृद्गृहस्थैः सकलैस्तु तुङ्ग-
मथ प्रथातैर्गृहमंशकं वा ।
आयुः परं सूत्रनरस्य वाच्यं
सर्वैश्च वै वृद्धिगृहप्रयातैः ॥ ६॥

अर्थसंस्था यदि पापखेटाः

षडाष्तमस्था यदि वा स्युरेव ।
षष्ठ्यांशको मृत्युरिह प्रदिष्टः
सौम्यैर्दिना प्रोद्गतवंशयोगे ॥ ७॥

केन्द्रेषु पापा यदि सौम्यहीना
च वीक्षते देवगुरुः सितो वा ।
मृत्युस्तदा शस्त्रकृतः प्रवाच्यो
वर्षस्य मध्ये कृतसम्भवे वा ॥ ८॥

षष्ठाष्टमस्था यदि सौम्यखेटाः
पापा धनद्वादशग यदा स्युः ।
तदा विनाशो मनजस्य वच्यो
मासद्भवेनैव चतुष्पटोन्यः ॥ ९॥

षष्ठेऽष्टमे वा यदि शिवराश्मिः
पापेन दृष्टः सहितोऽथवा स्यात् ।
सद्यो विहन्यान् मनुजं न दृष्टो
यदा सुरेज्येन शुभस्त्रीतेन ॥ १०॥

क्षीणः शशी मूर्तिगतः सपापो
द्यूने च पापो न शुभस्तु केन्द्रे ।
मृत्युस्तदा वत्सरमध्यमः स्यात्
नरस्य दृष्टो न यदा शुभेन ॥ ११॥

एतैर्वीवाहांशगुणैर्विलग्ने
ताड्यो ग्रहो नागनभः शशाङ्कः ।
राश्यादितो दस्त्रशशाङ्कभक्तः
शेनाब्दपुर्व ..........आयुरुक्तः ॥ १२॥

द्रेष्काणवर्गोत्तमरन्ध्रभाग-
स्वक्षेत्रगस्य द्विगुणः प्रदिष्टः ।
द्विघ्नः स्वतुङ्गे कटिले च मार्गे
द्वयोश्च लब्धौ त्रिगणः प्र..........इ........ः॥ १३॥

अर्धं हरत्येव हि नीचसस्यः
अस्तं गतश्चार्कसुतो निहन्ति ।
शुक्रश्च आयुःकलुषोऽस्तगो वा

सर्वे त्रीभागा रिपुगा भवन्ति ॥ १४॥

अर्धार्दिषष्ठान्तमपक्रमेण
त्वेकादशादेः प्रहरन्त्यानिष्टाः ।
सर्वे व्ययस्थाश्च शुभास्तदर्धं
विलोमतो वीर्ययुतश्च सौम्यः ॥ १५॥

इति श्रीवृद्धयवन आयुर्दायाध्यायः पंचमः ॥

---

आध्याय ०६

दशाध्यायः

आयुर्दया येन पुरा ही दन्तं
तत्संमिता तस्य दशा प्रदीष्टा ।
शन्तान्तरा सा च गणैर्विचिन्त्या
दोषैश्च तज्ज्ञैः फलनिर्णयार्थम् ॥ १॥

नवांशमित्रस्वगृहोपगस्य
स्वभावशुभा हि दशा ग्रहस्य ।
आतोऽन्यग्रा पापफला प्रदिष्टा
द्याभ्यं फलं .......... समं मुनीनाम् ॥ २॥

रवेर्दशायामतितिक्षणमोजः
प्राप्नोति मानोपचयं महान्तम् ।
धनानि चामीकरताम्रशस्त्रं
संजायते बन्धुसुखं शुभायाम् ॥ ३॥

भयावहस्तेयपरापवादान्
क्लेशान् विचित्रान् कुलवैरमुग्रम् ।
पापात्मकायां गुदवक्ररोग-
मनेकशोक मतिविभ्रमं च ॥ ४॥

नित्यं विभूषामणिमंचलाभं
मिष्टान्नपानं प्रमदानुरागम् ।
चान्द्री दशा साधुफला नराणां
नरेन्द्रपूजां तनुते सदैव ॥ ५॥

प्रवासं स्वजनैर्विवाद-
मिष्टैर्वियोगं सततं रुजं च ।
अनिष्टरूपां परपक्षवृधिं
चान्द्री दशा रोगभयं करोति ॥ ६॥

प्राप्नोति भौमस्य दशाविपाके
धनानि चौर्याहवविक्रमेभ्यः ।
सौवर्णताम्रक्षितिपाग्नितः सदा
शुभैः प्रयोगैर्विविधैरनिष्टैः ॥ ७॥

तृष्णाजवरासृग्विषपित्तमूर्छा-
गात्राङ्गभङ्गान् विविधांश्च रोगान् ।
पापे तु भौमस्य दशाविपाके
क्रोधक्रियोत्साहमधर्मबुद्धिम् ॥ ८॥

बौधीं दशां प्राप्य गुणप्रशंसां
प्राप्नोति शश्वत् प्रियतां नृलोके ।
सुवर्णमुक्तामणीरत्नलाभं
शुभां विभूतिं च जनातिगां च ॥ ९॥

प्रमेण युक्तः कफपित्तभाजी
विवर्णदेहः पुरुषः प्रसन्नः ।
बौधीं दशां प्राप्य विरूपचेष्टौ
भवेन् मनुष्यः पतितानुरक्तः ॥ १०॥

गुरोर्दशायां लभतेऽतिमानं
गुणोदयं बुद्धवबोधमग्र्यम् ।
स्थितिप्रतापद्युतिकात्तिभोगान्
..........अत्म्यचेष्टाफलमुत्तमायाम् ॥ ११॥

मूर्दार्थचिन्ता च विरूपकायां
रोगश्च शश्वत् प्रियविप्रयोगः ।
गुरोर्दशायां मुखरोगपीडा
संजायते स्त्रीनृपजं भयं च ॥ १२॥

भृगोर्दशायां लभते सुखानि
स्त्रीपुत्रजातानि नृपोद्भवानि ।

इष्टान्नपानाम्बरगन्धमाल्यं
शुभाश्रयायां परमां च तुष्टिम् ॥ १३॥

असत्फलायां च भृगोर्दशायां
नृपैर्विषादि कुलवृन्दमुख्यैः ।
विरुध्यतेऽधर्ममुपाश्रीतैच
सम्प्रीयते दुष्टनितम्बनीभिः ॥ १४॥

प्राप्नोति सौरस्य दशाप्रवेशे
शुभे शुभं भूपतिभूमिसङ्गतः ।
कुधान्यजीर्णाम्बरगर्दभोष्ट्रैः
संयुज्यतेऽर्थैर्महिषाटिभीश्च ॥ १५॥

सौरस्य पापे तु दशाविपाके
कुतुम्बवैरं प्रियविप्रयोगः ।
संजायते गुह्यविकाररोगः
कुमित्रसङ्गः पशुवित्तहानिः ॥ १६॥

दशा विलग्नस्य चरस्य पूर्वे
भागे तृतीये शुभदा नराणाम् ।
मध्या द्वितीये विफला तृये
शस्ता समान्त्या द्विभवे विलोमः ॥ १७॥

स्थिरे खलेष्टान्यतमा नराणाम् ॥ १७॥

वर्गाः सदैव क्रमशो विचिन्त्याः
शुभातिशुभ्रा ग्रहसौम्ययुक्ता ।
मध्याफला मध्यफला खला च
खलाखलान्यातिखला प्रदिष्टा ॥ १८॥

शुभा शुभं योगफलं विधत्ते
हिरण्यमुक्ताफलरत्नलाभान् ।
आरोग्यमोजः स्वकुलस्य पूजां
दशा विलग्नस्य नृणां प्रसूते ॥ १९॥

मध्या तु मध्यं फलमातनोती
दशा विलग्नस्य शुभा नराणाम् ।

कष्टेन लाभं निधनेन मैत्रीं
कुपण्यसेवाविकृतिप्रमादम् ॥ २०॥

पापा विलग्नस्य दशा प्रयाता
भयं सुशोकं कलहं विवादम् ।
करोति नित्यं परदारसङ्गं
विबुद्धिनाशं सततं प्रवासम् ॥ २१॥

निशाकरादित्यविलग्नभानां
तत्कालयोगादधिकं बलं यः ।
विधर्ति तस्यादिदशा प्रयोज्या
सर्वग्रहाणामुदयान्वितानाम् ॥ २२॥

ततस्त तत्रैव गतस्य चिन्त्या
चतुर्थकामाम्बरगस्य पश्चात् ।
तेषां द्वितीये च ततस्तृतीये
स्थाने स्थितस्य क्रमशो ग्रहस्य ॥ २३॥

एकर्क्षगानां तु बलाधिकस्य
देया दशा पूर्वतरं ततोऽन्या ।
दशार्धकालं लभतेऽर्कसंस्थ-
स्तृतीयभागं च त्रिकोणगो यः ॥ २४॥

भागं चतुर्थं चतुरस्त्रसंस्थः
सप्तांशकं सप्तमगो स वाच्यम् ।
सदा फलं वा सुररश्मियोज्यं
मित्रोच्छनीचस्वगृहत्रिकोणजम् ॥ २५॥

फलानि शेषाणि दशाविपाके
निजानि देयानि निजग्रहस्य ।
अन्तर्दशास्येव विचिन्त्य जन्म
तत्कालजातानिं यथातथानि ॥ २६॥

षड्वर्गवीर्येक्षणलग्नभावजा
दशादिपंचोत्तरवृद्धिसंयुताः ।
दशासु सर्वासु फलांशकाः स्मृताः
शश्वद्ग्रहाणां क्रमशो निसर्गजाः ॥ २७॥

ग्रहस्य लिप्ताः स्वफलांशताडिता-
स्तत्कालजातैः फलजैर्विभाजिताः ।
फलानी शेषाणि यथागतानि
दशांशभेत्कृणि निजांशसंख्यया ॥ २८॥

भनोर्मृगाद्यं शशिनो घटादिकं
तुलादि भौमस्य गुरोरजादिकम् ।
बुधस्य युग्मादि हयादिकं भृगोः
कर्काटी सौरेः प्रविचिन्तयेत् फलम् ॥ २९॥

स्वतुङ्गहीनस्य कला ग्रहस्य
विभाजीताः पुष्करसप्तपाणिभिः ।
विंशांशकाद्यं फलमाप्तमौच्छकं
नखाधिकं त्याज्यमयो नखेभ्यः ॥ ३०॥

फलं फलांशाभिहतं नखोद्धृतं
शेषं फलं विंशतिर्भागसंमीतम् ।
ज्ञेयं ततो नीचफलं स्वसप्तमा-
द्राशेर्ग्रहाणां विधिनामुनैव ॥ ३१॥

लग्ने तृतियेऽष्टमके च लग्नजं
फलं तथा विंशतिमेव भावजम् ।
स्थाने विचिन्त्यं कुटिलो ..........
ण्येतानि सौम्यानि दशाफलं च ॥ ३२॥

नीचेऽस्तगे चार्धफलं शुभग्रहे
पूर्णत्वमिष्टैर्विपरितमुच्छगैः ।
नीचास्तगे वक्रगते समं फलं
तस्यैव तुङ्गे द्विगुणं प्रकीर्तितम् ॥ ३३॥

पापा दशा पापभवान्तरा वा
पापाष्टवर्गे च यदा न शुभ्रा ।
.......... मृत्युर्दिवसे हि तस्य
संजायते पापकृतस्य जन्तोः ॥ ३४॥

दशाप्रवेशेऽष्टमगे तु दृष्टे

स्वेनारिणा शत्रुगृहस्थितेन ।
तदाममृत्युं कुरुते दशायां
तस्यैव पापोद्भवपाकमध्ये ॥ ३५॥

त्रिंशांशके यस्य गृहस्य संस्थः
स्थानेऽष्टमे पापफलः शुभो वा ।
तेनैव दृष्टः कुरुतेऽपमृत्युं
.......... रेण तस्यैव यशोदिते वा ॥ ३६॥

पाकाधिपः सर्वविरुद्धवर्गे
स्थितोऽपमृत्युं कुरुते नराणां
क्रूरैर्विदृष्टो यदि वा न सौम्यै-
र्नीचाश्रितो वा खलु निर्जितश्च ॥ ३७॥

षष्ट्यब्दमध्ये तु यदायुः सप्त
विभाजयेत्तेन परंपराणाम् ।
लब्धं च यच्छेदकसंश्रितं तन्
द्वेदात् परं जन्मवदेव चिन्त्यम् ॥ ३८॥

छेदोऽपमृत्युर्मरणं तृतीयं
भवेन्नराणां नियतं सदैव ।
धर्मक्रियाभीर्हरतेऽपमृत्युं
छेदं तु कृच्छ्रेण ग्रहप्रभावात् ॥ ३९॥

असाधनं स्थान मरणं नराणां
सर्वैरुपायैरपि देवतानाम् ॥ ४०॥

पाकाधिपः स्याद्यदि सौम्यवर्गे
दशाप्रवेशे त्वथ तुङ्गगो वा ।
न छेदकः स्यान्न तथापमृत्यु-
स्तस्यां दशायामिदमाह वेधाः ॥ ४१॥

नीचप्रवृत्ता रविमण्डलस्था
ग्रहेण भग्नाः खलवर्गयुक्तः ।
सर्पाहता मन्त्रबलेन यद्वत्
तद्वत् सवर्गाः शुभदा न खेटाः ॥ ४२॥

एवांविध घ्नत्ति शुभानि सर्वे
फलानि पापानि च वर्धयन्ति ।
मिश्राश्च मिश्रं परिपाचयन्ति
नीचास्तकेन्द्रे फलपादहानिः ॥ ४३॥

इति श्रीवृद्धयवने दशाध्यायः ॥

---

आध्याय ०७
अन्तर्दशाध्यायः
भनोर्दशायां यदि शीतरश्मे-
र्दशाविपाकं कुरुते तदा स्यात् ।
क्लेशेन वित्तं स्वधनेन मित्रं
भोगांच नित्यं हि विडम्बनेन ॥ १॥

हृद्रोगमीर्ष्यं स्वजनापमानं
भयं सुशोकं प्रियलोकनाशम् ।
भानोर्दशायां कुरुते प्रविष्टा
दशा महीजस्य क्षतप्रकोपम् ॥ २॥

बौधी विधत्ते पतितस्य लाभं
कुमित्रसङ्गं परिवारलाभम् ।
अपात्रदानं विचयातिवेगं
भानोर्दशायां यदि सम्प्रविष्टा ॥ ३॥

भानोर्दशायां सुरपूजितस्य
दशा विधत्ते कुनृपेण सख्यम् ।
असद्जयं पापविधानलाभं
दुष्टाबलासङ्गमसत्यमेव ॥ ४॥

शौक्री खरांशोर्यदि सम्प्रवृत्ता
दशा दशायां कुरुते कुपुत्रम् ।
कावत्तला ..........कुजनेन सख्य
विदेशतः प्राप्तियथो नराणाम् ॥ ५॥

दशाविपाके दिनपस्य सौरी
दशा प्रविष्टाक्षिरुजं विधत्ते ।

वृचाटनं बन्धुजनेन वैरं
क्षुच्छस्त्रभूपालकृतं भयं च ॥ ६॥

लाग्नी दशा सौम्यविलग्नजाता
भानोर्दशायां खरवेशराप्तिम् ।
अश्रीयमस्त्रप्रभवं च लाभं
श्चामर्कटव्योमविचारिणीनाम् ॥ ७॥

पापोद्भवा पापमार्तिं विधत्ते
द्विजामरद्वेषगुरुप्रकोपम् ।
अन्तर्दशा सा दिनपस्य नित्यं
भयं दशायां नृपचौरजातम् ॥ ८॥

तृष्णौषधीसेवनचौर्यलाभं
सौख्यं तदोथ्यं विटकामिनिभीः ।
कुपुण्यां विविधैश्च दम्भै
रविर्दशायां कुरुत् हिमांशोः ॥ ९॥

कुभोजनाच्छादनपानलाभं
कुस्त्रीप्रसङ्गं कुधनं विचित्रम् ।
दशा महीजस्य सुधाकरस्य
प्राप्ता दशायां परमोच्छणं च ॥ १०॥

..........न्नार्थहस्त्यश्वसुवर्णला
कुतुम्बवृद्धिं प्रियतां च लोके ।
बौधी दशा चन्द्रदशाप्रवेशे
करोति मर्त्यं बहुवित्तलाभम् ॥ ११॥

नरेन्द्रपूजा द्विजदेवभक्ति-
र्यशः प्रशंसा स्थिरमित्रलाभम् ।
पुण्यानि शुभ्राणि जयं परेषां
चान्द्र्यां यदा देवगुरोः प्रयाता ॥ १२॥

लाभं पुरग्राममहाधनानां
विहारविद्यागमवाजिनां च ।
शौक्री दशा चन्द्रदशां प्रयाता
करोति तुष्टिं परमां सदैव ॥ १३॥

शौराबलीसंधितमुग्रलाभं
पापानुरागं व्यसनेन सिद्धिम् ।
सौरेर्दशा चन्द्रदशां प्रयाता
वेश्मानुरागं कुरुते प्रभूतिम् ॥ १४॥

सौम्योदयोत्था हि दशा हिमांशो-
र्यदा दशायां कुरुते प्रवेशम् ।
आर्थलाभं कृषिकर्मासिद्धिं
नृणां विधत्ते विविधांश्च भोगान् ॥ १५॥

खलोदयेत्य हिमगोर्दशायां
खरोष्ट्रधर्मप्रभवं च लाभम् ।
कुशास्त्रसेवां प्रणयेन वैरं
स्ववान्धवैर्मित्रसुतैश्च नित्यम् ॥ १६॥

दशा खरांशोर्धरणिसुतस्य
यदा दशायां कुरुते प्रवेशम् ।
तदा ज्वरश्लेष्मसुपित्तवाइतैः
पीडां विधत्ते क्षतजैर्विकारैः ॥ १७॥

भौम्यां हिमांशोः सहसा प्रयाता
दशा दशायां कुनयेन लाभम् ।
द्युतानुरागं परदारसौख्यं
प्रपोषणं देवगुरुद्विजानाम् ॥ १८॥

बौधी दशा भौमदशां प्रयाता
करोति सौख्यं वनदेशजातम् ।
आत्मप्रशंसाजनितं च तेषं
नृणां महायासभवं च सौख्यम् ॥ १९॥

भौम्यां यदा देवपुरोहितं
दशा प्रयाता त्वरितं दशायाम् ।
करोति दैन्यप्रभवं च लाभं
पराबलायाः स्वकलत्रहानिम् ॥ २०॥

विधत्तेऽन्त्यजनेन मैत्रीं

क्वचिद्विषादं क्वचिदेव हर्षम् ।
परापराधोदवमाशकर्म
नृणां विधत्तेऽल्पफलां च वृद्धिम् ॥ २१॥

गुरुप्रकोपं बहुगुह्यरोगं
पामाविचर्थिप्रभवां हि पीडाम् ।
सौरी दशा वक्रदशाविपाके
प्राप्ता सुवैरं निजबन्धुदारैः ॥ २२॥

लाग्नी दशा भौमदशां प्रयाता
वास्यानि धत्ते परदारराग़म् ।
क्वचिद्भयं पार्थिवजं च लाभं
क्वचित् क्वचिद्बन्धुजने प्रहर्षम् ॥ २३॥

खलोदयोत्था च दशा दशायां
भौमस्य धत्ते स्वरुजाङ्गपीडाम् ।
मानापमानं निजलोकमध्ये
मिथ्या प्रबुद्धिं स्वपरैः सदैव ॥ २४॥

रवेर्दशा सौम्यदशा प्रयाता
करोति मानं खलजं सदैव ।
लाभं विकृत्या परदेशतोऽन्यन्
मायापटुत्वं बहुकामसेवाम् ॥ २५॥

..........दशा प्रयाता
तदा विधत्ते नृपतेस्तु मानम् ।
आरोग्यतां साधुजनेन सख्यं
..........ओगान् विचित्रान् द्विजदेवसेवाम् ॥ २६॥

..........चनानी
क्लेशोदयः संशय एव पुंसाम् ।
यदा दशायां शशिजस्य याता
दशा धरित्रीतनयस्य नित्यम् ॥ २७॥

विद्यागमं पार्थिवमानमोजो
जयं विवेकं प्रियतां च लोके ।
यदा दशा देवपुरोहितस्य

बौध्यां प्रयाता सततं विधत्ते ॥ २८॥

मानं प्रशांसां नृपलोकसख्यं
विद्यार्जनं धर्ममतिं सदैव ।
शौक्री दशा सौम्यदशां प्रपना
करोति मुक्तामणिवित्तलाभन् ॥ २९॥

व्रणप्रकोपं कलह कुबुद्धिं
विदेशवासं मतिसंक्षयं च ।
सौरी दशा सौम्यदशाविपाके
धत्ते नराणां बहुवित्तनाशम् ॥ ३०॥

यशः प्रतापं परमं च सौख्यं
चतुष्पदाधादनभूमिलाभम् ।
लाग्नी दशा सौम्यविलग्नजाता
बौध्यां दशायां विविधं च भोगम् ॥ ३१॥

कुतुम्बवैरं पशवित्तनाशं
रोगान् विचित्रान् सततं च युद्धम् ।
..........दयोत्या तु दशा दशायां
लाग्नी विधत्ते शशिनन्दनस्य ॥ ३२॥

देवद्विजोत्यं कुरुते सुलाभं
प्रपोषणोत्यं विविधैः प्रपंचैः ।
दशा यदा देवपुरोहितस्य
भानोर्दशायां कुरुते विपाकम् ॥ ३३॥

नानार्थलाभं पशुपुत्रवृद्धिं
यशःप्रमोदं प्रभुतां सदैव ।
गुरोर्दशा रात्रीपतेर्दशायां
सौम्ख्यानि धत्ते विविधानि पुंसाम् ॥ ३४॥

कृच्छेण सिद्धिं बहुदैन्यमेव
स्वपक्षविद्वेषणतश्च लाभम् ।
वेश्यानुरागं कपटं नितान्तं
गुरोर्दशां भौमदशा प्रपन्ना ॥ ३५॥

हस्त्यश्वयानाशनभोजनानि
नानाविमित्राणि च मण्डनानि ।
बौधी दशा देवपुरोहितस्य
ददाति पुत्रान् विविधांश्च भृत्यान् ॥ ३६॥

नृपप्रसादं बहुवित्तलाभं
धर्मानुरागं विजयं रिपूणाम् ।
भृगोर्दशा जीवदशाविपाके
पुंसां विधत्ते सुबहुप्रशंसाम् ॥ ३७॥

नीचानुरागं ..........
नीचेन सख्यं परधर्मसेवाम् ।
सौरेर्दशा जीवदशाविपाके
नृणां विधत्ते परवाम्चनानि ॥ ३८॥

लाग्नी दशा सद्ग्रहजा प्रयाता
गुरोर्दशायां कुरुते प्रहर्षम् ।
हस्त्यश्वलाभं नृपतेश्च मानं
विवेकतां धर्ममतिं सदैव ॥ ३९॥

पापोद्भवा लग्नदशा दशायां
जीवस्य धत्ते कलहेन लाभम् ।
संसेवया नीचजनस्य नित्यं
विद्वेषणं साधूजनस्य पुंसाम् ॥ ४०॥

लाभं खरोष्ट्रप्रभवं नराणां
कुधान्यजं चैव जनापवादम् ।
शौक्री दशा सौर्यदशाविपाके
करोति बालस्य तथा प्रमोहम् ॥ ४१॥

धर्मक्रीयाराधनमुन्त्तमानां
लाभं पुरक्षेत्रविलासिनीनाम् ।
भृगोर्दशा रात्रिपतेर्दशायां
नृणां विधत्ते बहुवित्तजं च ॥ ४२॥

विदेशवासं परपक्षपूजां
कुधर्मसेवां कुजनानुरागम् ।

भृगोर्दशां भुमदशा प्रयाता
करोति वेश्याजनसम्प्रयोगम् ॥ ४३॥

विद्यां विवेकं प्रभुतो च कीर्तिं
सुधर्मलब्धं नृपमेश्च मानभ ।
दशा भृगोः सौम्यदशाविपके
नृणां विधत्ते गत्तवार्जितलाभम् ॥ ४४॥

लाभं गृहक्षेत्रपुरास्वजातं
सुवर्णस्वनाम्बरयो जनानाम् ।
दशा भृगोर्जीवदशाविपके
करोति लाभं सुतदारसौख्यम् ॥ ४५॥

प्रमादनिद्राकलहं सुवेश-
मालस्यतां देहकृतं च लाभम् ।
द्रोहं स्ववर्गेण परेण ..........
..........आति शौक्री रविजस्य पाके ॥ ४६॥

शौक्रीं दशां लग्नदशा प्रयाता
सौम्योद्भवायं कुरुतेऽर्थसिधिम् ।
प्रतापवृद्धिं प्रभुतां विवेकं
.......... ॥ ४७॥

पापोद्भवे वंचनतस्तु लाभं
दैन्येन पापं बहुगर्जितेन ।
कुकर्मणा सूधुनिपीडनेन
भृगोर्दशा लग्नदशाविपाके ॥ ४८॥

मान्दी दशा भानुर्दशाविपाके
करोति नाशं धनपुत्रसम्भवम् ।
क्लेशं प्रवासं भयमिष्टहानिं
देवद्विजानां परिपीडानं च ॥ ४९॥

मान्दी दशा चन्द्रदशाविपाके
आलस्यमार्तिं कुरुते सदैव ।
कुकर्मसिद्धिं कुजनस्य लाभं
कुकर्मसेवां सततं नराणाम् ॥ ५०॥

हृद्रोगदुःखं परवित्तहानिं
..........पोषणं चौरकृतं सदैव ।
शनिर्दशा भौमदशाविपाके
करोति वैरं निजबन्धुलोकैः ॥ ५१॥

बौधी दशा सौरदशां प्रयाता
..........वृद्धिं जनयेन्मनुष्यम् ।
पित्तानिलश्लेष्मकृतं विकार-
मालस्यमुद्वेगमहाभयं च ॥ ५२॥

दशा शनेर्देवपुरोहितस्य
यदा दशायां परिपाकमेति ।
असद्व्ययं बान्धवबन्धनं च
तदा विधत्ते गुणविप्रकर्षम् ॥ ५३॥

शौक्री दशा सौरदशाविपाके
करोति पुंसां प्रभुतां कुवर्गे ।
नीचैर्विवादं बहुनीचलाभं
धर्मस्य नाशं परधर्मवृद्धिम् ॥ ५४॥

लाग्न्यां यदा सूर्यसुतो विपाकं
सौम्योद्भवायां कुरुतेऽतिगर्वम् ।
औद्धत्यमिष्टैः सह वंचनानि
नानापटुत्वं सततं नितान्तम् ॥ ५५॥

पापोद्भवायां रविजस्य जाता
..........ं कुरुते सुहानिम् ।
शिरोर्तिपित्तज्वरवेदनाश्च
बहुप्रकाराः परमं च शोकम् ॥ ५६॥

विलग्णि सूर्यदशाविपाके
करोति सौम्यांनियमं कु.......... ।
असज्जनैः सङ्गामथाङ्गता च
विद्वेषतां बन्धुजनेन नित्यम् ॥ ५७॥

चान्द्र्यां प्रयाता प्रकरोति सिद्धिं

दशा विलग्नस्य तु सौम्यरूपा ।
मिष्टान्नपानानि पृथग्विधानि
शत्रुक्षयं पार्थिवलोकपूजाम् ॥ ५८॥

सौम्या दशा भूमिसुतस्य पाके
यदा विलग्नस्य करोति पाकम् ।
तदातिरोगं रुधिरोद्भवं स्या-
द्विद्वेषता सर्वजनेन नित्यम् ॥ ५९॥

प्रतापं प्रणयं च लोके
विवेकविद्यागममर्थसिद्धिम् ।
विलग्नी दशा सौम्यदशाविपाके
सौम्या विधत्ते गुरुकामसेवाम् ॥ ६०॥

मन्त्रौवधीछादनभोजनानि
विलग्नी दशा जीवदशां प्रयाता ।
सुधनानि सौख्यं ..........
सौख्यं नरेन्द्रेण विवेकतां च ॥ ६१॥

भृगोर्दशायां प्रकरोति लाग्नी
सौम्या दशा मानुसुखं विधत्ते ।
प्रियातिथित्वं प्रचुरांश्च भोगां
विवेकतां साधु नन सख्यम् ॥ ६२॥

पापादशा लग्नसमुद्भवा च
शनेर्दशायां कुरुते प्रमादम् ।
आलस्यमुद्वेगगुरुप्रकोपं
विमाननां पार्थिवजं भयं च ॥ ६३॥

पापा दशा लग्नसमुद्भवा च
रवेर्दशायां प्रकरोति हानिम् ।
सदा प्रमासं प्रचुरां च पीडाम् ॥ ६४॥

सुहृत्प्रकोपं कुरुते न सौख्यं

।

लाग्नी दशा चन्द्रदशां
पापा विधत्ते खलुबन्धवं च ॥ ६५॥

शिरोर्तिदाहज्वरमिष्टनाशं
भयं प्रकोपं कलहं सदैव ।
लाग्नी दशा भौमदशाविपाके
करोति नाशं निजबन्धवानाम् ॥ ६६॥

सौम्यां दशायां कुरुते प्रवा
लाग्नी दशा पापरतिं कुपूजाम् ।
पापातिपापानि यथा विधत्ते
गुरुद्विजप्रेषणजैर्विकारैः ॥ ६७॥

गुरोर्दशायामनुसम्प्रविष्टा
दशा विलग्नस्य यदा च पापा ।
तदा धनैरात्मगृहोद्भवैश्च
करोति भोगान् विविधान् मनुष्यः ॥ ६८॥

दम्भेन धर्मं सभयेन चिन्त्यं
नृणां विधत्ते कुधिया च चारम् ।
लाग्नी दशा शुक्रदशाविपाके
पापा सुदैन्यं न कुतुम्बवृद्धिम् ॥ ६९॥

क्लेशान् विचित्रान् सुतदारवैरं
धनप्रणाशं प्रचुरां च वाणीम् ।
लाग्नी दशा मन्ददशाविपाके
पापा विधत्ते विविधांश्च रोगान् ॥ ७०॥

इति श्रीवृद्धयवनेऽन्तर्दशाध्यायः ॥

---

आध्याय ०८
अष्टकर्गफलाध्यायः
चन्द्रेषु सूर्यः स्वगृहात् क्रमेण
पुनस्तथायाष्टकराङ्कसंस्थितः ।
मन्दारयोश्चापि तथैव वाच्यः
शुक्राद्रसास्तान्त्यगतश्च नित्यम् ॥ १॥

जीवाद्रसैकादशपंचनन्दै-

र्विद्धिस्थितो रात्रिपतेः प्रदिष्टः ।
बुद्धङ्कसूर्येषु शरे च सौम्यात्
स्वलग्नतो वृद्धियुगव्ययेषु ॥ २॥ <sUryaH>
अर्कात् केन्द्रवह्नीशुभवाष्टसंस्थो
गुरोर्व्यया..........आष्टचतुष्टयथः ।
..........आब्धिपंचाङ्कदशागरुद्रैः
शुक्रात् कुजाल्लाभधना .......... ॥ ३॥

..........

..........

..........ष्टकेन्द्रैः
स्यान्मन्दतो वह्निरसेपुसूर्यगः ॥ ४॥ <chandraH>
गुरोर्दशैकादशाषडन्त्यमः
रवेस्त्रिषष्ठायदशेषुसंस्थितः ।
लग्नात् प्रवृद्धा प्रथमे च शीतगो-
र्बुद्धा सितात् सूर्यरसाष्टलाभगः ॥ ५॥

.......... ॥ ६॥ <bhaumaH>
चन्द्राद् द्विषष्ठायदशाष्टवेदगो
लग्नात् स्वषष्ठार्थ शुभदः प्रकीर्ति
आद्याब्धिलाभार्थगजाङ्कवह्निभिः
शुक्राच्छनेश्चन्द्रयुगायवित्तैः ॥ ७॥

वस्वङ्कादक्रामसुसंस्थितश्च
भात् स्वाश्च तन्वब्धिभवार्थ मङ्गलात् ।
रन्ध्रेषु कासासुप एव सार्वक्षी
गुरोश्च चन्द्राङ्ग गस्थः शुभदः ॥ ८॥ <budhaH>
जीवः कुजाडस्त्रभवाष्तकेन्द्रगः
सूर्याश्च दस्त्रादिनवाष्ट कीर्तितः ।
स्वशून्यरामैः स्वगृहात् प्रकीर्तितो
नवाशकायार्थशराङ्गगः सितात् ॥ ९॥

चन्द्रान् मदाङ्केषुधनायगः सदा
शनैश्चराद्वह्निरसेषुभास्करैः ॥ १०॥

वधान् नवव्योमयुगेन्दुमार्गण-
रुद्रतर्कैः शुभदः प्रकीर्तितः ।
लग्नान् नवाशाब्धिपरेषुलोचन-
सूर्यागरामैः क्रमशो विधेयः ॥ ११॥ <jIvaH>
शुक्रो विलग्नाच्छशिवित्तवह्नि
युगेषुनन्दायगश्च इष्टः ।
चन्द्रात् ससूर्यः सदिशाः स्वसद्यत-
स्त्रिवेदपंचाष्टदिगङ्कलाभगः ॥ १२॥

शने रवेरष्टदिवाकराद्यै-
र्गुरोर्नवव्योमभवाष्टपंचगः ।
बुधाद् गुणेष्वङ्कदशाङ्गसंस्थितो
भौमाद् भवेष्वग्निरसाङ्कसूर्यगः ॥ १३॥ <shukraH>
स्यात् सूर्यजो वह्निरसेषुसंगतः
ससूर्यदिग्गो धरणिसुतस्य ।
सूर्याद् धनयाष्टचतुष्टये च
शुक्राद्रसार्कायगतः सुभद्रः ॥ १४॥

त्रिषष्ठलाभेषु निशाधिनाथा-
ल्लग्नात् सवृद्धीन्दुदशाब्धिभिश्च ।
जीवाच्छराङ्गव्ययलाभसंस्थो
बुधाद् व्ययाङ्काङ्गदिशाङ्गनागतः ॥ १५॥ <shaniH>

..........

विन्दूनि रेखश्च विमिश्रयित्वा ।
सप्तावशेषेण मितो ग्रहश्च
स्वाष्टांशसंज्ञं फलमादधाति ॥ १६॥

इन्यात् फले सोष्तकवर्गनाचजं
फलं बलिष्ठो यदि तस्य पार्श्वगः ।
अतोऽन्यथा तस्य फलं निहन्यते
तेनैव साम्ये फलयोर्निसर्गजम् ॥ १७॥

रेखाश्रितस्तीक्ष्णकरः प्रगल्भं
करोति मर्त्यं गजवाजियुक्तम् ।

मित्राङ्गसाधुं जनसम्प्रयुक्तं
स्थानेऽद्यके रोगविवर्जितं च ॥ १८॥

द्वितीयसंस्थः प्रचुरप्रतापं
प्रभूतवित्तिं जितशत्रुपक्षम् ।
विद्यानुरक्तं नृपतेरभीष्टं
प्रशान्तचिन्तं कुरुते सदैव ॥ १९॥

तृतीयगः सत्यपरं प्रशान्तं
व्यचेतपापं सुजनैः सुपूज्यम् ।
हिरण्यपुजार्थविवे..........
नरं प्रसूते सततं सुशीलम् ॥ २०॥

चतुर्थगः सर्वजनस्य पूज्यं
करोति मर्त्यं सुदृढं सुशीलम् ।
..........पूज्यं सुभगं प्रशस्तं
धर्मान्वितं दानपरं प्रसूते ॥ २१॥

करोति मर्त्यं खलु पंचमस्यो
नरं रविर्गोमहिषोष्ट्रयुक्तम् ।
कुलप्रधान नृपतेरभीष्टं
सुसंयतं ब्रह्मणदेवभक्तम् ॥ २२॥

हतारिपक्षं प्रकरोति षष्ठे
स्थितो विवस्वान् प्रथितं नृलोके ।
स्त्रीणामभीष्टं गुरुदेवभक्तं
.......... ॥ २३॥

स्त्रीलाभयुक्तं खलु सप्तमस्थो
नरं विधत्ते खलु तीक्ष्णरश्मिः ।
उदारचिन्तं प्रभुतासमेतं
मिज्ञानशीलं समरप्रचण्डम् ॥ २४॥

स्थानेऽष्टमे पुत्रधनैः समेतं
सुरक्तपित्ताधिकमप्रमेयम् ।
विख्यातकीर्तिं सततं सुदान्तं
हतारिपक्षं प्रकरोति भानुः ॥ २५॥

बिन्दुस्थितोऽर्कः प्रकरोति पापं
स्थानेऽद्यके दुर्जनमुग्ररोगम् ।
कृशं कृतघ्नं परदाररक्तं
विवेकहीनं प्रियसाहसं च ॥ २६॥

मूर्खं निकृष्टं तु तथा द्वितीये
कुमीत्ररक्तं धनधान्यहीनम् ।
शिरोतिदाहजतरपित्तमुख्यैः
प्रपीडितं वक्रभवैश्च रोगैः ॥ २७॥

तयेन हीनं पुरुषं तृतीये
सुतार्थधान्यैः परिवर्जितं च ।
सुदाभिभूतं बहुशत्रुपक्षं
क्रियाविहीनं विफलं प्रसूते ॥ २८॥

निन्द्यं कृतघ्नं परदेशरक्तं
करोति मर्त्यं नियतं चतुर्थे ।
इष्टैर्वियुक्तं परदाररक्तं
पराजितं सर्वजनैः सदैव ॥ २९॥

करोति भानुः खलु पंचमस्थित्तो
सुग्वैरदारिद्यभयेन पीडितम् ।
दौर्भाग्यवन्तं परदारभाषणं
नरं भयाक्लीवमलं सुनीष्टरम् ॥ ३०॥

षष्थे स्थितः शत्रुगणैः पराजितं
नरं प्रसूतेऽधमकर्मसेवकम् ।
मायासमेतं मलिनं मलील्लुचं
च्युतं स्वधर्माद्गतसत्त्वमातुरम् ॥ ३१॥

श्रिया विहीनं विकृतं गतत्रपं
परान्नवस्त्रार्थसमीडकं सदा ।
करोति भानुः खलु सप्तमस्थितः
प्रपंचशीलं कुबलं सुनिष्ठरम् ॥ ३२॥

स्थानेऽष्टमे तीक्ष्णमयुखमाली

नरं विधत्ते बहुपापचेष्टम् ।
इष्टैर्वियुक्तं परदाररक्तं
पापात्मकं दुःखयुक्तं करोति ॥ ३३॥

इति रवेरष्टकवर्गफलम् ॥

रेखाथितोऽब्जे हिमरश्मिमाली
स्थाने विधत्ते सुभगं मनुष्यम् ।
प्रियं नृपाणां गुरुविप्रभक्तं
तीर्थाश्रयं सर्वजनोपसेव्यम् ॥ ३४॥

हस्त्यश्वयानैः सहितं द्वितीये
वैडुर्यमुक्तामणिभिस्तथैव ।
नरं सुसौख्यैः सहितं प्रगल्भं
प्रशान्तचिन्तं प्रणयान्वितं च ॥ ३५॥

चन्द्रस्तृतीये कुरुते सनाथं
नरं विनीतं बहुधर्मभाजम् ।
श्रिया युतं सर्वगुणोपपन्नं
धत्ते सदा बन्धुजनस्य पूज्यम् ॥ ३६॥

स्थाने चतुर्थे प्रकरोति मान्यं
नरं प्रसिद्धं विविधार्थयुक्तम् ।
तडागकूपाश्रयरक्तचिन्तं
महामनुष्यं सुतसौख्ययुक्तम् ॥ ३७॥

विद्याविनीतं सुविवेकयुक्तं
नरं प्रसूते बहुभागभाजम् ।
क्षपाधिनाथः खलु पंचमस्थः
प्रियातिथिं सर्वसहं सुविज्ञम् ॥ ३८॥

षष्ठे सुरूपं सुभगं मनोज्ञं
करोति चन्द्रः सुतदारयुक्तम् ।
धमाश्रयं शास्त्ररतं विनीतं
नरेन्द्रपूज्यं बहुमानभाजम् ॥ ३९॥

करोति चन्द्रः खलु सप्तमस्थः

प्रभासमेतं सचिवं सुशीलम् ।
व्रतोपवासादिरतं विधिज्ञं
मनोज्ञनारिदयितं सदैव ॥ ४० ॥

स्थानेऽष्टमे सौख्यहिरण्ययुक्तं
विद्यान्वितं सत्यपरं प्रगल्भम् ।
करोति चन्द्रोऽपतितं मनुष्यं
प्रियातिथिं ब्राह्मणवल्लभं च ॥ ४१ ॥

स्थानेऽघ्यके विन्दुगतः शशाङ्कः
सरोगदेहं कुरुते मनुष्यम् ।
पपानुरक्तं स्वजनैर्विमुक्तं
दीमं कृशं सत्यविहीनमेव ॥ ४२ ॥

करोति चन्द्रो नियतं द्वितीये
नरं कृतघ्नं सुकृतं सुदीनम् ।
अभूतश्रत्रुं प्रभया विहीनं
विवर्जितं बन्धुजनेन नित्यम् ॥ ४३ ॥

सांपीडितं भूपतिना सदैव
महाव्ययैः संयुतमुग्ररोगम् ।
कफानिलाभ्यां परिपीडितं च
चन्द्रस्तृतीये कुरुते मनुष्यम् ॥ ४४ ॥

लुसङ्गतं सत्यविहीनमेव
सौख्येन हीनं बहुरोगयुक्तम् ।
सुदुर्भगं पानरतं सदैव
चन्द्रचतुर्थे कुरुते मनुष्यम् ॥ ४५ ॥

प्रणष्टशीलं प्रचुरारिपक्षं
निशाधिनाथः खलु पंचमे च ।
करोति दीनं व्यय्सनैः समेतं
विवर्जितं भूपतिमानदानैः ॥ ४६ ॥

विदेशसेवाविरतं कृतघ्नं
षष्ठेऽरिवर्गैर्विजितं वृतान्तम् ।
नित्यं मनुष्यं नृपपीडितं च

कलत्रयानादिभिर्विप्रमुक्तम् ॥ ४७॥

स्यात् सप्तमे वैरमनल्पमुग्रं
चन्द्रे रुजं भूपमलिम्लुचोत्थम् ।
रोगं नराणां जठरे प्रभूतं
धनस्य नाशं प्रियविप्रयोगम् ॥ ४८॥

चन्द्रोऽष्टमेऽनिष्तफलं विधत्ते
शोकं धनार्तिं विविधं च दुःखम् ।
शीलच्युतं वासनवित्तनाशं
महाभयं दैन्यमनर्थमुग्रम् ॥ ४९॥

इति चन्द्राष्टकवर्गफलम् ॥

रेखास्थितोऽद्ये क्षितिवित्तलाभं
करोति भौमः पशुवृद्धिमेव ।
सौख्यं च भोगं विविधाश्च पूजा
महाजनोत्थं सततं सखानि ॥ ५०॥

आरोग्यतां ..........
मनोविकाशं प्रियतां च लोके ।
समुन्नतिं शत्रुविनाशमेव
करोति भौमो नियतं द्वितीये ॥ ५१॥

खरोष्ट्रयानानि पृथग्विधानि
नृणां विधत्ते क्षितिजस्तृतीये ।
विभूतिप्रभ्युन्नतिमिष्टलाभं
भूपप्रषादं विविधं च नित्यम् ॥ ५२॥

भौमश्चतुर्थे कुरुते प्रतापं
सौभाग्यसौख्याभ्युदय नितान्तम् ।
प्रियातिथित्वं सुरविप्रभक्तिं
नरेन्द्रमानं विविधं च लाभम् ॥ ५३॥

सुतीर्थलाभं खलु पंचमस्थः
क्षोणीसुतो यच्छति मानवानाम् ।
हिरण्यलाभं बहुमानसौख्यं

व्याधेर्विनाशं खलु उन्नतिं च ॥ ५४॥

षष्ठेऽरिनाशं कुरुते महीजः
समागमं बन्धुजनेन नित्यम् ।
वस्त्राणि शय्यासनभाजनानि
धर्मार्थसिद्धिं सततं नराणाम् ॥ ५५॥

क्षोणिसुतो यच्छति सप्तमस्थो
विश्ज्ञानविद्यागममिष्टलाभम् ।
शय्यासनाच्छादनभोजनानि
रतोपलब्धिं जगतीसुलाभम् ॥ ५६ ॥

भौमोऽष्टमे भूतिमथोन्नतिं च
नृणां विधत्ते महिमामनन्ताम् ।
वाणिज्यलाभं कृषिकर्मसिद्धिं
प्रियाप्तिमत्युज्ञतिमेव पुंसाम् ॥ ५७॥

बिन्धुस्थितो भूतनयो यदाद्ये
स्थाने दशां यच्छति मानवानाम् ।
तदार्थहानिं गदपृष्ठरोगान्
मतेर्विनाशं कुजनेन सौख्यम् ॥ ५८॥

शिरोर्तिदाहं ज्वरतापमुग्रं
प्रमोषणं चौरकृतं सदैव ।
प्रियाव्योगं मतिमित्रनाशं
भौमो द्वितीये कुरुते नराणाम् ॥ ५९॥

भौमस्तृतीये विनयार्थलौल्यं
धत्ते नराणां च तथापनादम् ।
कुबुद्धिभिः सङ्गमुग्रवैरं
पराजयं प्राणभृतां सदैव ॥ ६०॥

विवादवैराणि पृ..........म्विधानि
भौमचतुर्थे कुरुते नराणाम् ।
द्यूतं च वेश्माव्यसनं महान्तं
पराजयं साध्वसमेसं हानिम् ॥ ६१॥

असौख्यमोजः क्षयवित्तनाशं
पुत्रार्थहानिं सुतरां वियोगम् ।
करोति भौमः खलु पंचमस्थः
प्रतापहानिं सततं नराणाम् ॥ ६२॥

चतुष्पदव्यालसरीसृपोत्थं
भयं विधत्ते क्षितिजो नराणाम् ।
सदाविधानं खलु षष्ठसंस्थो
नरेन्द्रपीडां खलसङ्गमं च ॥ ६३॥

व्ययं विरागं भयमिष्टवैरं
भौमो विधत्ते खलु सप्तमस्थः ।
जिह्वाक्षिरोगोद्भवमेव दुःखं
सदा नराणां विषयप्रलौल्यम् ॥ ६४॥

पराभवं मृत्युसमांश्च रोगान्
कलत्रहानिं परवंचनानि ।
भौमोऽष्टमस्थः कुरुते नराणां
शास्त्राभिघातं परतः स्वतो वा ॥ ६५॥

इति भौमाष्टकवर्गफलम् ॥

रेखास्थितः सोमसुतो यदाद्ये
स्थाने तदा शीलधनं विधत्ते ।
विद्याविवेकादिभिः सम्प्रयुक्तं
प्रभूतमित्रं विगतारिपक्षम् ॥ ६६॥

स्थानस्थितं देवगुरुप्रसक्तं
विज्ञानशीलं बहुखानपानम् ।
स्थाने द्वितीये शशिजो विधत्ते
नरं सुरूपं सुभगं सुकान्तम् ॥ ६७॥

तृतीयगः सोमसुतः करोति
प्रसन्नवाव्यं नृपलोकपूज्यम् ।
नरं विधिज्ञं सुभगं मनोज्ञं
हतारिपक्षं बहुधर्मभाजम् ॥ ६८॥

बुधश्चतुर्थे कुरुते सुरूपं
प्रियातिथिं बन्धुजनस्य मान्यम् ।
मेधाविनं शास्त्ररतिं विधिज्ञं
व्रतोपासादिरतं सदैव ॥ ६९॥

करोति सौम्यः खलु पंचमस्थो
नरं नितान्तं नृपतेरभीष्टम् ।
आरामविप्रादिविहारभाजं
चिन्तान्वितं भक्तिपरं द्विजानाम् ॥ ७०॥

षष्ठेऽरिनाशं प्रकरोति सौम्यो
नृणां पुरग्रामकृतं च लाभम् ।
देशाधिपत्यं प्रचुरान्नपानं
यशःप्रतापं विजयं सदैव ॥ ७१॥

कलत्रलाभं रतिभोगसौख्यं
कलत्रसंस्थः प्रकरोति सौम्यः ।
तीर्थाश्रयं सौख्यसमृद्धियुक्तं
प्रसन्नमूर्तिं सततं सुशीलम् ॥ ७२॥

चतुष्पदाच्छादनविनयुक्तं
नरं प्रसूते शशिजोऽष्टमस्थः ।
कलत्रपुत्रोद्भवसौख्ययुक्तं
सर्वत्र पूज्यं महिमासमेतम् ॥ ७३॥

विन्दुस्थितः सोमसुतोऽतिपापं
करोति मर्त्यं प्रथमे खलं च ।
मामान्वितं बान्धवविप्रयुक्तं
सदा कुशीलं विनयेन हीनम् ॥ ७४॥

प्रभूतदुःखं सुजनैर्विहीनं
पराभिभूतं कठिनं कृतघ्नम् ।
द्वितीयसंस्थो हिनरश्मिपुत्रो
नरं प्रसूते बहुपापयुक्तम् ॥ ७५॥

तृतीयगः पुत्रकलत्रनाशं
करोति सौम्यः सततं कुचैलम् ।

तेजोविहीनं मलदग्धदेहं
सम्पीडितं भूपतिना सदैव ॥ ७६॥

चतुर्थगः शीतकरस्य पुत्रः
प्रभूतदुःखं कुरुते मनुष्यम् ।
शीलेन हीनं विनयेन हीनं
सत्त्वात्मिकं चैव विवर्जितं च ॥ ७७॥

नष्टात्मजं नष्टधनं कुचैलं
रोगाभिभूतं परतर्ककं च ।
परैर्जितं देवगुरुप्रमुक्तं
करोति सौम्यः खलु पंचमस्थः ॥ ७८॥

षष्ठस्थितः शीतकरस्य पुत्रो
नरं प्रसूते धनवर्जितं च ।
पराजितं शत्रुजनेन नित्यं
विद्याविहीनं विनयेन मुक्तम् ॥ ७९॥

सौम्यो नरं सप्तमगो विधत्ते
भोगेन हीनं परदाररक्तम् ।
जनापवादेन युतं सुदीनं
कुबुद्धिभाजं सुभयं सदैव ॥ ८०॥

द्यूतप्रसक्तं गणिकासु रक्तं
रजोधिकं सत्यधनेन हीनम् ।
सौम्योऽष्टमस्थः सभयं विहीनं
करोति मर्त्यं सततं नृशंसम् ॥ ८१॥

इति बुधाष्टकवर्गफलम् ॥

रेखागतो देवगुरुः प्रसूते
नरं विदग्धं विनयोपयुक्तम् ।
आद्ये महाबुद्धिधनान्वितं च
धर्मध्वजं ब्राह्मणवल्लभं च ॥ ८२॥

द्वितीयगः सौम्ययुतं प्रसूते
नरं सुरेज्यः सुभगं मनोज्ञम् ।

हस्त्यग्वयानादिधिया समेतं
नरेन्द्रपूज्यं प्रथितं नृलोके ॥ ८३॥

तृतीयसंस्थः कुरुते प्रधानं
सुरेज्यमन्त्री बहुपुत्रपौत्रम् ।
दयान्वितं जन्तुहितेषु युक्तं
कुलप्रधानं सततं सुशीलम् ॥ ८४॥

हिरण्यवित्तार्थसुबुद्धियुक्तं
करोति मर्त्यं त्रिदशेन्द्रमन्त्री ।
चतुर्थसंस्थश्चतुरं धनाढ्यं
विवेकिनं बान्धवसंमतं च ॥ ८५॥

करोति जीवः खलु पंचमस्थो
नरं नितान्तं नृपतेरभीष्टम् ।
पुत्रान्वितं प्रितिकरं नराणां
सदा सुशीलं बहुधर्मयुक्तम् ॥ ८६॥

हतारिपक्षं नियतं प्रसूते
नरं सुरेज्यः खलु षष्ठसंस्थः ।
हृष्टं सुपुष्टं प्रणतं गुरूणां
प्रशान्तवैरं प्रथितं प्रियं च ॥ ८७॥

अभीष्टनारिरतसम्प्रहृष्टं
करोति मर्त्यं सततं सुरेज्यः ।
श्रियान्वितं देवगुरुप्रसक्तं
सुभाशितज्ञं सुजनैः समेतम् ॥ ८८॥

जीवोऽष्टमस्थः कुरुते विदग्धं
प्रियातिथिं सर्वकलाउ दक्षम् ।
नरं नृपेज्यं बहुशास्त्रलुब्धं
पराक्रमप्राणसमन्वितं च ॥ ८९॥

बिन्दुस्थितो देवगुरुः प्रसूते
नरं नृशंसं बहुदुःखयुक्तम् ।
लुब्धं कृतघ्नं मलिनस्वभावं
विहीनसत्त्वं बहुसाहसं च ॥ ९०॥

द्वितीयगो भूमिमतस्करोत्यं
भ्यं सुरेज्यः कुरुते नराणाम् ।
नृशंसतां रोगमनिष्टसंस्थं
प्रभूतदुःखं दयितावधं च ॥ ९१ ॥

तृतीयसंस्थे त्रिदशेशपूज्ये
विहीनवित्तः सरुजो मनुष्यः ।
भवेत् कुमित्रः परदाररक्तो
दौर्भाग्ययुक्तो ह्यलसः कृतघ्नः ॥ ९२ ॥

चतुर्थगो देवगुरुः प्रसूते
विहीनवित्तं बहुशात्रुगम्यम् ।
विचर्चिकाद्यैः परिपीडितं च
नरं सुमायं कुदिलं खलं च ॥ ९३ ॥

पामाज्वरार्तं पर्दाररक्तं
नरं प्रसूते सुरराजपूज्यः ।
प्रभूतशोकं सततं सुपापं
चौरं महाकष्टसमन्वितं च ॥ ९४ ॥

षष्ठे सुरेज्यः कुरुतेऽक्षिरोगैः
सम्पीडितं ह्लेच्छसमानरूपम् ।
प्रपंचशीलं सुतदारहीनं
धर्मक्रियाहीनमनन्तशोकम् ॥ ९५ ॥

करोति जीवः खलु सप्त्मस्थो
नरं कफादिप्रचुरं सदैव ।
हिक्काज्वरार्तिं पृथुमानहीनं
दीनं जनैर्निन्दितमल्पसौख्यम् ॥ ९६ ॥

स्थानेऽष्टमे देवगुरुः प्रसूते
सदातिगर्वं कुटिलं मनुष्यम् ।
द्वेष्यं नृपाणां स्वकुलस्य मध्ये
गतप्रतापं विकृतं सदैव ॥ ९७ ॥

इति जीवाष्टकर्गफलम् ॥

रेखाश्रितो दैत्यगुरुः प्रसूते
नरं मनोज्ञं सुभगं सुशीलम् ।
जितेन्द्रियं दानपरं मनोग्र्यं
धर्मानुरक्तं प्रचुरान्नपानम् ॥ ९८॥

द्वितीयगः काव्यसुतः प्रसूते
नरं विधिज्ञं धनिकं च ।
स्वधर्मशीलं विनयेन युक्तं
प्रभासमेतं जनवल्लभं च ॥ ९९॥

तृतीयसंस्थो बहुभूषणाढ्यं
नरं प्रसूते सततं प्रगल्भम् ।
मेधाविनं धर्मपरं विनीतं
देवद्विजानामनुवल्लभं च ॥ १००॥

शुक्रचतुर्थे कुरुते धनाढ्यं
सद्भोजनाच्छादनपानयुक्तम् ।
वैडूर्यमुक्ताफलरत्नलाभैः
संतुष्टचिन्तं सततं मनुष्यम् ॥ १०१॥

सुतीर्थयानादिकपुत्रलाभै-
र्युक्तं नरं दैत्यगुरुर्विधत्ते ।
चतुष्पदाढ्यं खलु पंचमस्थः
प्रियं नृलोके परमं प्रधानम् ॥ १०२॥

शुक्रस्तु षष्ठे कुरुते मनुष्यं
विद्यासु निष्ठं बहुमन्त्रभाजम् ।
स्त्रीवित्तलाभः सहितं सुरूपं
विपक्षणं सर्वफलासु दक्षम् ॥ १०३॥

शुक्रो विधत्ते खलु सप्तमस्थो
नरं निप्तान्तं सुरतप्रगल्भम् ।
सकुङ्कुमाच्छादनभोगभाजं
नरेन्द्रपूजासहितं सदैव ॥ १०४॥

स्थानेऽष्टमे दैत्यगुरुः प्रसूते

नरं नितान्तं सुनयेन युक्तम् ।
प्रभासमेतं बहुकीर्तिभाजं
सुकर्मिणं धर्मसमन्वितं च ॥ १०५॥

विन्दुस्थितो दैत्यगुरुः प्रसूते
नरं सुपापं बहुरोगयुक्तम् ।
नृपाभिभूतं सुतवित्तहीनं
विवर्जितं बान्धवसज्जनैश्च ॥ १०६॥

शुक्रो द्वितीये सरुजं विधत्ते
प्रतापहीनं बहुपापयुक्तम् ।
सदा विरक्तं स्वकुतुम्बवर्गे
शोकाभिभूतं रतिलालसं च ॥ १०७॥

तृतीयसंस्थः कुरुते नृशंसं
शुक्रः सदा रोगविथर्चिकैश्च ।
नराभिभूतं अततं कुचैलं
ज्वरार्दितं मानधनेन हीनम् ॥ १०८॥

चतुर्थगः शोकयुतं प्रसूते
नरं महाव्याधियुतं दरिद्रम् ।
चतुष्पदाच्छादनवर्जितं च
प्रेष्यं खलं पार्थिवमानहीनम् ॥ १०९॥

करोति शुक्रः खलु पंचमस्थः
सदा दरिद्रं विकृतं मनुष्यम् ।
सुतार्थहीनं व्यसनैः समेतं
कुमित्रसङ्गेन युतं नितान्तम् ॥ ११०॥

षष्ठे सितः सर्वजनाभिभूतं
नरं प्रसूते प्रणयेन हीनम् ।
विवर्जितं सत्यसुखेन नित्यं
विदेशरक्तं परतर्ककं च ॥ १११॥

करोति शुक्रः खलु सप्तमस्थो
वातादिदोषैः सहितं मनुष्यम् ।
नृशंसचेष्टं व्यसनाभिभूतं

सदा कृतघ्नं मतिवर्जितं च ॥ ११२॥

शुक्रोऽष्टमस्यः कुरुते विशीलं
नरं महाव्याधियुतं कृतघ्नम् ।
नित्यं विहीनं बहुपापरक्तं
चिन्तान्वितं वैरयुतं सदैव ॥ ११३॥

इति शुक्राष्टकवर्गफलम् ॥

रेखास्थितः सूर्यसुतः प्रसूते
स्थिरस्वभावं सुभगं मनुष्यम् ।
प्रियान्वितं सर्वजनैः प्रधानं
विनीतवेषाभरणं सदैव ॥ ११४॥

द्वितीयसंस्थो रविजः प्रसूते
नरं नितान्तं बहुमानभाजम् ।
पराक्रमोत्साहधनेन युक्तं
तीर्थानुरक्तं लरयातनां च ॥ ११५॥

सौरस्तृतीयः कुरुते प्रधानं
नरं सुविद्यागमशास्त्रलुब्धम् ।
खरोष्ट्रलोहाढ्यमनल्पपुत्रं
नरं सदा शान्तमतिप्रभवम् ॥ ११६॥

चतुर्थगः सूर्यसुतः प्रसूत
नरं सुताढ्यं बहुखानपानम् ।
स्रग्गन्धभूपादिसुभोगभाजं
प्रभूतसख्यर्चवराश्वयुक्तम् ॥ ११७॥

करोति मन्दः खलु पंचमस्थो
नरं कुलीनं सुखिनं च नित्यम् ।
श्रिया समेतं विगतारिपक्षं
नृपाश्रितं श्रीदयितं सदैव ॥ ११८॥

षष्ठेऽर्कजः शीलधनं प्रसूते
नरं विधिज्ञं सुरविप्रयुक्तम् ।
पश्चात् प्रतिज्ञं कनकार्थलाभं

महाप्रभावं नरनाथपूज्यम् ॥ ११९॥

शनैश्चरः सप्तमगो विधत्ते
नरं धनाढ्यं प्रमदाप्रधानम् ।
विचक्षणं कीर्तिकरं मनोज्ञं
कलासु दक्षं प्रथितं नृलोके ॥ १२०॥

स्थितेऽष्टमे सूर्यसुतः प्रसूते
विचित्रमाल्याभरणं मनुष्यम् ।
हिरण्य..........
विद्याविनीतं द्विजदेवभक्तम् ॥ १२१॥

विन्दुस्थितः सूर्यसुतश्च सूते
वृथाश्रमं पापरतं मनुष्यम् ।
स्वबान्धवैस्त्यक्तमनल्पदुःखं
दीनं नृशंसं नृपपीडितं च ॥ १२२॥

द्वितीयसंस्थः कुरुतेऽर्कपुत्रः
पापात्मकं पापसुखं मनुष्यम् ।
कुक्षिस्यरोगैः परिपीडिताङ्गं
चलस्वभावं सुमहाकर्दयम् ॥ १२३॥

तृतीयसंस्थोऽर्कसुतः प्रसूते
नरं नृशंसं वितथक्रियं च ।
बह्वाशिनं सत्यविहीनमुग्रं
चौरं खलं सर्वजनाभिभूतम् ॥ १२४॥

चतुर्थगः सूर्यसुतः प्रसूते
.......... परूजं मनुष्यम् ।
विहीनवर्णं गतबुद्धिवीर्यं
प्रेष्यं खलं दीनमनर्थयुक्तम् ॥ १२५॥

सौरः सदा पंचमगः प्रसूते
विरक्तपौरं मलिनवभावम् ।
द्वेषां कुबुद्धिं हतकर्मसिद्धिं
क्षुद्रोगशस्त्रोपहतं नृशंसम् ॥ १२६॥

षष्ठे शनिः पापयुतं ..........
प्रभावहीनं परदाररक्तम् ।
गुदाक्षिरोगोपहतं सशोकं
प्रभूतवैरं प्रियसाध्वसं च ॥ १२७॥

सौरो विधत्ते खलु सप्तमस्थो
नरं क्रियाहीनमनल्पवैरम् ।
सदा सरोगं निजबन्धुहीनं
..........विवर्जितं च ॥ १२८॥

सौरोऽष्टमस्थः कुरुते दरिद्रं
नरं सरोगं बहुनीचरक्तम् ।
पित्तोद्भवैः पीडितमुग्ररोगं
विदेशभाजं परतर्ककं च ॥ १२९॥

इति शनेरष्टकवर्गफलं
इति श्रीवृद्धयवनेऽष्ढकवर्गफलानि ॥

---

आध्याय ०९
सूर्यदर्शनचारफलाध्यायः
मेषं गतोऽर्कः शशिना च दृष्टः
करोति मर्त्यं सुजनस्वभावम् ।
प्रसजमूर्तिं प्रचुराङ्गपानं
नरेन्द्रपूज्यं विगतारिपक्षम् ॥ १॥

भौमेन दृष्टो रविरेव मेषे
नरं विद्धते गजवजिभाजम् ।
प्रियातिथिं देवगुरुप्रसक्तं
प्रतापिनं ब्रह्मणसंमतं च ॥ २॥

यदा रविः सोमसुतेन दृष्टो
मेषे तदा सौख्यधनेन युक्तम् ।
करोति मर्त्यं बहुरोगभाजं
विनितवेषं नृपपुजितं च ॥ ३॥

जीवेन दृष्टः सुतसौख्यलाभं

करोति सूर्यः परमं च तेषम् ।
मेषे सदा भन्धुजनारुपूजो
विवेकविद्यागसत्यतां च ॥ ४॥

.......... ॥ ५॥

करोति पूंसां खलु मेषसंख्यो
.......... महाविधातं स्वसुतेन दृष्टः ॥ ६॥

वृषे गतो वासरपः प्रसूते
चन्द्रेण दृष्टः प्रचुरप्रतापम् ।
धर्मानुरागं परलोकलाभं
विद्वज्जनैः सङ्गममास्यदं च ॥ ७॥

सूर्यो वृषे भूमिसुतेन दृष्टः
पुंसां विधत्ते बहुमानहानिम् ।
उद्वेगमानं पशवित्तहानिं
कुमित्रसङ्ग विविधं च कामम् ॥ ८॥

सौम्येन दृष्टो वृषगः खरांशः
करोति मर्त्यं सुतंपः समेतम् ।
धर्मक्रियाराधनतत्मरं च
प्रियातिथिं पार्थिववल्लभं च ॥ ९॥

जिवेन दृष्तः प्रचुराचपानं
रविर्विद्धते प्रचुराश्च नाय.......... ।
सूर्यो वृषस्यः प्रकरोति पुंसां
हेमाम्बराश्वप्रभवं च लाभम् ॥ १०॥

गुणानुरागं परपक्षनाशं
हिरण्यमुक्तामणिवक्रलाभम् ।
सूर्यो वृषस्यः प्रदिदाति पुंसां
शुक्रेण दृष्टः प्रदिदाति वृद्धिम् ॥ ११॥

सौरेण दृष्टः प्रमदाविघातं
वित्तप्रणाशं गुदपादरोगम् ।
वृषस्थितो भास्कर एव धत्ते

हिंसाविघातं बहुधर्मवृद्धिम् ।१२॥

नृयुग्मसंख्यो दिनपो नराणां
चन्द्रेण दृष्टः सततं करोति ।
ज्वरप्रकोपं मुखगुह्यरोगं
विवादमायासु गुरुप्रकोपम् ॥ १३॥

सूर्यो नृयुग्मे मनुजस्य धत्ते
भौमेन दृष्तः खलतां सदैव ।
मतिप्रकाशं विभवं विवेकं
कलत्रपुत्रप्रभवं च सौख्यम् ॥ १४॥

नृयुग्मसंस्थोऽपि जयं विधत्ते
सौम्येन दृष्तो नृपतेः प्रियत्वम् ।
तथा नराणां बहुवित्तलाभं
नृपैः सह सङ्गमनं करोति ॥ १५॥

तृतियराशौ दिनपः प्रसूते
जीवेन दृष्तः प्रभुतां विचित्राम् ।
सन्मत्तमारोग्यकलत्रभाजं
सुसाधुना साधुजनेन सख्यम् ॥ १६॥

नृयुग्मसंस्थो विधृतं दिनेशः
शुक्रेण दृष्तः कुरुते मनुष्यम् ।
विद्यार्थभोगं प्रणयेन युक्तं
हितं सपक्षं द्विजदेवभक्तम् ॥ १७॥

मन्देन दृष्तः पुरुषं सुनीचं
गतप्रभावं सविता विधत्ते ।
नृयुग्मसंस्थोऽर्थदयाविहिनं
कृतघ्नमुग्रं परपक्षरक्तम् ॥ १८॥

कर्कस्थितो अर्कः शशिना च दृष्तो
हिमार्थभोगंप्रभवं विधत्ते ।
सौख्यं सुसौभाग्यंमथ प्रतापं
चन्द्रेण दृष्तः सुतरां गुरुत्वम् ॥ १९॥

भौमेन दृष्तो वदनाक्षिरोगं
करोति सूर्यः खलु कर्कटस्थः ।
प्रियावियोगं विनयार्थनाशं
विगर्हणं सूनुकृतं सदैव ॥ २०॥

बुधेन दृष्तः खलु कर्कटस्यः
सूर्यो विधत्ते नियतं मनुष्यम् ।
गतारिपक्षं विभवैः समेतं
प्रियातिथिं बान्धववल्लभं च ॥ २१॥

दृष्तः सुरेज्येन दिनाधिनाथो
नरं विधत्ते सुभगं मनोज्ञम् ।
मुख्यं प्रसिद्धिं सुतदारयुक्तं
विवेकिनं ब्रह्मणसंमतं च ॥ २२॥

विद्याप्रतापार्थधनैः समेतं
नरं विधत्ते भृगुजेन दृष्तः ।
कर्काश्रितो वासरपः प्रतापं
सदानुकूलं निजबान्धवानाम् ॥ २३॥

मन्देन दृष्तः सविता प्रसूते
नरं नितान्तं कलहप्रधानम् ।
आलस्यनिद्राक्षिरुजासमेतं
सदातिहृष्टं परतर्ककं च ॥ २४॥

सिंहस्थितो वासरपः प्रसूते
चन्द्रेण दृष्तः सुभगं मनुष्यम् ।
भूक्षेत्रवित्तप्रभया समेतं
सख्यं गुरुणां विनयेन युक्तम् ॥ २५॥

भौमेन दृष्तः खल सिंहसंस्थो
भानविधत्तेऽक्षिरुजा समेतम् ।
नरं विहिनं सुतमित्रदारैः
सदा कुचैलं विनयेन हीनम् ॥ २६॥

बुधेन दृष्टो दिनपः प्रसूते
सिंहाश्रितः सौम्यतरं मनुष्यम् ।

प्रियंवदं धर्मविधानदक्षं
स्वपक्षपूज्यं सुरकार्यदक्षम् ॥ २७॥

जीवेन दृष्टः सविता प्रसूते
नरं विदग्धं प्रचुरप्रतापम् ।
सिंहाश्रितः पुण्यपरं कृतज्ञं
विहीनपापं प्रणतारिपक्षम् ॥ २८॥

सिंहाश्रितो भार्गवजेन दृष्टः
सूर्यः प्रसूते स्वगृहं प्रयतः ।
..........श्चर्यबुद्धर्थविवेकयुक्तं
नरं प्रधानं प्रभया समेतम् ॥ २९॥

मन्देन दृष्टो बहुमन्दभाज
नरं प्रसूते दिनपः स्वराशौ ।
व्ययासुखक्लेशभयैः समेतं
दुष्टस्वभावं गतसौहृदं च ॥ ३०॥

कन्याश्रितो वासरपः प्रसूते
नरं सुरूपं सुभगं मनोज्ञम् ।
चन्द्रेण दृष्टो नृपमानभाजं
महाधनैः संयुतमुग्रलाभम् ॥ ३१॥

करोति भानुर्बहुरक्तभाजं
कन्याश्रितो धान्यधनेन युक्तम् ।
चन्द्रेण दृष्टो मणिमुत्ककाढ्यं
प्रियवदं मानधनैः सदैव ॥ ३१अ॥

हृद्रोगमामाज्वरपित्तवातैः
सम्पिडितं वासरपः प्रसूते ।
कन्याश्रितो भूमिसुतेन दृष्टो
नरं कुविद्यागमसंश्रितं च ॥ ३२॥

बुधेन दृष्टो दीनपच कन्ये
करोति शय्यासनवाहनाद्यम् ।
सदा सुमुख्यं सुभगं मनुष्यं
प्रीयागमं बन्धुविशारदं च ॥ ३३॥

दृष्टः सुरेज्यन रविः प्रसूते
कन्ये नरं धर्मपरं प्रधानम् ।
द्विजापुरक्तं विगतारिपक्षं
सुपूजितं भूमितले नरेन्द्रैः ॥ ३४॥

शुक्रेण दृष्टः सविता प्रसूते
प्रख्यातवीर्यं सुभगं मनुष्यम् ।
विवेकविद्यागमशास्त्रलब्धं
महाधनं शौर्यपरं सदैव ॥ ३५॥

सौरेण दृष्टः प्रकरोति भानुः
कन्याश्रितो रोगभयेन युक्तम् ।
विदेशभाजं परपक्षरक्तं
पौरं परुषं प्रभया विहीनम् ॥ ३६॥

सूर्यस्तुलास्थो हिमरश्मिदृष्टः
करोति जाड्यं बहुशोकयुक्तम् ।
निस्त्रिंशभावं धनलाब्धिनशं
नृणां तथा चौरविमोषणं च ॥ ३७॥

भौमेन दृष्टः सविता प्रसूते
रक्तानिलश्लेष्मजमेडरोगम् ।
भयं प्रवासं कलहं च वैरं
स्वधर्महीनं नीकृतं सदैव ॥ ३८॥

बुधेन दृष्टः सविता प्रसूते
तुलाश्रित्यो कामरतं मनुष्यम् ।
लज्जाविहीनं कुनृपप्रसक्तं
नीचानुरक्तं प्रियसाहसं च ॥ ३९॥

जीवेन दृष्टः प्रकरोति भानु-
र्नरं तुलास्यः प्रणयेन हीनम् ।
नीचाप्तमानं परधर्मरक्तं
सुगन्धयुक्तं नर्वर्जितं च ॥ ४०॥

शुक्रेण दृष्टः सविता प्रसूते

नरं नितान्तं गणिकासु रक्तम् ।
तुलाश्रितः सत्यधनं कुधर्मं
पाषण्डिनामिष्टमनिष्टमित्रम् ॥ ४१॥

सौरेण दृष्टः प्रभया विहीनं
नरं प्रसूते सविता तुलास्यः ।
कुचैलिनं बन्धवलोकयुक्तं
सुनिष्ठुरं नूनमनिष्टबुद्धिम् ॥ ४२॥

चन्द्रेण दृष्टः सवितालिसंस्थः
करोति नानविधयुक्तमेव ।
परं प्रगल्भं प्रभया समेतं
हतारिपक्षं गतसाध्वसं च ॥ ४३॥

भौमेन दृष्टोऽतिकठोरवाक्यं
रविर्विधत्तेऽलिगतो मनुष्यम् ।
धनैर्विमुक्तम् सततं कुशिलं
महभयैः सङ्गमनेन नित्यम् ॥ ४४॥

बुधेन दृष्टोऽष्टमरशिसंस्थो
रविर्विधत्ते सुभगं मनोज्ञम् ।
नरं नयज्ञं धनधान्यभाजं
संश्रामितं साधुजनेन नित्यम् ॥ ४५॥

जीवेन दृष्टोऽलिगतो द्युनाथः
करोति पण्यैर्विविधैः समेतम् ।
प्रियंवदं सर्वजनैः समेत-
मलोलुपं पूजितमन्यलोकैः ॥ ४६॥

सदा सुशिलं च सुमित्रभाजं
नानारवाढ्यं सुभगं सुरूपम् ।
करोति भानुः खलु वृंचिकस्यः
शुक्रेण दृष्टः प्रवरं मनुष्यम् ॥ ४७॥

सौरेण् दृष्टोऽष्टमगो विवस्वान्
पापानुरक्तं कुरुते मनुष्यम् ।
सदा विलोमं निजबन्धुवर्गै-

स्त्रासाधिकं निष्ठुतमोजसार्तम् ॥ ४८॥

चापाश्रितस्तीक्ष्णकरोऽतिसौर
चन्द्रेण दृष्टो जनयेन्मनुष्य
शास्त्रानुरक्तं प्रणतारिपक्षं
धनाधिकं ब्रह्मणसंमतं च ॥ ४९॥

विवर्णदेहं हतमानवर्गं
प्रशान्तवीर्यं विनयेन हीनम् ।
चापाश्रितो वासरपः प्रसूते
भौमेन दृष्टोऽतिखलं मनुष्यम् ॥ ५०॥

सौम्येन दृष्टः सुतसौख्ययुक्तं
भानुः प्रसूतो हयगो मनुष्यम् ।
प्रियातिथिं देवगुरुप्रसक्तं
नयाधिकं बन्धववल्लभं च ॥ ५१॥

स्ववर्गमुख्यं परवर्गमान्यं
पापैर्विमुक्तं पशुपुत्रलाभम् ।
भानुर्हयस्यः सुरपूज्यदृष्टो
धर्माधिकं संजेनयेन्मनुष्यम् ॥ ५२॥

शुक्रेण् दृष्टः सविता प्रसूते
हयाश्रितः सत्पभया समेतम् ।
नरं सुशीलं बहुरत्नभाजं
गुणानुरक्तं विभुतासमेतम् ॥ ५३॥

हयाश्रितो वासरपः प्रसूते
पापानुरक्तं च खलं मनुष्यम् ।
रोगातुरं पुण्यधनैर्व युक्तं
सुनिष्ठरं स्नेहविवर्जितं च ॥ ५४॥

मृगाश्रितो रात्रिकरेण दृष्टः
करोति भानुः सुभगं मनुष्यम् ।
दानानुरक्तं सुविशालरक्तं कीर्तिं
सुसम्प्रसक्तं विनयोपपन्नम् ॥ ५५॥

भौमेन दृष्टः समरोगभाजं
करोति सूर्यो मृगगः सदैव ।
प्रियाटनं पार्थिवचौरमुष्टं
दयाविहीनं विधनं खलं च ॥ ५६॥

बुधेन दृष्टः सविता प्रसूते
मृगाश्रितः प्राणयशः प्रगल्भम् ।
सौख्याधिकं धर्मपरं प्रधानं
गतारिवर्गं सुधनं मनोज्ञम् ॥ ५७॥

जीवेन दृष्टो दशमस्य एव
नरं प्रसूते दिनपः सुपक्षम् ।
रतानुकुलं हतपापवर्गं
विभूषितं पूण्यविलेपनाद्यैः ॥ ५८॥

शुक्रेण दृष्टः सविता प्रसूते
नरं विदग्धं मकराश्रितश्च ।
सदेश्वरं प्रानभृतां वरिष्ठं
विशं प्रियातत्मरधर्मरक्तम् ॥ ५९॥

विहीनवेषं गतपुत्रदारं
जनैर्विमुक्तं सततं कुचैलम् ।
भानुर्मृगस्थो जनयेन्मनुष्यं
विवर्जितं मनिचपैः सदैव ॥ ६०॥

कुंभं गतोऽर्कः शशिना च दृष्टो
नरं प्रसूते बहुलाभभाजम् ।
प्रियंवदं सत्यरतं सुशीलं
हतारिपक्षं प्रणषं द्विजानाम् ॥ ६१॥

भौमेन दृष्टः सविता प्रसूते
कुम्भाश्रितः पापरतं मनुष्यम् ।
दुष्टस्वभावं परवित्तलुब्धं
दीनं कृशं बुद्धिविवर्जितं च ॥ ६२॥

सूर्यो घटस्थः शशिजेन दृष्टः
करोति सौम्यं सुभगं मनुष्यम् ।

विर्योनदुःखं बहुशास्त्रदृष्टं
..........कीर्तिभाजम् ॥ ६३॥

सूर्यो घटस्थः प्रकरोति वृद्धिं
जीवेन दृष्टः प्रथितं मनुष्यम् ।
सदा मनोज्ञं गुणसाररक्तं
प्रभाविन दानपरं प्रधानम् ॥ ६४॥

शुक्रेण दृष्टः सविता प्रसूते
कुम्भाङ्कितः प्रीतिकरं मनुष्यम् ।
आरोग्यदेहं परुषार्थमु..........
विनीतवेषं बहुलाभभाजम् ॥ ६५॥

मन्देन दृष्टः प्रकरोति भानुः
कुम्भाङ्कितः क्लेशभवेन युक्तम् ।
जडस्वभावं कुटिलं कृतघ्नं
संत्यत्कशीलं भयविह्वलं च ॥ ६६॥

मीनाश्रितो वासरपः प्रसूते
चन्द्रेण दृष्टः प्रचुर्प्रभावम् ।
सुवर्णतम्रायसरौप्यभाजं
नतं द्विजानां सततं विधिज्ञम् ॥ ६७॥

भौमेन दृष्टः प्रकरोति भानु-
र्मीनाश्रितः क्लेशकदर्थिताङ्गम् ।
नरं सुरक्तं नृपतेरनिष्टं
लज्जाविहीनं सुनिराश्रयं च ॥ ६८॥

बुधेन दृष्टो दिनपः प्रसूते
मीनाश्रितः सत्यपरं मनुष्यम् ।
बुद्धा समेतं प्रियमीष्टधर्मं
प्रियातिथिं शौचसमन्वितं च ॥ ६९॥

सुरेज्यदृष्टो ह्यषराशिसंस्थो
भानुः प्रसूते बहुवित्तयुक्तम् ।
नरं विधत्ते विविधान्नपानं
तीर्थापुरक्तं वरवस्त्रलाभम् ॥ ७०॥

शुक्रेण दृष्टः सविता प्रसूते
मीनाङ्कितस्त्यागपरं मनुष्यम् ।
मानार्थशय्यासदानयुक्तं
दासानुकूलं प्रमदजनस्य ॥ ७१ ॥

उद्वेगशोकाकुलमिष्टपापं
मन्देन दृष्टः सविता विधत्ते
मीनाश्रितो वंचनचौररक्तं
सदातुरं मित्रविवर्जितं च ॥ ७२ ॥

इति श्रीवृद्धयवने सूर्यदर्शनचारफलानि ॥

---

आध्याय १०
चन्द्रदर्शचाराध्यायः
मेषे गतो रात्रिचरः प्रसूते
सूर्येण दृष्टः कथितप्रभावम् ।
नरं नितान्तं व्यसपैः समेतं
गतप्रभं भक्तिविवर्जितं च ॥ १ ॥

मेषाश्रितः शीतकरः प्रदृष्टो
भौमेन मर्त्यं सरुजं करोति ।
बहुप्रकोपं विनयेन हीनं
सदा दरिद्रं गतसौहृदं च ॥ २ ॥

बुधेन दृष्टः प्रकरोति चन्द्रो
नरं विनीतं सुरशीलभाजम् ।
मेषाश्रितो वाहनभोजनाद्यं
प्रियंवदं ब्रह्मणवल्लभं च ॥ ३ ॥

जीवेन दृष्टः खलु मेषसंस्थ-
चन्द्रः प्रसूते गुणकीर्तियुक्तम् ।
नयाधिकं धर्मपरं कृतज्ञं
दयान्वितं सत्ययुतं सदैव ॥ ४ ॥

मेषाश्रितो भार्गवदृष्टियुक्त-

चन्द्रः प्रसुते विधनं मनुष्यम् ।
हतारिरोगं विनयप्रयुक्तं
महाप्रभं पार्थिवसंमतं च ॥ ५॥

दृष्टः शशाङ्कोऽजगतोऽसितेन
पापं विधत्ते सहजं मनुष्यम् ।
विहीनवित्तं कलहश्रमार्तं
विवर्जितं साधुसमगमेन ॥ ६॥

वृषाश्रितो रात्रिकरः प्रगल्भं
नरं प्रसूते रवीणा च दृष्टः ।
मायाधिकं वित्तहरं प्रजाना-
मुग्रस्वभावं गतधर्मवृद्धिम् ॥ ७॥

चन्द्रो वृषस्थः क्षितिजेन दृष्टो
नरं सुवाते क्षतपीडितङ्गम् ।
व्ययाधिकं कण्डुरुजासमेतं
सुनिष्ठुरं पुण्यविवर्जितं च ॥ ८॥

सौम्येन दृष्टो वृषगः शशाङ्कः
करोति मर्त्यं नृपतुल्यभागम् ।
विद्यानुरक्तं प्रभया समेतं
युतं महाबन्दिगणैः सदैव ॥ ९॥

जीवेन दृष्टो हिमगुर्वृषस्थो
नरं प्रसूते द्विजदेवभक्तम् ।
सुवस्त्रशय्यासनभोजनाक्षैः
समन्वितं तस्य गुणप्रभावम् ॥ १०॥

गोसंश्रितो रात्रिकरः सुवाते
शुक्रेण दृष्टः सुभगं मनुष्यम् ।
यज्ञोद्यतं कूपतडागरक्त-
मुद्यानवापीकृतमानसं च ॥ ११॥

मन्देन दृष्टो गविगः शशाङ्को
नरं सुवाते व्यसनैरुपेतम् ।
गतप्रभावं बहुदैन्यभाजं

विवर्जितं पुत्रधनार्थदारैः ॥ १२॥

नृयुग्मगः शीतकरः प्रसूते
सूर्येण दृष्टो बहुमन्दवृद्धिम् ।
सर्पादिभिः पीडितमुग्ररोगै-
र्विचर्चिकाक्षैच तथा सदैव ॥ १३॥

दृष्टः शशाङ्को मिथुनाश्रितश्च
भौमेन भीतं जनयेन्मनुष्यम् ।
दीनं कृशं वातविकारयुक्तं
सदातिवृद्धिं नयवर्जितं च ॥ १४॥

सौम्येन दृष्टो मिथुने शशाङ्कः
करोति सौख्यं सुभगं मनुष्यम् ।
मनोचदेहं सुहृदा च युक्तं
कुलप्रधानं प्रणतं द्विजानाम् ॥ १५॥

जीवेन दृष्टो मिथुनस्थ एव
चन्द्रः प्रसूते विभवैः समेतम् ।
महाधनं सौर्यकृतं मनोज्ञं
शुचिं सदा धर्मसमन्वितं च ॥ १६॥

शुक्रेण दृष्टः प्रकरोति चन्द्र-
स्तृतीयराशौ गजवाजिभाजम् ।
नरं बहुस्त्रीरतिलब्धसौख्यं
महधनं पार्थिवमानजुष्टम् ॥ १७॥

सौरेण दृष्टोऽतिखलं सुवाते
चन्द्रो नृयुग्मस्थित एव मर्त्यम् ।
चौरावनीशैः परिपीडिताङ्गं
सवृद्धभावं विनयेन हीनम् ॥ १८॥

कर्काश्रितो रात्रिपतिः सुवाते
सूर्येण दृष्टोऽल्पधनं मनुष्यम् ।
तीव्रस्वभवं खलसङ्गरक्तं
धर्मार्थकामैः परिवर्जितं च ॥ १९॥

भौमेन दृष्टः प्रकरोति चन्द्रः
कर्काश्रितस्त्यागदयाविहीनम् ।
नितान्तदुष्टं परपुत्रहीनं
विवर्जितं धर्मपरैर्मनुष्यैः ॥ २०॥

बुधेन दृष्टः स्वगृहे शशाङ्को
नरं सुवातो तनयार्थयुक्तम् ।
विदग्धबुद्धिं बहुमित्रपूज्यं
श्रद्धान्वितं सत्यदयासमेतम् ॥ २१॥

दृष्टः सुरेज्येन निशाधिनाथ-
श्चतुर्थराशौ व्रतिनं विधत्ते ।
तीर्थानुरक्तं गतदुष्टभावं
सुधर्मिणं देवगुरुप्रसक्तम् ॥ २२॥

शुक्रेण दृष्टः प्रकरोति चन्द्र-
श्चतुर्थराशौ गृहभूमिभाजम् ।
सदानुरक्तं गुरुबान्धवानां
मनस्विनं शीलधनप्रगल्भम् ॥ २३॥

सौरेण दृष्टः प्रकरोति चन्द्रः
कर्काश्रितः पापमतिं मनुष्यम् ।
विहीनवित्तं परदाररक्तं
सदा कृतघ्नं भयसंयुतं च ॥ २४॥

सिंहाश्रितः शितकरः प्रसूते
सूर्येण दृष्टः प्रचुरं विदग्धं
सत्याश्रितं बन्धजनेन पूज्यं
सभूमिलभं गतरोगदुःखम् ॥ २५॥

भौमेन दृष्टः कुरुते शशाङ्कः
सिंहाश्रितः पापरतं मनुष्यम् ।
चानुरक्तं परदेशभाजं
महाव्ययं पार्थिवपीदितं च ॥ २६॥

बुधेन दृष्टः प्रकरोति चन्द्रः
सिंहस्थितः कृच्छ्रधनाप्तसौख्यम् ।

पुण्यभाजं कुकलत्रयुक्तं
युक्तंविचित्रैः पशुपुत्रवित्तैः ॥ २७॥

जीवेन दृष्टः प्रभुतासमेतं
सिंहाश्रितः शीतकरो विधत्ते
नरं महाधर्मपरं प्रधानं
प्रज्ञान्वितं मान्यतमं प्रियं च ॥ २८॥

शुक्रेण दृष्टः सुभगं मनोज्ञं
हरौ स्थितः शितकरो विधत्ते ।
यंवदं धर्मकथानुरक्तं
हितं द्विजानां नृपपूजिताङ्गम् ॥ २९॥

मन्देन दृष्टो बहुमन्दयुक्तं
चन्द्रो विधत्ते खलु सिंहसंस्थः ।
शिरोर्तिदाहज्वरकामलाद्यैः
सम्पीडिताङ्गं मनुजं विधत्ते ॥ ३०॥

कन्याश्रितः शितकरोऽर्कदृष्टो
नरं सुवाते तनयेन युक्तम् ।
श्रद्धापरं सात्त्विकमिष्टधर्मं
तीर्थानुरक्तं भयवर्जितं च ॥ ३१॥

भौमेन दृष्टः परदाररक्तं
कन्याश्रितः शीतकरः करोति ।
क्षतार्दिताङ्गं गुरुरोगयुक्तं
महाभयैः संयुतमिष्टपापम् ॥ ३२॥

बुधेन दृष्टः खलु शीतरश्मिः
कन्याश्रितः सीतसहितं मनुष्यम् ।
करोति भूपालसुलब्धमानं
जनप्रियं पुण्यकथानुरक्तम् ॥ ३३॥

सदा सुशीलं द्विजदेवभक्तं
भूपलमान्यं द्विजबन्धुपूज्यम् ।
कन्याश्रितो रात्रिपतिः सुवाते
जीवेन दृष्टः प्रचुरप्रतापम् ॥ ३४॥

शुक्रेण दृष्टः सततं विधित्रं
चन्द्रः प्रसूते खलु षष्ठराशौ ।
सद्भूमिवस्त्राचवरौषधीनां
संसेवकं पीनतनुं मदार्तम् ॥ ३५॥

सौरेण दृष्टः विधनं मनुष्यं
नयेन हीनं परदाररक्तम् ।
सदालसं मन्दगतिं विधत्ते
नीचाश्रितं पापरतं सदैव ॥ ३६॥

तुलाश्रितो रात्रिपतिर्यदा स्यात्
सूर्येण दृष्टः प्रकरोतिं मर्त्यम् ।
कीर्त्याधिकं वित्तयुतं कृतज्ञं
शौर्यस्वभावं सततं सुखाढ्यम् ॥ ३७॥

भौमेन दृष्टः हिमगुः प्रसूते
तुलाश्रितः पापरतं कुशीलम् ।
लज्जावि हीनं व्यसनैरूपेतं
मित्रैर्विहीनं विकृतस्वभावम् ॥ ३८॥

सौम्येन दृष्टः सुभगं प्रसूते
तुलाश्रितः शितकरो मनुष्यम् ।
सत्यानुरक्तं पशुपुत्रयुक्तं
नाना गमैर्वधितबुद्धिवृद्धिम् ॥ ३९॥

देवेज्यदृष्टो हिमगुः प्रसूते
तुलाश्रितः सत्यपरं मनुष्यम् ।
गुणानुरक्तं प्रचुरान्नपानं
मन्दं शुशीलं प्रमदाप्रियं च ॥ ४०॥

शुक्रेण दृष्टः प्रकरोति चन्द्रो
नरं विवेकागमशास्त्रलुब्धम् ।
हस्त्यश्ववस्त्रान्नसुभोजनानि
नृपप्रियं बन्धवपूजितं च ॥ ४१॥

सौरेण दृष्टो हिमगुः प्रसूते

तुलाश्रितो धर्मदयाविहिनम् ।
कुमित्ररक्तं बहुशोकभाजं
विरक्तपौरं परतकर्कं च ॥ ४२॥

चन्द्रोऽलिसंस्थो मनुजं प्रसूते
सूर्येण दृष्टो प्रभया विहीनम् ।
नरं निकृष्टान्गयमुग्रकर्मं
प्रतापहीनं विकृतं सदैव ॥ ४३॥

चन्द्रोऽलिसंस्थः क्षितिजेन दृष्टो
नरं सुवाते कृतिकीर्तिदेहम् ।
नित्यं कृतघ्नं भयशोकतप्तं
व्ययाधिकं कामपरं कुचैलम् ॥ ४४॥

करोति चन्द्रोऽलिगतो मनुष्यं
सौम्येन दृष्टः सुभगं मनोज्ञम् ।
गतारिपक्षं द्विजदेवभक्तं
प्रशान्तचिन्तम् व्यसनेन हीनम् ॥ ४५॥

जीवेन दृष्टोऽलिगतोऽतिधर्मं
नरं प्रसूते हिमगुः प्रसिद्धम् ।
सदा सुशिलं नृपतेरभीष्टं
प्रियं नरं दानरतं सदैव ॥ ४६॥

शुक्रेण दृष्टः खलु शीतरश्मि-
र्नरं सुवातेऽतिगतो धनाढ्यम् ।
विमुक्तरोगं गतपौरशोकं
हीनं सदा बन्धुजनस्य लोके ॥ ४७॥

सौरेण दृष्टः खलु शीतरश्मि-
र्नरं प्रसूते गतमानलाभम् ।
चिन्ताधिकं बुद्धिविवेकहीनं
कृतघ्नकर्माणमुरुप्रकोपम् ॥ ४८॥

चापाश्रितो शीतकरः प्रसूते
सूर्येण दृष्टः प्रचुरप्रकोपम् ।
विहीनलज्जं नृपमानहीनं

विवर्जितं साधुजनैः सदैव ॥ ४९॥

चापाश्रितः शितकरो विधत्ते
भौमेन दृष्टः कलहेन युक्तम् ।
नरं द्विजद्वेषपरं कुधर्मं
त्यक्तं स्वधर्मेण महाक्षिरोगम् ॥ ५०॥

हये शशी लब्धधनं प्रसूते
बुधेन दृष्टः प्रणतारिपक्षम् ।
प्रियंवदं सर्वजनप्रधानं
सुसंयुतं वेदविशारदं च ॥ ५१॥

जीवेन दृष्टो हयगः शशाङ्को
जितेन्द्रियं सत्यपरं प्रसूते ।
वेश्यानुरक्तं बहुभृत्यबर्गं
सुसंयुतं देवगुरुर्जितानाम् ॥ ५२॥

शुक्रेण दृष्टा हयगः शशाङ्को
नरं विधत्ते बहुवाजियुक्तम् ।
दानोद्यतं युक्तभयेन युक्तं
लाभो यथा सङ्गतमिष्टसत्यम् ॥ ५३॥

सौरेण दृष्टो हयगः शशाङ्कः
करोति रोगैर्विविधैः समेतम् ।
नरं प्रभूतागममव्ययाढ्यं
कफप्रयुक्तं विविधप्रियं च ॥ ५४॥

मृगाश्रितः शितकरः प्रसूते
सूर्येण दृष्टो गतमानवित्तम् ।
प्रभाविहीनं परपाकरक्तं
प्रभावदृष्टं हतबन्धवं च ॥ ५५॥

भौमेन दृष्टो मकरे शशाङ्कि
नरं विधत्ते प्रणयेन हीनम् ।
..........आशं परपक्षरक्तं
दुष्टस्वभावं हतबान्धवं च ॥ ५६॥

पित्तानिलैः पीडितमुग्ररोगं
सदा रतं नीचकथाप्रसङ्गैः ।
बुधेन दृष्टो बहुबुद्धियुक्तं
नरं सुवते मृगगः शशाङ्कः ॥ ५७॥

सुरूपदेहं सुभगं विनीतं
निवेशितं साधुजनेन नित्यम् ।
जीवेन दृष्टः खलु शीतरश्मि-
र्मृगाश्रितो धर्मपरं मनुष्यम् ॥ ५८॥

करोति रत्नागमलब्धतुष्टिं
तीर्थाश्रयं शत्रुजनैः समेतम् ।
शुक्रेण दृष्टो मकरे शशाङ्कः
करोति पुण्यैर्विविधैः समेतम् ॥ ५९॥

जीतारिपक्षं निबन्धुमान्यं
कुलप्रधानं सुभगं सदैव ।
सौरेण दृष्टो मकरे शशाङ्कः
करोति मर्त्यं बहुदोषभाजम् ॥ ६०॥

विचर्चिकण्डवादीरुजासमेतं
सम्पीडितं कामलवातदोषैः ।
कुम्भे शशी वासरपेण दृष्टो
नरं प्रसूते नयनार्थभीतम् ॥ ६१॥

मुखाक्षिरोगप्रमखैर्विकारैः
सम्पीडितं पार्थिवतस्करैश्च ।
घटाश्रितः शितकरः प्रदृष्टो
भौमेन नित्यं कुरुते कृतघ्नम् ॥ ६२॥

क्रोधाधिकं वंचनकं परेषां
विशारदं सर्वकलसु दक्षम् ।
चन्द्रो घटस्थ स्वसुतेन दृष्टः
करोति मर्त्यं सुतदारभृत्यैः ॥ ६३॥

हितं विधत्ते द्विजदेवभक्तं
सदा सुशीलं बहुमानभाजम् ।

जीवेन दृष्टो घटगः शशाङ्कः
.......... ॥ ६४॥

शुक्रेण दृष्टो घटगः शशाङ्कः
करोति सर्वस्वधनैः समेतम् ।
नरेन्द्रसेवास रतं नयज्ञं
प्रशंसितं साधुजनेन नित्यम् ॥ ६५॥

गुल्मातिसाराप्रभवैश्च रोगैः
सम्पीडितः कर्णसमुद्भवैश्च ।
घटाश्रिते सूर्यसुतेन दृष्टो
चन्द्रे नरः कीर्तिविवर्जितश्च ॥ ६६॥

मीनाश्रितः शीतकरः प्रसूते
सूर्येण दृष्टो विकृतं मनुष्यम् ।
त्यक्तं स्वमित्रैः परमित्ररक्तं
बुद्धा विहीनं सततं विरुद्धम् ॥ ६७॥

भौमेन दृष्टो ह्यषगः शशाङ्कः
करोति रक्तप्रभवैश्च दोषैः ।
सम्पीडिताङ्गं गुरुदोषभाजं
विहीनवित्तं परदेशरक्तम् ॥ ६८॥

बुधेन दृष्टो ह्यषगः शशाङ्कः
करोति नानाविधरोगभाजम् ।
नरं सुरूपं बहुशास्त्ररक्तं
सदानशीलं सततं सुलाभम् ॥ ६९॥

जीवेन दृष्टो ह्यषराशिसंस्थो
नरं सुवाते सुभगं शशाङ्कः ।
चतुष्पदाछानभूरिलाभैः
सन्तुष्टचिन्तं नृपमानभाजम् ॥ ७०॥

शुक्रेण दृष्टः प्रचुरान्नपानैः
संयोजयेच्छीतकरो ह्यषस्थः ।
शाखानुरक्तं विविधान्नपानं
सुरंजितं पार्थिवसद्गुरूणाम् ॥ ७१॥

चन्द्रे ह्यषस्थे रविपुत्रदृष्टे
नरो भवेत् पापमतिः सदैव ।
गुणैर्विहीनः प्रचुरप्रकोपो
भयानुरक्तः स्वसमन्वितश्च ॥ ७२॥

इति श्रीवृद्धयवने चन्द्रदर्शनचारः ॥

---

आध्याय ११
भौमदर्शनचाराध्यायः

मेषे गतो भूमिसुतः प्रसूते
सूर्येण दृष्टो विधनं मनुष्यम् ।
विहिनबुद्धिं कृपणस्वभावं
विवर्जितं सत्यदयानयद्यैः ॥ १॥

मेषाश्रीतो भूमिसुतेअः प्रसूते
चन्द्रेण दृष्टः प्रियमिष्टधर्मम् ।
दयानुरक्तं पितृमातृभक्तं
मुख्यं स्ववर्गे नियतं सदैव ॥ २॥

भौमोऽजसंस्थो बुधदृष्टियुक्तः
करोति सत्यं वनितासु दक्षम् ।
पुशिक्षितं शास्त्रकथासु दक्षं
यज्ञोद्यतं पौष्टिकमेव नित्यम् ॥ ३॥

जीवेन दृष्टः क्षितिजोऽजसंस्थो
नरं सुवाते बहुशास्त्रलुब्धम् ।
हिरण्यवस्त्रैश्च चतुष्पदाद्यं
विवर्जितं पापकथानुषङ्गैः ॥ ४॥

शुक्रेण दृष्टः प्रकरोति भौमो
मेषाश्रितस्तीर्थकथानुरक्तम् ।
शौचाधिकं देवगुरुप्रसक्तं
स्वधर्मसंस्थं सुरतप्रगल्भम् ॥ ५॥

नयातिगं बान्धववैरभाजं

सौरेण दृष्टः क्षितिजः प्रसूते ।
मेषे मनुष्यं परदेशरक्तं
विहीनकोपं भयसंयुतं च ॥ ६॥

वृषाश्रितो भूतनयः प्रसूते
सूर्येण दृष्टो रतिदःसिताङ्गम् ।
विहीनधर्मं जरया समेतं
त्यक्तं जनैः पीडितमुग्रशोकैः ॥ ७॥

चन्द्रेण दृष्टः क्षितिजो गविस्थो
नरं सुवाते सततं नयज्ञम् ।
प्रियं प्रसन्नं सततं सुकान्तं
मनोज्ञवेशं भयवर्जितं च ॥ ८॥

बुधेन दृष्टः क्षितिजो गविस्थः
करोति कीर्त्या सहितं मनुष्यम् ।
नानाधनैः संयुतमिष्टसत्यं
गुरुप्रसक्तं विनयाधिकं च ॥ ९॥

दृष्टो गविस्थः क्षितिजः प्रशान्तं
जीवेन नित्यं जनयेन्मनुष्यम् ।
पथ्याशिनं सर्वकलासु दक्षं
विचित्ररत्नं पशुसंयुतं च ॥ १०॥

शुक्रेण दृष्टो गवि भूमिपुत्रो
गोभूहिरण्यैः सहितं प्रसूते ।
नरं निधिग्रामपुरैः समेतं
सूसंयुतं धर्म परं सदैव ॥ ११॥

मन्देन दृष्टो बहुमानभाजं
वृषे विधत्ते क्षितिजो मनुष्यम् ।
सुदीर्घसूत्रं विनयेन हीनं
प्रेष्यं खलं पापधनं कृतघ्नम् ॥ १२॥

नृयुग्मसंस्थः क्षितिजः प्रसूते
सूर्येन दृष्टः परतर्कुकं च ।
नरं विहीनं सुतमित्रदारैः

पराजितं नीचरतं सुदुष्टम् ॥ १३॥

चन्द्रेण दृष्टः क्षितिजस्तृतीये
राशौ प्रसूते नृपपूजिताङ्गम् ।
खरोदृष्टगोवित्तचयेन युक्तं
प्रभाविनं ब्राह्मणसंमतं च ॥ १४॥

बुधेन दृष्टः क्षितिजो नृयुग्मे
स्थितः प्रियं बन्धुजनस्य नित्यम् ।
स्त्रीभोगशय्यासनयानयुक्तं
हितं हि सर्वस्य जनस्य नित्यम् ॥ १५॥

जीवेन दृष्टो मिथुने दयाढ्यं
कुजः प्रसूते बहुशास्त्ररक्तम् ।
नरं सैदा तीर्थव्रप्रसक्तं
श्रद्धान्वितं शौचसमन्वितं च ॥ १६॥

शुक्रेण दृष्टो मिथुने प्रसूते
भौमः प्रगल्भं सुभगं मनुष्यम् ।
विनीतवेषं परवीतभजं
सुसङ्गतं साधुजनस्य नित्यम् ॥ १७॥

सौरेण दृष्टः क्षितिजः सपपं
राशौ तृतीये जनयेन्मनुष्यम् ।
रोगाकुलं छिद्रपरं परेषां
स्वभावदुष्टं गतसौहृदं च ॥ १८॥

कर्काश्रितो भूतनयःप्रसूते
सूर्येण दृष्टः परसाहसाध्वम् ।
विहीनवीत्तं गुरुरोगभाजं
सदा विहीनं निजबन्धुवर्गैः ॥ १९॥

चन्द्रेण दृष्टो धनधान्ययुक्तं
भौमः प्रसूते खलु कर्कटस्थः
दयासमेतं गतपापमिष्तं
सर्वस्य लोके विभवेन युक्तम् ॥ २०॥

कर्कस्थितो भूतनयः प्रसूते
बुधेन दृष्टो बहुबुद्धियुक्तम् ।
द्विजातियुक्तं प्रचुरतापं
नृपसादात् परमप्रहृष्टम् ॥ २१ ॥

जीवेन दृष्टः खलु कर्कटस्थो
भौमः प्रसूते सुतसौख्ययुक्तम् ।
नयप्रसक्तं च सुपूजितङ्गं
नृपप्रियं साधुजनेन युक्तम् ॥ २२ ॥

शुक्रेण दृष्टः क्षितिजचतुर्थे
राशौ सुशीलं जनयेन्मनुष्यम् ।
प्रियातिथिं वित्तशुभैः समेतं
नानापशुप्राप्तिसुखं च शान्तम् ॥ २३ ॥

कर्कस्थितो भूतनयः प्रसूते
सौरेण दृष्टः पृथुशोकभाजम् ।
सुदीर्घरोगं विगतप्रतापं
सदातिदीनं नृपपीडितं च ॥ २४ ॥

स्थितः क्षितीसूनुधरः प्रतापं
सिंहे विदृष्टो दिननायकेन ।
विनाशितारिं जनयेन्मनुष्यं
सुवेषविद्याधनधान्ययुक्तम् ॥ २५ ॥

सिंहस्थितो भूतनयः प्रशस्तं
चन्द्रेण दृष्टः कुरुते मनुष्यम् ।
सुगन्धधूपाम्बरभोज्यभाजं
शासानुगं धर्मनयेन युक्तम् ॥ २६ ॥

बुधेन दृष्टः खलु सिंहसंस्थो
भौमः सुवाते बहुबुद्धिभाजम् ।
पुष्पाम्बरद्रव्यविलेपनादयं
मिष्टान्नपानैः सततं सुपूज्यम् ॥ २७ ॥

भौमो हरिस्थो गुरुणा च दृष्टो
गुरुप्रसादं जनयेन्मनुष्यम् ।

सुतीर्थयानासनहेमयुक्तं
सुखाधिकामं फलदं प्रगल्भम् ॥ २८॥

शुक्रेण दृष्टः प्रकरोति भौमो
हरिस्थितस्त्रासकरं परेषाम् ।
शौर्यान्वितं बान्धवमानभाज-
मुत्साहयुक्तं रतलालसं च ॥ २९॥

दृष्टोऽर्कपुत्रेण कुजो हरिस्थः
करोति पामागुदरोगभाजम् ।
सदा मनुष्यं कफवातपित्तैः
सम्पीडिताङ्ग गुरुलोकहीनम् ॥ ३०॥

कन्याश्रीतो भूतनयः प्रसूते
सूर्येण दृष्टः कुगतिं मनुष्यम् ।
कुमित्रसेवासु सदानुरक्तं
विवर्जितं मानधनैः सदैव ॥ ३१॥

चन्द्रेण दृष्टः क्षितिजः प्रसूते
कन्याश्रितः सत्यपरं मनुष्यम् ।
मेधाविनं नित्यमुदारचेष्टं
सुसंस्कृतं भूपतिना च नित्यम् ॥ ३२॥

बुधेन दृष्टः खलु कन्यराशौ
जुकः प्रसूते सुभगं मतिज्ञम् ।
नरं नतं साधजनद्विजानां
महाप्रतापं जनसौहृदं च ॥ ३३॥

जीवेन दृष्टः क्षितिजः प्रसूते
नरं प्रसिद्धिं नयनाभिरामम् ।
मनोज्ञवेषं शुभवर्तिताङ्गं
कन्ये गुरुणां प्रणयं प्रधानम् ॥ ३४॥

शुक्रेण दृष्टः खलु कन्यकस्थो
भौमः प्रसूते सुतरां प्रसिद्धम् ।
कुटुम्बसौख्यान्वितसाधभाजं
दयान्वितं मातृपितृप्रभक्तम् ॥ ३५॥

दृष्टोऽङ्गनायां शनिना च भौमो
नरं प्रसूते विकृतं कुचैलम् ।
व्ययाधिकं कामनिपीडितं च
सदाक्षिरोगैः सहितं नितान्तम् ॥ ३६॥

तुलाश्रितो भूतनयः प्रसूते
सूर्येण दृष्टः कुरुतेऽतिहानिम् ।
विवेकहानिं सुजनैर्वियोगं
वैरं स्वपक्षेण सदा नरस्य ॥ ३७॥

तुलाश्रितो भूतनयः प्रसूते
चन्द्रेण दृष्टः सुभगं मनुष्यम् ।
सुभोगदेहं गतशत्रुपक्षं
सदा हितं देवगुरुद्विजानाम् ॥ ३८॥

दृष्टस्तुलास्थः शशिजेन
भोगान्वितं शिलधनं मनुष्यम् ।
प्रदानशीलं प्रभया समेतं
सुसंस्कृतं पार्थिवमानवैश्च ॥ ३९॥

जीवेन दृष्टः क्षितिजस्तुलास्थो
नरं प्रसूते बहुधर्मभाजम् ।
द्विजानुकूलं पशुपुत्रयुक्तं
विद्यान्वितं शंसितमेव नित्यम् ॥ ४०॥

शुक्रेण दृष्टः कुरुते महीज-
स्तुलाश्रितः सत्यपरं मनुष्यम् ।
महाधनं दीप्तियुतं प्रगल्भं
सदा हितं बान्धवसध्विजानाम् ॥ ४१॥

सौरेण दृष्टः क्षितिजस्तुलास्थः
करोति मर्त्यं बहुपापरक्तम् ।
रोगैः समेतं सततं कुशिलं
परान्नरक्तं सततं सुचैलम् ॥ ४२॥

भौमोऽलिसंस्थ कुरुते मनुष्यं

सूर्येण दृष्टो बहुरोगयुक्तम् ।
नयेन हीनं बहुशत्रुपक्षं
विरुद्चेष्तं विकृतानुकारम् ॥ ४३॥

चन्द्रेण दृष्टोऽतिलगतः प्रसूते
भौमोऽतिनीत्या सहितं मनुष्यम् ।
प्रियातिथिं सर्वसमृद्धियुक्तं
धर्मप्रधानं बहुल्लभं च ॥ ४४॥

बुधेन दृष्टः प्रकरोति भौमः
स्थितोऽलिराशौ प्रचुरप्रतापम् ।
सुधर्मशिलं बहुतीर्थर्क्तं
विवर्जितं पापजनेन नित्यम् ॥ ४५॥

जीवेन दृष्टः प्रकरोति भौमः
सदालिसंस्थः स्तुतिभिः समेतम् ।
नितान्तधर्मानुरते प्रशन्तं
सुपूजितं वन्दिजनैः सदैव ॥ ४६॥

शुक्रेण दृष्टोऽलिगतः प्रसूते
भौमः सुरूपं सुभ .......... ।
शूरं कृतघ्नं धनधान्ययुक्तं
मेधाविनं सत्त्वप .......... नुशीलम् ॥ ४७॥

सौरेण दृष्टोऽतिलगतस्तु भौमो
वरं प्रसूते विजय समेतम् ।
पापानुरक्तं विषयातिगं च
व्यमेतशीलं सततं कृतघ्नम् ॥ ४८॥

चापाश्रितो भूतनयः प्रसूते
सूर्येण दृष्टो ज्वरपित्तभजम् ।
श्लेष्मातिसारोतियुतं सुभिक्षं
गतप्रभावं विनयेन हीनम् ॥ ४९॥

भौमो हयस्थः शशिना च दृष्टो
करोति शय्यासनचस्त्रभानम् ।
नरं सुयत्रं बहुशास्त्ररक्तं

..........अनं सत्यपरं प्रधानम् ॥ ५०॥

चापाश्रितो भूतनयः सुवाते
बुधेन दृष्टः सुभगमनुष्यम् ।
सुतिर्थरक्तं नृपकार्यदक्षं
दयाप्रं सर्वकलासु दक्षम् ॥ ५१॥

जीवेन दृष्टः क्षितिजो हयस्थो
नरं प्रसूते बहुधा धनाद्यम् ।
सुवर्णरत्नाम्बरसौख्ययुक्तं
विहीनशत्रुं प्रमदाप्रियं च ॥ ५२॥

शुक्रेण दृष्टः क्षितिजो हयस्थो
नरं सुवाते विनयप्रधानम् ।
सदा विनीतं हययानयुक्तं
विभूषितं पार्थिवभूषणेन ॥ ५३॥

षौरेण दृष्टः क्षितिजो ह्यस्थ
करोति पामाकुलमेव नित्यम् ।
शिरोर्तिदोषाकुलितं नृशंसं
निपीडितं मानसजैश्च दुःखैः ॥ ५४॥

भौमो मृगस्थो रविणा च दृष्टो
नरं सुवाते विकृतं कृतघ्नम् ।
.......... बन्धवधाभितप्तं
विदेशभाजं प्रभया विहीनम् ॥ ५५॥

भौमो मृगस्थः शशिना च दृष्टः
करोति सौम्यं रतिसौख्यपुष्टं
विनीत्वेषं प्रचुरन्नपानं
नराधिपाद्यैः सहितं सगर्वम् ॥ ५६॥

बुधेन दृष्टो मकरे क्षितीजं
करोति नित्यं विनयप्रधानम् ।
नरं कृतघ्नं निरुजं विधिज्ञं
पराक्रमाप्तैः सुधनैः समेतम् ॥ ५७॥

करोति भौमः खलु जीवदृष्टो
मृगाश्रितः पुण्यधनैर्मनुष्यम् ।
प्रसवमाकर्षणलब्धाभं
हृतप्रतापं नियमओः समेतम् ॥ ५८॥

शुक्रेण दृष्टो मृगगोऽपि भौमः
करोति भोगैः सततं समेतम् ।
मित्रानुरक्तं कृशिकर्मदक्षं
प्रजानुकूलं भयवर्जितं च ॥ ५९॥

भौमो मृग्स्थः शनिना च दृष्टो
नरं सुवाते बहुसारमेव ।
मित्रैर्विहीन बहुशोकयुक्तं
सदा नितान्तं परपक्षजानाम् ॥ ६०॥

भौमो घटस्थो रविणा च दृष्टः
करोति मर्त्यं सुकृतप्रभावम् ।
व्यपेतलज्जं सुतबन्धुहीनं
कृष्याधिकं सौहृदवर्जितम् च ॥ ६१॥

चन्द्रेण दृष्टः क्षितिजो घटस्थो
नरं सुवते बहुसभ्यजं च ।
द्विजातितीर्थामरभक्तियुक्तं
नयाधिकं कामफलः समेतम् ॥ ६२॥

बुधेन दृष्टो घटसंस्थभौमो
नयेन युक्तं जनयेन्मनुष्यम् ।
प्रियातिथिं पार्थिवलब्धमानं
सदा सुशिलं बहुधर्मभाजम् ॥ ६३॥

जीवेन दृष्टो घटगोऽथ वक्रः
दानं विवेकं च विवेकभाजम् ।
नरं धनादयं बहुधर्मयुक्तं
गतारिपक्षं सुरविप्रभक्तम् ॥ ६४॥

शुक्रेण दृष्टो घटगश्च भौमः
.......... ।

..........
.......... ॥ ६५॥

सौरेण दृष्टः क्षितिजो घटस्थः
करोति नानाविधदुःखभाजम् ।
हतप्रतापं सुजनैः समेतं
प्रियतिथिं ब्राह्मणवल्लभं च ॥ ६६॥

मीनस्थितो भूतनयोऽर्कदृष्टः
करोति नित्यं कलहैः समेतम् ।
नरं सुदीनं वयसा समेतं
कृशं विवर्णं नृपपीडितं च ॥ ६७
चन्द्रेण दृष्टो ह्यषगोऽथ भौमो
नरं सुवाते वरयानभाजम् ।
चतुष्पदाद्यं वनितास्वभीष्टं
जितेन्द्रियं भोगसमन्वितं च ॥ ६८॥

बुधेन दृष्टः प्रकरोति भौमो
ह्यषस्थितः शौचपरं मनुष्यम् ।
वापीतहागामरजेषु रक्तं
हितं स्वपक्षे परवर्जितं च ॥ ६९॥

जीवेनदृष्टः कुरुते तु भौमो
ह्यषाश्रितो बुधविवर्धनं च ।
मनोज्ञदेहं शुभवस्त्रभाजं
भोगाधिकं पुण्यविवृद्धिभाजम् ॥ ७०॥

शुक्रेण दृष्टः क्षितिजो ह्यषस्थो
नरं सुवाते बहुसौख्ययुक्तम् ।
विज्ञं सुरूपं गलितरिपक्षं
सदा विनीतं नृपतेरभीष्टम् ॥ ७१॥

सौरेण दृष्टो बहुमन्दभाजं
मीनाश्रितो भूतनयः प्रसूते ।
सदातुर शोकपरं कृतघ्नं
सुदिर्घसूत्रं व्यसनैः समेतम् ॥ ७२॥

इति श्रीवृद्धयवने भौमदर्शनचारः ॥

---

आध्याय १२

बुधदर्शनचारध्यायः

मेषं गतो ज्ञो रविणा च दृष्टः
करोति मर्त्यं कृपणस्वभावम् ।
दुष्टाशयं बन्धुजनेन युक्तं
भयाकुलं मित्यमुदारदुःखम् ॥ १॥

बुधोऽजसंस्थः सुजनं च दृष्टः
करोति मर्त्यं सुजनं सुविज्ञम् ।
शास्त्रानुरक्तं कृषिकर्मदक्षं
सुरद्विजानां प्रणतं सदैव ॥ २॥

भौमेन दृष्टः शशिजोऽजसंस्थो
हर्षाधकारैः कुरुते प्रपीडाम् ।
नरं तथा सर्वजनैर्विमुक्तं
पराजितं वैरिभिरेव नित्यम् ॥ ३॥

जीवेन दृष्टोऽजगतस्त सौम्यो
नरं विधत्तेऽतिधनप्रगल्भम् ।
हितं द्विजानां सततं कृतज्ञं
नशान्वितं पार्थिवपूजितं च ॥ ४॥

शुक्रेण दृष्टः प्रकरोति सौम्यो
मेषाश्रितो यानधनैः समेतम् ।
नरं महाधान्यहयैः समेतं
विमुल्लपापं बहुधर्मयुक्तम् ॥ ५॥

सौरेण दृष्टः शशिजः प्रसूते
मेषाश्रितः कीर्तिविवर्जितं च ।
प्रभूतरोगं गतंसौख्यमिष्टं
प्रपीडितं चौरनरेचराद्यैः ॥ ६॥

वृषस्थितः सोमसुतोऽर्कदृष्टो
नरं प्रसूते क्षतजैः समेतम् ।

वक्षोगुदांघ्रिप्रभैश्च रोगैः
सम्पीडितं धान्यकलत्रहीनम् ॥ ७॥

बुधो वृषथः शशिना च दृष्टः
करोति मर्त्यं प्रथितं नृलोके ।
सत्याधिकं सौख्यविवेकयुक्तं
श्रियाधिकं पुण्यविधौ प्रगल्भम् ॥ ८॥

भौमेन दृष्टः शशिजो वृषस्थो
नरं प्रसूते विकृतस्वभावम् ।
प्रभूतवैरं व्यसनाभिभूतं
पाषण्डिभिः सङ्गतमेव नित्यम् ॥ ९॥

वृषश्रितः सोमसुतः प्रसूते
जीवेन दृष्टः क्षितिवस्त्रभाजम् ।
देवातिथिश्रेष्ठजनानुरक्तं
स्वधर्ममुख्यं प्रणतं प्रजानाम् ॥ १०॥

शुक्रेण दृष्टः प्रणतारिपक्षं
नरं प्रसूते शशिजो वृषथ्ः ।
नरेन्द्रपूज्यं विबुधैः समेतं
प्रधानकर्मणमभिष्टलाभम् ॥ ११॥

सौरेण दृष्टः शशिजः प्रसूते
वृष गतः पापधनं मनुष्यम् ।
सुतिर्थयानासनवस्त्रलाभै-
र्विवर्जितं नीचजनप्रसेव्यम् ॥ १२॥

सूर्येण दृष्टो मिथुने च सौम्ये
नरं सुवाते सुतविप्रयुक्तम् ।
कुचैलदेहं विकृतानुरकारं
विवर्जितं सत्यधनेन नित्यम् ॥ १३॥

चन्द्रेण दृष्टः शशिजो नृयुग्मे
करोति नानाविधलाभभाजम् ।
नितान्तसौख्यैः सहितं प्रगल्भं
तीर्थानुरक्तं सुभगं मनोज्ञम् ॥ १४॥

भौमेन दृष्टो मिथुने बुधस्तु
प्रियं प्रसूते नृपसज्जनानाम् ।
नरं परैर्वर्जितमिष्टधर्म
सरक्षितं बन्धजनैः सदैव ॥ १५॥

जीवेन दृष्टो तु सौम्यः
करोति नानाविधमप्रगल्भम् ।
कलत्रपुत्राप्तिसुखं सुरूपं
प्रियंवदं दानविचक्षणं च ॥ १६॥

शुक्रेण दृष्टो मिथुने प्रसूते
बुधो विवाहार्थपरं मनुष्यम् ।
स्त्रीवल्लभं भूतियशो..........यभाजं
प्रसन्नचिन्तम् द्विजवल्लभं च ॥ १७॥

सौरेण दृष्टः शशिजो विधत्ते
क्षुच्छस्त्रपीडासहितं नृयुग्मे ।
नरं प्रशंसार्थविवेकहीनं
कृतघ्नमिष्टैः परिवर्जितं च ॥ १८॥

कर्काश्रितः सोम्सुतोऽर्कदृष्टो
नरं प्रसूते व्यसनाभिभूतम् ।
अधर्मचेष्टं  विकृतस्वभावं
मदातिगं दुःकृतसेवनेन ॥ १९॥

कर्काश्रितः सोमसुतो विधत्ते
चन्द्रेनः दृष्टः सुतदारयुक्तम् ।
त्रिणामभीष्टं सुरतानुरक्तं
प्रसन्नैत्तं गतसाध्वसं च ॥ २०॥

कर्काश्रितः सोमसुतो विधत्ते
भौमेन दृष्टः परदाररक्तम् ।
चलस्वभावं विपरीतचेष्टं
पराङ्मुखं देव्गुरुद्विजानाम् ॥ २१॥

जीवेण दृष्टः शशिजो विधत्ते

कर्काश्रितः पुण्यपरं मनुष्यम् ।
चतुष्पदाशुद्धिजभोजनाद्यं
सुपूजितं साहुजनेन नित्यम् ॥ २२॥

शुक्रेण दृष्टः शशिजः प्रसूते
कर्काश्रितो वाजिधनाम्बराढ्यम् ।
स्त्रीपुत्रवस्त्रप्रणयेन युक्तं
सुसंस्कृतं पार्थिवसाधुलोकैः ॥ २३॥

सौरेण दृष्टः शशिजस्थु कर्के
दारिद्र्यनिद्रालससेविताङ्गम् ।
उत्साहहीनं बहुछिद्रयुक्तं
विवर्जितं मानधनैः सदैव ॥ २४॥

सिंहस्थितः सोमसुतो विधत्ते
सूर्येण दृष्टः कृपणस्वभावम् ।
सुदीर्घयुक्तं गुरुरोगयुक्त
विनाकृतं सत्यदमव्रतैश्च ॥ २५॥

चन्द्रेण दृष्टः शशिजश्च सिंहे
करोति मर्त्यं गुणगौरवाद्यम् ।
सुतीर्थसौख्यामलल्ब्धयुक्तं
विशुद्धबुद्धिं सततं नयज्ञम् ॥ २६॥

भौमेन दृष्टः खलु सिंहसंस्थो
बुधो विधत्ते बहुशोकभाजम् ।
विचर्चिकापामीनपीडिताङ्गं
सदातुरं पुण्यधनैर्विहीनन् ॥ २७॥

जीवेन दृष्टः खलु सिंहसंस्थः
करोति सौम्यः सुतदासभाजम् ।
सुधामसत्यं प्रभया समेतं
नतं नरैः सर्वौखैः समेतम् ॥ २८॥

शुक्रेन दृष्टः प्रणतं सुराणां
बुधो विधत्ते खलु सिंहराशौ ।
बुद्धान्वितं शीलधनं सुरूपं

व्यपेतदुःखं गतसाध्वसं च ॥ २९॥

सौरेण दृष्टः शशिजो हरिस्थः
करोति मर्त्यं कृपणं सुदीनम् ।
व्ययाधिकं कामयुतं विशीलं
त्यक्तं नयेनार्थविवर्जितं च ॥ ३०॥

कन्याश्रितः सोमसुतो विधत्ते
सूर्येण दृष्टः प्रभया विहीनम् ।
सेवातुरं क्लेशयुतैः कुभृत्यै-
र्विरक्तपुरं सततं सुदुःखम् ॥ ३१॥

चन्द्रेण दृष्टः शशिजो विधत्ते
कन्याश्रितः सत्यपरं मनुष्यम् ।
देवानुरक्तं सकलैर्वियुक्तं
प्रभूतमित्रं नृपवल्लभं च ॥ ३२॥

भौमेन दृष्टः खलु कन्यकस्थो
नरं विधत्ते सरुजं च सौम्यः ।
कोपाधिकं कामसूतप्तदेहं
भयान्वितं वंधितमाकुलं च ॥ ३३॥

जीवेन दृष्टः प्रकरोति सौम्यो
नरं सुशिलं सततं गतारिम् ।
प्रभूतसौम्यं प्रणतारिपक्षं
नितान्तमोजःसहितं प्रगल्भम् ॥ ३४॥

शुक्रेण दृष्टः खलु कन्यकस्थो
बुधो विधत्ते बहुधर्मभाजम् ।
विधानविद्यापशुपुत्रयुक्तं
सुसङ्गतं साधुजनेन नित्यम् ॥ ३५॥

मन्देन दृष्टः शशिजः समन्दं
कन्याश्रितः संजनयेन्मनुष्यम् ।
विरक्तचेष्टं गतधर्मसौख्यं
भयाधिकं पापमतिं सदैव ॥ ३६॥

तुलाश्रितः सोमसुतो विधत्ते
सूर्येण दृष्टः प्रभया विहीनम् ।
प्रभूतदुःखं व्यसनैः समेतं
कामातुरं निन्द्यतमं नृलोके ॥ ३७॥

चन्द्रेण दृष्टः शशिजः प्रसूते
तुलाश्रितः सत्यधनं मनुष्यम् ।
प्रियातिथिं देवगुरुप्रसक्तं
नयाधिकं ब्राह्मणसंमतं च ॥ ३८॥

भौमेन दृष्टः शशिजः प्रसूते
तुलाश्रितः पापरतं मनुष्यम् ।
विषादभाजं गतसाधुभाजं
महाव्ययं साधुविवर्जितं च ॥ ३९॥

जीवेन दृष्टः शशिजः प्रसूते
तुलाश्रितः सत्यपरं मनुष्यम् ।
पापैर्न युक्तं सुतसौख्यभाजं
नयप्रधानं बहुसंश्रितं च ॥ ४०॥

शुक्रेण दृष्टः सुविवेकयुक्तं
करोति सौम्यस्तुलगो मनुष्यम् ।
चतुष्पदाद्यं सुतवित्तयुक्तं
गुणानुरक्तं प्रियबन्धवं च ॥ ४१॥

सौरेण दृष्टः शशिज प्रसूते
नरं नितान्तं कलहेन युक्तम् ।
तुलाश्रितः कृत्रिमधर्मभाजं
पाषण्डसङ्गानुरतं सदैव ॥ ४२॥

बुधोऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते सुखवित्तहीनम् ।
सुतीव्रशोकं गतमानभोगं
प्रभूतवैरं प्रियसाहसं च ॥ ४३॥

चन्द्रेण दृष्टोऽलिगतः प्रसूते
बुधो नरं बुद्धिविवेकयुक्तम् ।

सुर्द्विजानां प्रणतं प्रगल्भं
सदाश्रुतं मानधनं नयज्ञम् ॥ ४४॥

भौमेन दृष्टोऽलिगतः प्रसूते
बुधो नरं बुद्धिविवेकहीनम् ।
सदानुरं साधुजनप्रमुक्तं
भयाकुलं निन्दितमानसत्त्वम् ॥ ४५॥

जीवेन दृष्टः खलु सोमपुत्रो
नरं प्रसूतेऽलिगतः सुशिलम् ।
विचक्षणं नीतिपरं प्रधानं
सुतार्थयुक्तं सततं सुशिलम् ॥ ४६॥

शुक्रेण दृष्टोऽलिगतो बुधस्तु
नरं प्रसूतेऽतिधनैः समृद्धम् ।
प्रसन्नचिन्तं प्रणतं गतारिं
प्रियातिथिं प्रस्तुमिष्टधर्मम् ॥ ४७॥

सौरेण दृष्टोऽलिगतः प्रसूते
बुधो प्रवृद्धिं शुभदं मनुष्यम् ।
कुकर्मरक्तं मुनिना विरक्तं
महाप्रतापं प्रणतं रिपूनाम् ॥ ४८॥

सूर्येण दृष्टः शशिजः प्रसूते
हयाश्रितः क्लेशविधर्मयुक्तम् ।
नरं कुमित्रैः सहीतं गतारिं
विहीनकोशं भयसंयुतं च ॥ ४९॥

चन्द्रेण दृष्टो हयगः प्रसूते
बुधः प्रसन्नं सुधनं मनुष्यम् ।
सुधर्मयुक्तं कृतसाधुसङ्गं
सदानुरक्तं पतिसज्जनानाम् ॥ ५०॥

भौमेन दृष्टो प्रसूते
बुधो धनाढ्यं प्रथितं मनुष्यम् ।
हितं स्ववर्गे प्रचुरप्रतापं
विद्यानुरक्तं भयवर्जितं च ॥ ५१॥

जीवेन दृष्टो हयगः प्रसूते
बुधः प्रभूतार्थनयेन युक्तम् ।
नरं सुवर्णम्बररत्नभाजं
जितेन्द्रियं स्नानपरं सदैव ॥ ५२॥

शुक्रेण दृष्टो हयगः प्रसूते
बुधोऽतिमान्यं नृपमानाजम् ।
नरं विधिचं प्रणतारिपक्षं
सुसंमतं देवगुरुद्विजानाम् ॥ ५३॥

सौरेण दृष्टः शशिजो हयस्थो
गतप्रभावं जनयेन्मनुष्यम् ।
परान्नरक्तं बहुदानभाजं
प्रज्ञाविहीनं गतबान्धवं च ॥ ५४॥

मृगाश्रितः सोमसुतोऽर्कदृष्टः
करोति मर्त्यं प्रभुदुःखभाजम् ।
व्यपेतशीलं सततं कृतघ्नं
विवर्जितं सत्यदयानयैश्च ॥ ५५॥

बुद्धो मृगस्थः शशिना च दृष्टः
करोति मर्त्यं सुखसम्प्रगल्भम् ।
प्रियान्तचिन्तम् तीर्थकथानुरक्तं
प्रशान्तचिन्तम् विनयेन युक्तम् ॥ ५६॥

भौमेन दृष्टो मृगगः प्रसूते
सौम्यो न सौम्यं शुभवित्तहीनम् ।
सुगुह्यरोगार्दितमेव नित्यं
प्रियाविहीनं भयसंयुतं च ॥ ५७॥

जीवेन दृष्टो मृगगो बुधश्च
नरं प्रसूते बहुपुत्रयुक्तम् ।
सन्तुष्टचिन्तं व्यसनेन हीनं
नृपप्रियं बन्धुहितं सदैव ॥ ५८॥

शुक्रेण दृष्टो मकरे बुधस्तु

करोति मर्त्यं विजितारिपक्षम् ।
जितेन्द्रियं वृत्तिकरं द्विजानां
सदानुकूलं विभवैः समेतम् ॥ ५९॥

सौरेण दृष्टः प्रकरोति सौम्यो
मृगाश्रितः पापरतं मनुष्यम् ।
शिरोक्षिरोगैः सहितं सुदुष्टं
विहीनवित्तं भयसंयुतं च ॥ ६०॥

घटाश्रितः सोमसुतोऽर्कदृष्तः
करोति मर्त्यं बहुनीचरक्तम् ।
श्रिया विहीनं सुजनैर्वियुक्तं
विवर्जितं पुण्यसुखेन नित्यम् ॥ ६१॥

घटाश्रितः सोमसुतः प्रदृष्ट-
श्चन्द्रेण धत्ते सुभगं मनुष्यम् ।
सुरक्षितं पुण्यधनैः समेतं
नयानुरक्तं प्रवरं सुदारम् ॥ ६२॥

भौमेन दृष्तो घटगः प्रसूते
बुधः सुबुद्धिं च सुखार्थहीनम् ।
सदारुजं क्रूरमतिं मनुष्यं
सम्पीडितं श्लेष्मकृतैर्विकारैः ॥ ६३॥

जीवेन दृष्टः शशिजः प्रसूते
घटाश्रितः श्रीसहितं मनुष्यम् ।
स्त्रीणामभीष्टं सुरतानुरक्तं
धर्माश्रितं शास्त्रसुलालसं च ॥ ६४॥

शुक्रेण दृष्टः शशिजः प्रसूते
नरं प्रशान्तं परमप्रभावम् ।
नरेन्द्रपूज्यं प्रणतं द्विजानां
सुश्लाघितं बन्दिजनेन नित्यम् ॥ ६५॥

मन्देन दृष्टः शशिजो घटस्थः
करोति मर्त्यं बहुमन्दभाजम् ।
प्रभूतदुःखं धनधान्यहीनं

पराङ्मुखं देवगुरुद्विजानानाम् ॥ ६६॥

सूर्येण दृष्टो ह्यषगो बुधस्तु
करोति मर्त्यं विकृतस्वभावम् ।
अतीव पित्तज्वरवातरोगैः
सम्पीडिताङ्गं प्रभया विहीनम् ॥ ६७॥

चन्द्रेण दृष्टः प्रकरोति सौम्यो
मीनाश्रितः सत्यपरं मनुष्यम् ।
सुबन्धुपूजासुरकार्यदक्षं
दयान्वितं प्रीतिकरं जनानाम् ॥ ६८॥

भौमेन दृष्टो ह्यषगस्तु सौम्यः
करोति नानाविधरोगभाजम् ।
विहीनवर्णं कफरक्तरोगैः
सम्पीडितं मानविवर्जितं च ॥ ६९॥

देवेज्यदृष्टः शशिजः प्रसूते
मीनाश्रितः सर्वकलासु दक्षम् ।
नरं सुपुण्याश्रितमिष्टचिन्तं
सदानुरक्तं नृपबान्धवानाम् ॥ ७०॥

.............................. ॥ ७१॥

सौरेण दृष्टः शशिजो ह्यषस्थः
करोति सम्पीडितमुग्ररोगैः ।
शिरोक्षिहस्तांघ्रिरुजाविकारैः
सम्पीडितं नष्टधनं विरूपम् ॥ ७२॥

इति श्रीवृद्धयवने बुधदर्शनचारः ॥

---

आध्याय १३
गुरुदर्शनचारध्यायः
मेषं गतो देवगुरुः प्रसूते
सूर्येण दृष्टः पशुपुत्रहीनम् ।
नरं भयार्तं घृणया विहीनं

विवर्जितं सत्यसुखेन नित्यम् ॥ १॥

जीवोऽजसंस्थः शशिना च दृष्टः
करोति सात्यान्वितमिष्टधर्मम् ।
नरं प्रगल्भं बहुशास्त्ररक्तं
नृपप्रसादैः सहितं सदैव ॥ २॥

मेषं गतो देवगुरुः प्रसूते
भौमेन दृष्टो बहुशोकयुक्तम् ।
नरं धनैर्वर्जितमिष्टपापं
पाषण्डिनां भक्तमनल्पदुःखम् ॥ ३॥

सौम्येण दृष्टोऽजगतः सुरेज्यो
नरं प्रसूते सुतदारसौख्यैः ।
समृद्धिमन्तं गतशोकमोहं
हितं स्ववर्गे घृणया समेतम् ॥ ४॥

शुक्रेण दृष्टः प्रकरोति जीवो
मेषाश्रित पुण्यधनैर्विहीनम् ।
प्रणष्टदारं गतबन्धुवर्गं
प्रणष्टमेधावनिनाथचौरैः ॥ ५॥

मेषाश्रितो देवगुरुर्विधत्ते
सौरेण दृष्टो बहुधान्ययुक्तम् ।
विक्षाधनं पुत्रयुतं कृशाङ्गं
स्त्रीलंपदं पानरतं नरं च ॥ ६॥

वृषाश्रितो देवगुरुः प्रसूते
सूर्येण दृष्टो विधनं मनुष्यम् ।
क्रियाविहीनं कुजनानुरक्तं
कुमित्रभाजं कुधनाकुलं च ॥ ७॥

वृषाश्रितो देवगुरुः प्रसूते
चन्द्रेण दृष्टः सुरकर्मदक्षम् ।
नरं नयचं सुधनेन युक्तं
विवर्जितं रोगपरं सदैव ॥ ८॥

भौमेन दृष्टो सुरेज्यः
करोति भीतं कृपणं मनुष्यम् ।
बहुप्रमादं नियमैर्विहीनं
सदा भृतं ज्ञातिविवर्जितं च ॥ ९॥

बुधेन दृष्टो वृषगः सुरेज्यः
करोति मर्त्यं सुतसौख्यशुक्तम् ।
विभासमेतं नियमप्रसक्तं
नितान्तमुन्कृष्टधनैः समेतम् ॥ १०॥

शुक्रेण दृष्टो वृषगः सुरेज्यः
करोति मर्त्यं व्रतसंयतं च ।
महाधनं दानरतं प्रस्.........
विवेकिनं प्राणभृतां वरिष्टम् ॥ ११॥

सौरेण दृष्टो वृषगः सुरेज्यः
करोति दीनं विधतं मनुष्यम् ।
व्यपेतलज्जं धृतिसत्यवर्जं
निसर्गदुष्टं प्रियमाध्वसम् ॥ १२॥

नृयुग्मसंस्थः प्रकरोति जीवः
सूर्येण दृष्टः प्रणयेन हीनम् ।
विवर्जितं शौचदयाभिमानैः
सम्पीडितं दुर्गतिमेव नित्यम् ॥ १३॥

चन्द्रेण दृष्टो मिथुने सुरेज्यः
करोति विद्याविनयेन युक्तम् ।
नरं प्रसिद्धं प्रचुरान्नपानं
विहीनदोषं सुरभक्तिचिन्तम् ॥ १४॥

भौमेन दृष्टो मिथुने सुरेज्यः
करोति मर्त्यं व्यथितं नृशंसम् ।
रोगावृतं पुण्ययशोविहीनं
गतप्रभं हानियुतं सदैव ॥ १५॥

बुधेन दृष्टो मिथुने सुरेज्यः
करोति मर्त्यं बहुबुद्धिभाजम् ।

विप्रानुरक्तं प्रणतं विहीन
सत्याधिकं पूजितमेव भूपैः ॥ १६॥

शुक्रेण दृष्टो मिथुने सुरेज्यः
करोति नानाविधवित्तयुक्तम् ।
नरं नितांतं बहुशीलयुक्तं
गुणानुरक्तं पृथुमेव लोके ॥ १७॥

सौरेण दृष्टः प्रकरोति जीवो
दुःखेन युक्तं व्यसनाभिभूतम् ।
दयाविहीनं पतितानुरक्तं
विहीनवर्णं ज्वरपित्तभाजम् ॥ १८॥

सुरेज्यमन्त्री रविणा च दृष्टः
कर्काश्रितस्त्रीप्रकरं मनुष्यम् ।
विमुक्तलज्जं विनयेन हीनं
सदातुरं बान्धववर्जितं च ॥ १९॥

चन्द्रेण दृष्टः खलु कर्कसंस्थः
करोति जीवो विभवं मनुष्यम् ।
मनोज्ञदेहं सुरविद्विभक्तं
कृपापरं साधुसमन्वितं च ॥ २०॥

भौमेन दृष्टो गुरुरेव कर्के
नरं प्रसूते बहुपापभाजम् ।
जलोदरप्लीहगुदाक्षिरोगैः
सम्पीडिताङ्गं गुणवर्जितं च ॥ २१॥

बुधेन दृष्टः खलु कर्कसंस्थो
गुरुप्रसक्तं नृपलोकभाजम् ।
हिरण्यवस्त्रामणिमुक्तलाभैः
समन्वितं सत्यपरं सदैव ॥ २२॥

शुक्रेण दृष्टः सुरराजमन्त्री
कर्काश्रितः स्फीतिवतं मनुष्यम् ।
करोति पुष्टं सुरभोजनानां
सुरक्तपौरं प्रथितं नृलोके ॥ २३॥

सौरेण दृष्टः खलु कर्कराशौ
जीवः सुवते बहुतर्ककं च ।
सुदीर्घपौरैर्नृपचौरदुष्टैः
प्रपीडितं निन्दितमेव नित्यम् ॥ २४॥

सिंहस्थितो देवगुरुः प्रसूते
सूर्येण दृष्टः पतितस्वभावम् ।
विहीनधर्मं प्रकरोति वैरं
मानान्त्ययुक्तं प्रणतं च नीचे ॥ २५॥

चन्द्रेण दृष्टो हरिगः सुरेज्यः
करोति मर्त्यं सुखवर्धिताङ्गम् ।
सौभाग्ययुक्तं बहुमानभाजं
सुसंमतं साधुजनस्य नित्यम् ॥ २६॥

सिंहस्थितो देवगुरुः प्रसूते
कुजेन दृष्टः प्रचुरप्रतापम् ।
विहीनवर्णं नयविप्रयुक्तं
विवर्जितं साधुसमागमेन ॥ २७॥

बुधेन दृष्टः कुरुते सुरेज्यः
सिंहस्थितः सत्यपरं मनुष्यम् ।
विशालकीर्तिं कृतधर्मकार्यं
नरेन्द्रपूज्यं सुहृदप्रयुक्तम् ॥ २८॥

शुक्रेण दृष्टो हरिगः सुरेज्यो
नरं विधत्ते मणिरत्नभाजम् ।
शय्यानुरक्तं बहुमित्रपक्षं
विपादितारिं प्रभुतासमेतम् ॥ २९॥

सौरेण दृष्टो हरिगः सुरेज्यः
करोति मर्त्यं विधिहीनकृत्यम् ।
कौलप्रभावं सुजनैर्विमुक्तं
विद्वेषशीलं निजबान्धवानाम् ॥ ३०॥

कन्याश्रितः सूर्यनिरीक्षितश्च

करोति जीवः सततं कुशीलम् ।
नरं प्रसूते कुजलैः समेतं
विपन्नशीलं परुषस्वभावम् ॥ ३१॥

चन्द्रेण दृष्टः खलु कन्यकायां
जीवो विधत्ते जयसम्प्र..........
सुसाधुपूज्यं नृपतेरभिष्टं
विवर्जितं पापजनेन नित्यम् ॥ ३२॥

भौमेन दृष्टः सुरराजमन्त्री
कन्याश्रितस्तीव्ररुजासमेतम् ।
नरं प्रसूते नयधर्महीनं
विपन्नशीलं नृपपीडितं च ॥ ३३॥

बुधेन दृष्टः प्रकरोति जीवो
नरं प्रगल्भं सुतदारयुक्तम् ।
स्वबन्धुमुख्यं बहुकीर्तिभाजं
सदा हितं बान्धवसज्जनानाम् ॥ ३४॥

शुक्रेण दृष्टः प्रकरोति जीवः
कन्याश्रितः सर्वजनैः प्रशस्तम् ।
नरं सुशास्त्रानुरतं प्रगल्भं
व्यपेतदुःखं कपदेन हीनम् ॥ ३५॥

कन्याश्रितो देवगुरुः प्रसूते
सौरेण दृष्टः प्रचुरार्तियुक्तम् ।
व्यापचलज्जं विगतप्रतापं
कलिप्रियं दुष्टमतिं नृशंसम् ॥ ३६॥

तुलाश्रितो देवगुरुः सुवाते
सूर्येण दृष्टः कुविभः प्रदुःखम् ।
नरं सुशोकैः सहितं सपापं
मायाधिकं कृत्रिमसौहृदं च ॥ ३७॥

चन्द्रेण दृष्टस्तुलगस्तु जीवो
नरं प्रसूते विभवैः समेतम् ।
व्यथाविहीनं नतशत्रुपक्षं

महाधनं सत्यपरं सदैव ॥ ३८॥

भौमेन दृष्टस्तुलगस्तु जीवो
नरं प्रसूते कलहैः समेतम् ।
निन्द्यं कृशं पुण्ययशोविहीनं
सुसंस्कृतं नीचजनैः सदैव ॥ ३९॥

बुधेन दृष्टस्तुलगः सुरेज्यो
नरं प्रसक्तं विनये प्रसूते ।
सुतीर्थभाजं बहुमित्रवर्गं
शास्त्रानुरक्तं बहुबान्धवं च ॥ ४०॥

शुक्रेण दृष्टः प्रकरोति जीव-
स्तुलाश्रितः सत्यधनं प्रसूते ।
गुणानुरक्तं विविधानपानैः
संवर्धिताङ्गं गुरुदेवभक्तम् ॥ ४१॥

सौरेण दृष्टः प्रकरोति जीव-
स्तुलाश्रितः क्लेशभुवा समेतम् ।
विहीनपक्षं सुतदारहीनं
सदा नरं रोगसमन्वितं च ॥ ४२॥

जीवोऽलिसंस्थः प्रकरोति म्.........
सूर्येण दृष्टः कृपणं मनुष्यः ।
वातामयक्लेशसुपीडिताङ्गं
गतप्रधानं मलिनं कुचैलम् ॥ ४३॥

चन्द्रेण दृष्टोऽलिगतः सुरेज्यः
करोति मर्त्यं गतपापसङ्गम् ।
सौभाग्ययुक्तं विनयैः समेतं
प्रभूतमित्रं गतशोकमोहम् ॥ ४४॥

भौमेन दृष्टोऽलिगतः प्रसूते
जीवो जितं स्त्रीतनयैश्च नित्यम् ।
विवेकहीनं गतमानलाभं
विरूपचेष्टं पिशुनस्त्वभावम् ॥ ४५॥

बुधेन दृष्टोऽलिगत प्रसूते
जीवो युतं बन्दिजनेन नित्यम् ।
विरुद्धकर्मं परुषप्रतापं
सम्पादितं सर्वकलासु दक्षम् ॥ ४६ ॥

शुक्रेण दृष्टः प्रकरोति जीवो
जितेन्द्रियं जीवदयासमेतम् ।
प्रभूतलाभं विकृतैर्वियुक्तं
चतुष्पदग्रामधनैः समेतम् ॥ ४७॥

मन्देन दृष्टः सुरराजमन्त्री
करोतो मर्त्यं ज्वरपीडिताङ्गम् ।
मन्दालिसंस्थः प्रभया समेतं
बहुव्ययं शास्त्रविवर्जितं च ॥ ४८॥

चापाश्रितो देवगुरुः प्रसूते
सूर्येण दृष्टो गतमानभाजम् ।
स्वधर्महीनं परधर्मरक्तं
नानाविधैः कर्मसुखैर्विहीनम् ॥ ४९ ॥

चन्द्रेण दृष्टो हयगः प्रसूते
जीवो जनाढ्यं नियमैः समेतम् ।
यतिद्विजप्रव्रजितनुरक्तं ..........
मध्ये सदा तीर्थरतं प्रसिद्धम् ॥ ५० ॥

जीवो हयस्थः क्षितिजेन दृष्टो
नरं प्रसूतेऽतिखलं सपापम् ।
प्रपंचमायासहितं नितांतं
कृतापराधनं नृपसाधुलोकैः ॥ ५१ ॥

बुधेन दृष्टो हयगः सुरेज्यः
करोति मर्त्यं बहुसौख्ययुक्तम् ।
विनीतमत्यद्भुतलाभभाजन्
प्रभूतमूर्तिं सदयं च नित्यम् ॥ ५२ ॥

शुक्रेण दृष्टो हयगोऽथ जीवो
नरं सुवाते शुचिमन्तलाभम् ।

सत्यानुरक्तं सुखवृत्तगात्रं
सुरद्विजेन्दैः प्रणतं च तेषाम् ॥ ५३॥

चापाश्रितो देवगुरुः प्रसूते
सौरेण दृष्टः परदाररक्तम् ।
विहीनसत्यं मतिविप्रयुक्त-
मृणाधिकं व्याधियुतं तदन्तम् ॥ ५४॥

[ मृगेणसंस्थित सुरराजमन्त्री
सूर्येण दृष्टः चपलस्वभावं
वातादिपिडाभयमुग्रता च
स्वबान्धवैर्मित्रविरक्तता च ॥ ५५॥

चन्द्रेण दृष्टो मृगराशितांगवैः
गुरुर्ः प्रयुक्तो धन्लाभता च ।
मानं विवेकं स्वजनं सुखं च
शत्रुक्षयं देवगुरोश्च भक्तिम् ॥ ५६॥

जीवः प्रसूते मृगलग्नगे च
भौमेन दृष्टः कुरुते भयं च ।
शत्रुं विवादं निजबन्धुवैरं
वेश्यानुरक्तं मतिविभ्रमं च ॥ ५७॥

बुधेन दृष्टः प्रभुतासमेतं
च संस्थो मृगराशिकश्च ।
वाणिज्यदक्षं विविधं विलासं
क्षेत्राधिलाभं धनवल्लभं च ॥ ५८॥

शुक्रेण दृष्टः सुरराजमन्त्री
मृगेणसंस्थः द्विजदेवभक्तम् ।
वल्लभकामिनीनां
पुत्रैः मित्र..........च राज्यलाभम् ॥ ५९॥

मृगेणसंस्थः सुरराजमन्त्री
शौरेण दृष्टः भयमुग्रता च ।
जनापवादं नृपचौरकाग्नि
स्त्रीणां विवादे धनधान्यनाशम् ॥ ६०॥ ]

घटस्थितो देवगुरुः प्रसूते
सूर्येण दृष्तः सुतदारदुःखैः ।
सम्पीडिताङ्गं गतबुद्धिचिन्तं
विरक्तपौरं निजबन्धुहीनम् ॥ ६१॥

चन्द्रेण दृष्तो घटगः प्रसूते
सुरेज्यमन्त्री नयनाभिरामम् ।
अकल्पषं शास्त्रकथानुरक्तं
प्रियवदं साधुजनस्य नित्यम् ॥ ६२॥

भौमेन दृष्तो घटगः
करोति मर्त्यं बहुदानमुग्रम् ।
..........पेतविघ्नं कृपया विहीनं
विलज्जमत्युद्धतकामसक्तन ॥ ६३॥

बुधेन दृष्टो घटगः सुरेज्यः
करोति सिद्धा सहितं सनाचम् ।
नरं विशिष्टार्थपरं सुरूपं
सदानुकंपासहितं विधिज्ञम् ॥ ६४॥

शुक्रेण दृष्टो घटग सुरेज्यः
करोति मेधाविनमल्पभगम् ।
नरं निरीहं सततं सुदात्तं
मनस्विनं पार्थिवकार्यदक्षम् ॥ ६५॥

सौरेण दृष्तो घटगोऽथ जीवः
करोति रोगैर्विविधैः समेतम् ।
सुकर्मतप्तं प्रभुताविहीनं
विवर्जितं भोगनयैः सदैव ॥ ६६॥

जीवो ह्यषस्थो रविणा च दृष्तः
करोति नानाविधमुग्रतापम् ।
छर्दिप्रकोपं ज्वरदाह्युग्रं
महाभयं पार्थिवजं सदैव ॥ ६७॥

चन्द्रेण दृष्टः सुरपूजिताङ्गो
ह्यषस्थितः संजनयेन्मनुष्यम् ।

प्रियंवदं सत्यसुखार्थयुक्तं
स्त्रीणाम्भीष्टं रतिलालसं च ॥ ६८॥

भौमेन दृष्टो ह्यषगः प्रसूते
सुरेज्यमन्त्री ज्वरया समेतम् ।
महातिसारज्वरमीहिताङ्गं
मित्रेन युक्तं नयवर्जितं च ॥ ६९॥

बुधेन दृष्टः प्रकरोति जीवो
मीनस्थितः शौचपरं मनुष्यम् ।
प्रियातिथिं मानधनैः समेतं
विरागचिन्तं सुरविप्रभक्तम् ॥ ७०॥

शुक्रेण दृष्टो ह्यषगः उरेज्यो
नरं प्रसूते विविधार्थयुक्तम् ।
गुणाधिकं प्राणादयासमेतं
सदानुकूलं पितृमातृभक्तम् ॥ ७१॥

जीवो ह्यषस्थो रविपुत्रदृष्टो
नरं सुवाते विकृतस्वभावम् ।
विवर्जितं दारसुखेन नित्यं
विधाविहीनं सततं नृलोके ॥ ७२॥

इति श्रीवृद्धयवने गुरुदर्शनचारः ॥

आध्याय १४
शुक्रदर्शनचारध्यायः
मेषस्थितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टः कृपणस्वभावम् ।
नरं नितान्तं बहुकोपयुक्तं
विवादशीलं गुरुतल्पगं च ॥ १॥

चन्द्रेण दृष्टो भृगुजोऽजसंस्थो
नरं प्रसूते विनयार्थयुक्तम् ।
बहुप्रसादं रहितापवादं
नरेन्द्रकर्मोधतमेव नित्यम् ॥ २॥

भौमेन दृष्टः खलु मेषसंस्थः
शुक्रः प्रसूते विधनं मनुष्यम् ।
सम्पीडितं रक्तविकारशोकै
र्विराजितं नीचजनेन नित्यम् ॥ ३॥

मेषाश्रितः सोमसुतेन दृष्टः
शुक्रः प्रसूते सततं सुशीलम् ।
नरं नयज्ञं निजबन्धुपूज्यं
मनोज्ञरूपं प्रथितं विलोके ॥ ४॥

जीवेन दृष्टो भृगुजः प्रसूते
मेषं गतः सह्यमुदारचिन्तम् ।
महाप्रभावं विजितारिपक्षं
कृतत्चमोजस्विनमिष्टधर्मम् ॥ ५॥

सौरेण दृष्टः खलु मेषसंस्थो
नरं प्रसूते भृगुजः सकोपम् ।
विरुद्धचेष्टं खलु श..........उ........
क्षीणं कृशं बन्धुजनेन सक्तम् ॥ ६॥

वृषस्थितो भास्करदृष्ट एव
करोति शुक्रः प्रणतं सु.......... ।
नरं प्रजापूजितमद्धार्थं
प्रियंकरं साधुजनेन नित्यम् ॥ ७॥

चन्द्रेण दृष्टो भृगुजः प्रसूते
वृषं गतः कीर्तिधनैः समेतम् ।
नरं प्रगल्भं प्रणतारिपच्चं
श्रियाधिकं बान्धववल्लभं च ॥ ८॥

भौमेन दृष्टो भृगुजो वृषस्थः
करोति हीनं पशुवित्तदारैः ।
नरं सदा स्त्रीजितमुग्रवैरं
विवर्जितं भूमिपदातिलाभैः ॥ ९॥

बुधेन दृष्टो भृगुजो वृषस्थः

करोति बुद्ध्या सहितं सुसत्यम् ।
नरं सुदेहं बहुवित्तभाजं
पराक्रमप्राप्तयशोर्थमानम् ॥ १०॥

जीवेन दृष्टो भृगुजः प्रसूते
वृषं गतः कीर्तिधनैः समेतम् ।
नरं प्रगल्भं प्रणतारिपक्षं
श्रियाधिकं बान्धववल्लभं च ॥ ११॥

सौरेण दृष्तो भृगुजो वृषस्थो
नरं सुवाते गतपौरुषं च ।
वृद्धा विहीनं विकृतस्वभावं
विवर्जिताङ्गं विभवोत्थभोगैः ॥ १२॥

तृतीयराशौ भृगुजः प्रसूते
सूर्येण दृष्तो ज्वरपीडिताङ्गम् ।
गतानुरागं मलिनस्वभावं
प्रमादितं नीचजनैः सदैव ॥ १३॥

चन्द्रेण दृष्तो मिथुनेऽथ शुक्रो
नरं प्रसूते बहुभोगभाजम् ।
स्वभावशुद्धिं विनिघृष्तरोगं
जितेन्द्रियं नीतिविशारदं च ॥ १४॥

भौमेन दृष्तः प्रकरोति शुक्रो
राशौ तृतीये पुरूषं विरूपम् ।
रोगाभिभूतं बहुदैन्यभाजं
विवर्जितं मानधने.......... नित्यम् ॥ १५॥

बुधेन दृष्तो भृगुजः प्रसूते
तृतीयराशौ सुभगं मनोज्ञम् ।
प्रसिद्धवीर्यं गुणसत्ययुक्तं
प्रभावीनं सौख्ययुतं सदैव ॥ १६॥

जीवेन दृष्तः प्रकरोति शुक्रो
राशौ तृतीये धनवस्त्रलभम् ।
नरं कृतनं प्रचुरप्रभावं

सुसंयतं सर्वसुखैः समेत ......... ॥ १७॥

मन्देन दृष्तो भृगुजस्तृतीये
राशौ सुरोगाभिहतं मनुष्यम् ।
सदातुरं बान्धवपक्षतुष्टं
सदा विहीनं पतितस्वभावम् ॥ १८॥

कर्कस्थितो भार्गवजोऽर्कदृष्तः
कुर्यात् कुशीलं कृपणस्वभावम् ।
विवर्जिताङ्गं सुखभोगवस्त्रैः
प्रपीडितं बन्धुभिरेव नित्यम् ॥ १९॥

चन्द्रेण दृष्तो भृगुजस्तु कर्क
करोति मर्त्यं धनवाजियुक्तम् ।
सुसाधुसङ्गं प्रवरान्नपानं
हितं द्विजानां परमं प्रहृष्टम् ॥ २०॥

भौमेन दृष्तः प्रकरोति शुक्रः
कर्कथितः पुष्टियुतं मनुष्यम् ।
स्त्रीणामभीष्टं सुरदेवभक्तं
सुराक्षिताङ्गं विविधैश्च भृत्यैः ॥ २१॥

शिरोक्षिजिह्वागुदरोगयुक्तं
स्वभावपापं विनयेन हीनम् ।
बुधेन दृष्तः प्रकरोति शुक्रः
कर्कस्थितः सत्यविवर्जितं च ॥ २२॥

जीवेन दृष्तः प्रकरोति शुक्रः
कर्काश्रितो सत्यधनं प्रसूते ।
नरं विशिष्टान्वितसाधुचेष्टं
सदानुरक्तं यजनार्थदानैः ॥ २३॥

मन्देन दृष्तः प्रकरोति शुक्रः
कर्काश्रितस्तीव्ररुजासमेतम् ।
महारिपक्षं क्षुधयार्तदेहं
निसर्गमन्दं विगतप्रवंचम् ॥ २४॥

सिंहाश्रितः सत्यविहीनमेव
शुक्रः प्रसूते रविणा च दृष्टः ।
हृद्वेगशोकज्वरपीडिताङ्गं
नरं महादोषसमन्वितं च ॥ २५॥

सिंहाश्रितो दानवपूजिताङ्गो
दृष्टोऽथ चन्द्रेण नरं प्रसूते ।
सुतीर्थसेवानिरतं मनुष्यं
दत्तं पितृणां च सुधाविहीनम् ॥ २६॥

भौमेन दृष्टः प्रकरोति शुक्रः
सिंहाश्रितः शत्रुनिपीडिताङ्गम् ।
नरं दरिद्रं पिशुनाभिभूतं
निस्तेजसं पापविवर्जिताङ्गम् ॥ २७॥

बुधेन दृष्टः प्रकरोति शुक्रः
सिंहे सुखार्थं विजितारिपक्षम् ।
कुलस्वधर्मे परमं प्रहृष्टं
विवादयुक्तं नृपवल्लभं च ॥ २८॥

जीवेन दृष्टो भृगुजो विधत्ते
सिंहाश्रितः सत्यधनेन युक्तम् ।
नरं प्रगल्भं विभुतासमेतं
कृषिप्रभावाद्बहुसौख्ययुक्तम् ॥ २९॥

मन्देन दृष्टो भृगुजस्तु सिंहे
नरं प्रसूते सुखपुत्रहीनम् ।
विवर्जितं धर्मधनैश्च सत्यै-
र्गतप्रभावं सरुजं सदैव ॥ ३०॥

कन्याश्रितो भास्करदृष्टदेहो
नरं प्रसूते भृगुजः सुतीव्रम् ।
नयन हीनं गतमानसत्यं
स्वबन्धुमार्गेण बहिष्कृतं च ॥ ३१॥

कन्याश्रितो भर्गाव इन्दुदृष्टो
नरं सुवातं सहितं सुतार्थैः ।

पराक्रमाप्तैर्विधवैः समेतं
सुपूजितं साधुजनेन नित्यम् ॥ ३२॥

भौमेन दृष्टो भृगुजस्तु कन्ये
करोति मर्त्यं सरुजं सकामम् ।
सदा विरक्तं निजबन्धुवर्गै-
र्विहीनवित्तं बहुवैरयुक्तम् ॥ ३३॥

कन्याश्रितो दैत्यगुरुस्तु सौम्य-
दृष्टः प्रसूते सदयं सधर्मम् ।
मनोच्चदेहं बहुशास्त्ररक्तं
सदा सुशीलं .......... युक्तम् ॥ ३४॥

जीवेन दृष्टो भृगुजः प्रसूते
कन्याश्रितः सत्यमुदारचेष्टम् ।
नरं नितान्तं नृपमानभाजं
गतारिपक्षं निजवर्गसख्यम् ॥ ३५॥

मन्देन दृष्टो भृगुजः प्रसूते
कन्याश्रितः कान्तिविवर्जिताङ्गम् ।
नरं सुनीचं प्रणतं कृतघ्नं
विवर्जितं भूमिपमानदानैः ॥ ३६॥

तुलाश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टोऽडिभुजासमेतम् ।
करोति मर्त्यं बहुदैन्ययुक्तं
नयेन हीनं सततं कुरक्तम् ॥ ३७॥

चन्द्रेण दृष्टः प्रकरोति शुक्र-
स्तुलाश्रितः प्रीतमलोलुपं च ।
नरं प्रभासत्यविवेकयुक्तं
सुशिक्षितं सर्वकलासु नित्यम् ॥ ३८॥

भौमेन दृष्टो भृगुजस्तुलायां
करोति नीचैर्विजितं विशूलम् ।
नयेन हीनं विक्रिपासमेतं
नरं निरस्तं सुजनैः सदैव ॥ ३९॥

बुधेन दृष्टः प्रकरोति शुक्र-
स्तुलाश्रितः सौख्यनयेन युक्तम् ।
नरं प्रगल्भं प्रचुरप्रतापं
विपन्नरोगं प्रियदर्शनं च ॥ ४०॥

जीवेन दृष्टो भृगुजः प्रसूते
नरं सुसत्यं नृपकार्यदक्षम् ।
प्रभूतलाभं विजितारिपक्षं
जितेन्द्रियं बान्धववल्लभं च ॥ ४१॥

सौरेण दृष्टो भृगुजः प्रसूते
नरं सुदुष्टं कृपणस्वभावम् ।
मायाधिकं दम्भपरं विहीनं
धर्मेण सत्येन च पौरुषेण ॥ ४२॥

शुक्रोऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते मदनातिदेहम् ।
व्ययान्वितं पापरतं कृतघ्नं
व्यपेतलाभं गतपौरुषं च ॥ ४३॥

चन्द्रेण दृष्टोऽलिगतस्तु शुक्रो
नरं विधत्ते परमप्रभावम् ।
सदानुरक्तं द्विजदेवतानां
तपस्विनं शीलहनैः समेतम् ॥ ४४॥

भौमेन दृष्टह् प्रकरोति शुक्रो
नरं कृतार्थाभिहतं नृशंसम् ।
सदा कृतघ्नं कृतदोषसङ्गं
व्यपेतलज्जं सततं च रुद्धम् ॥ ४५॥

बुधेन दृष्टह् प्रकरोति शुक्रः
करोति मर्त्यं खलु वृश्चिकस्थः
बुद्धान्वितं प्रीतिकरं प्रसवं
सुतीर्थयुक्तं महिमाधिकं च ॥ ४६॥

जीवेन दृष्टोऽलिगतः प्रसूते

शुक्रः सुर्क्तं निवबन्धुवर्गैः ।
नरं निरीहं हतपापसङ्गं
गुणाश्रयं भूतिसमन्वितं च ॥ ४७॥

शुक्रोऽलिगः सूर्यसुतेन दृष्टो
मर्त्यं प्रसूतेऽतिधनैः समेतम् ।
प्रभूतकोशं विगतार्तिपापं
तीर्थानुरक्तं द्विजवल्लभं च ॥ ४८॥

चापाश्रितो दैन्यगुरुः प्रसूते
सूर्येण दृष्टः परदाररक्तम् ।
नरं व्ययैः पीडितमुग्ररोगं
सदा जितं दारनृपात्मजैश्च ॥ ४९॥

चन्द्रेण दृष्टः प्रकरोति शुक्र-
श्चापाश्रितो वस्त्रधनैः समेतम् ।
नरं सुदेहं गतपापदेहं
विचलणं धर्मकथासु नित्यम् ॥ ५०॥

भौमेन दृष्टो हयगः प्रसूते
शुक्रः कृतघ्नं विगतप्रभावम् ।
शिरोर्तिछर्दिज्वरदाहरोगैः
सम्पीडितं त्रासकरं नराणाम् ॥ ५१॥

बुधेन दृष्टः प्रकरोति शुक्रो
धनुर्धरस्थः प्रकरोति मर्त्यम् ।
प्रभूतलाभं सुधिया समेतं
धर्माधिकं साधुजनानुरक्तम् ॥ ५२॥

सुरेज्यदृष्टो हयगः प्रसूते
शुक्रः प्रसङ्ग प्रणतप्रगल्भम् ।
द्विजानरार्थं कृतकर्मसंघं
शान्तं महाशास्त्ररतं सदैव ॥ ५३॥

मन्देन दृष्टो भृगुजः प्रसूते
चापाश्रितो हानि ..........
नरं उतार्थैं रहितं कुरूपं

प्रधानवैरं मतिवर्जितं च ॥ ५४॥

मृगाश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टो भृणरोगयुक्तम् ।
नरं सुदोषान्वितमिष्टशात्रुं
विवेकहीनं गतसाध्वसं च ॥ ५५॥

चन्द्रेण दृष्टो भृगुजः प्रसूते
मृगाश्रितो मातृपितृप्रभुक्तम् ।
नरं सदा स्त्रीदयितं मनोज्ञं
मेधाविनं विद्यरतं सदैव ॥ ५६ ॥

भौमेन दृष्टो भृगुजः प्रसूते
मृगाश्रितोऽतिव्यसनैः समेतम् ।
गतारिं गतमानशौर्यं ..........
महाविपक्षं हतवत्सलं च ॥ ५७॥

बुधेन दृष्टः प्रकरोति शुक्रो
मृगाश्रितः साधुजने सुरक्तम् ।
धर्मस्वभावं बहुबुधिभाजं
नयाधिकं पार्थिववा..........अं च ॥ ५८॥

जीवेन दृष्टः प्रकरोति शुक्रो
मृगाश्रितो दारसुतार्थयुक्तम् ।
अनष्टदेहं विगतोद्यमं च
दयाधिकं पुण्यपरं नितान्तम् ॥ ५९॥

मन्देन दृष्टः प्रकरोति शुक्रो
नरं हसप्राप्यमनल्पदुःखम् ।
विहीनधर्मार्थयशोनुरागं
प्रद्वेषशीलं सततं द्विजानाम् ॥ ६०॥

घटश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टो भयशोकयुक्तम् ।
नरं निराहारतयाणुदेहं
श्लेष्माधिकं कीर्तिविवर्जितं च ॥ ६१॥

चन्द्रेण दृष्टो घटगस्तु शुक्रो
नरं प्रसूते नयनाभिरामम् ।
नरं हितं साधुजनस्य नित्यं
नरेन्द्रपूज्यं सततं सुखार्थम् ॥ ६२॥

भौमेन दृष्टो घटगश्च शुक्रो
नरं भयार्तं गतवित्तभोगम् ।
विहीनकोशं दयिताविहीनं
सुगुह्यरोगाभिहितं करोति ॥ ६३॥

बुधेन दृष्टो घटगोऽथ शुक्रः
करोति सत्याधिकमीष्टधर्मम् ।
प्रभूतमित्रं प्रचुरान्नपानं
नरं विनितं सुतसौख्ययुक्तम् ॥ ६४॥

जीवेण दृष्टः प्रकरोति शुक्रो
नरं प्रियैः संयुतमेव नित्यम् ।
घटस्यधान्यप्रवरैः समेतं
विशुद्धिभाजं गतपापसङ्गम् ॥ ६५॥

मन्देन दृष्टो घटगः प्रसूते
शुक्रः क्रियाहीनमनल्पशोकम् ।
विवर्जितं धर्मधनार्थसौख्यैः
सुदुष्टभावं सदयं सदैव ॥ ६६॥

मीनाश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टः प्रणमेन हीनम् ।
सुनिष्ठुरं कोपपरं सुदुष्टं
धर्मातिगं धर्मगुरुप्रभावम् ॥ ६७॥

चन्द्रेण दृष्टो ह्यषगः प्रसूते
शुक्रः सुरूपं सुभगं मनुष्यम् ।
देवेज्यसक्तं सुतमित्रहीनं
दयाधिकं पुण्यपरं सदैव ॥ ६८॥

भौमेन दृष्टः प्रकरोति मीने
शुक्रो विहीनं पशुपुत्रदारैः ।

विगर्हितं धर्मक्रियाविरक्तं
सरोगदेहं सततं कुचैलम् ॥ ६९॥

बुधेन दृष्टो ह्यषगो विधत्ते
शुक्रः सुरूपं विनयप्रधानम् ।
सदानुरक्तं द्विजलिङ्गिनां च
धर्मार्थभाजं गुरुभक्तियुक्तम् ॥ ७०॥

जीवेन दृष्टो भृगुजः प्रसूते
नरं प्रियं पुण्यधनैः समेतम् ।
सुतार्थविधाविभवैः समेतं
प्रजाधिकं सत्यपरं मनोज्ञम् ॥ ७१॥

सौरेण दृष्टः प्रकरोति शुक्रो
नरं ह्यषस्थः सुतसत्यहीनम् ।
चौरावनीशैर्हृतवित्तसारं
रोगातुरं बुद्धिविवर्जितं च ॥ ७२॥

इति श्रीवृद्धयवने शुक्रदर्शनचारः ॥

आध्याय १५
शनैश्चरदर्शनचारध्यायः
मेषं गतः सूर्यसुतो विधत्ते
सूर्येण दृष्टो विकृतानुरूपम् ।
प्रवासशीलं विजितं स्वदारै-
र्व्यपेतलज्जं बहुसाध्वसं च ॥ १॥

मेषं गतः सूर्यसुतो विधत्ते
चन्द्रेण दृष्टः सुनयं विहीनम् ।
नरं सुरूपं बहुलाभभाजं
गुणानुरक्तं बहुसाधुमित्रम् ॥ २॥

मन्दोऽथ मेषे क्षितिजेन दृष्टो
नरं प्रसूते ज्वरपीडिताङ्गम् ।
छर्दिप्रकोपप्रभवैश्च रोगैः
समन्वितं द्वेषकरं गुरुणाम् ॥ ३॥

बुधेन दृष्टो रविजोऽजसंस्थः
करोति बुद्धा सहितं मनुष्यम् ।
प्रसन्नदेहं नृपतेरभीष्टं
कृतश्रमोजोधिकमेव नित्यम् ॥ ४॥

शनैश्चरो मेषगतः प्रसूते
जीवेन दृष्टः प्रबरं प्रगल्भम् ।
नरं सुसत्यं सुभगं प्रशान्तं
सदानुकूलं द्विजबान्धवानाम् ॥ ५॥

शुक्रेण दृष्टो रविजः प्रसूते
मेषं गतः शास्त्रपथानुरक्तम् ।
प्रभूतमित्रं विजितारिपक्षं
सदानुगं साधुतपस्विनां च ॥ ६॥

वृषं गतोऽर्कि दिनपेन दृष्टो
नरं प्रसूते कठिनस्वभावम् ।
परानरक्तं विषयार्तदेहं
प्रपंचशीलं कुटिलस्वभावम् ॥ ७॥

वृषं गतः सूर्यसुतोऽर्थदुष्टं
करोति मर्त्यं शशिना च दृष्टः ।
सद्वस्त्रमन्नाशनभोजनं च
श्लाघ्यं सतां दम्भविवर्जितम् च ॥ ८॥

भौमेन दृष्टो गवि सूर्यसूनुः
करोति कीर्त्या रहितं मनुष्यम् ।
सुदुष्टभावं विधिना विहीनं
परान्नयोषिद्धनलालसं च ॥ ९॥

बुधेन दृष्टो गवि सूर्यपुत्रो
नरं प्रसूते कृषिवित्तभाजम् ।
नानासुपुण्यैः सहितं सुदानं
सतामभीष्टं सुरतैः समेतम् ॥ १०॥

जीवेन दृष्टो वृषगोऽथ सौरिः

करोति धर्माधिकमद्भुतर्थम् ।
नरं गुरुणां विनयप्रसक्तं
सदातिथिं दानपरप्रसक्तम् ॥ ११॥

शुक्रेण दृष्टो रविजः प्रसूते
हतारिपक्षं पितृमातृभक्तम् ।
मनोज्ञवस्त्रं सुतसौख्यभाजं
विवर्जितं पापजनेन मित्यम् ॥ १२॥

मन्दोऽर्कदृष्टो मिथुने प्रसूते
नरं कलत्राकुलितं सदैव ।
वि..........गिनं क्लेशरुजासमेतं
भयान्वितं बान्धववर्जितं च ॥ १३॥

चन्द्रेण दृष्टो रविजो मृयुग्मे
सतामभीष्टं जनयेन्मनुष्यम् ।
वि..........प्रतापार्थसिखैः समेतं
निसर्गविचानपरं सदैव ॥ १४॥

भौमेन दृष्टो रविजो नृयुग्मे
नरं प्रसूते विभवेन हीनम् ।
प्रभूतकोपं गुरुरोगभाजं
सदा कुशीलं विभवैर्विहीनम् ॥ १५॥

बुधेन दृष्टो रविजो नृयुग्मे
करोति सत्यं सुधिया समेतम् ।
नरं निधिग्रामपुरार्थभाजं
सुरूपदेहं नृपकार्यदक्षम् ॥ १६॥

जीवेन दृष्टो रविजो नृयुग्मे
नरं प्रसूते मणिविद्रुमाधैः ।
समन्वितं धर्मकथानुरक्तं
प्रियातिथिं शंसितमेव लोके ॥ १७॥

शुक्रेण दृष्टः प्रकरोति सौर-
स्तृतीयराशौ सततं धनाढ्यम् ।
नरं निलामं सुखसिद्धियुक्तं

महानुकंपं प्रणयप्रपन्नम् ॥ १८॥

कर्काश्रितः सूर्यसुतो विधत्ते
सूर्येण दृष्टः क्षतपीडिताङ्गम् ।
ज्वरातिसाराकुलमेव नित्यं
प्रद्वेषशीलं गतधर्मकृत्यम् ॥ १९॥

चन्द्रेण दृष्टो रविजः प्रसूते
कर्काश्रितः कीर्तिधनैरुपेतम् ।
नरं सुधर्मातिरतं प्रधानं
विवर्जितं नीचजनप्रसङ्गैः ॥ २०॥

भौमेन दृष्टो रविजः सुवाते
कर्काश्रितो घातपरं मनुष्यम् ।
देवादशीलं सततं वृथाढ्यं
मिथ्याधिकं कामपरं कृतघ्नम् ॥ २१॥

बुधेन दृष्टो रविजस्तु कर्के
हिरण्यरत्नैश्च युतं करोति ।
नरं निरीहं सुरलोकपूज्यं
महाजनैः सेवितमत्युदारम् ॥ २२॥

जीवेन दृष्टो रविजः सुवाते
कर्के गतः सर्वसुतैः सुमेतम् ।
विधानबुधिं पशुसङ्गयुक्तं
सदानुरक्तं द्विजबान्धवानाम् ॥ २३॥

शुक्रेण दृष्टो रविजः प्रसूते
कर्काश्रितो नितिपरं मनुष्यम् ।
सुरूपदारं हतपापवर्गं
जितेन्द्रियं सत्यकथानुरक्तम् ॥ २४॥

सिंहाश्रितो भास्करिरर्कदृष्टः
करोति कामाधिकमल्पधर्मम् ।
नरं विवेकाकृतिवर्जिताङ्गः
गुणैर्विहीनं परभक्तिकं च ॥ २५॥

चन्द्रेण दृष्टो हरिभेऽर्कसूनुः
करोति मर्त्यं परमार्थसख्यम् ।
नरं प्रधानं स्वकुलस्य मध्ये
मायाविहीनं शुभकर्मदक्षम् ॥ २६॥

भौमेन दृष्टः प्रकरोति मर्तुअं
सिंहस्थितोऽर्किस्तु रुजासमेतम् ।
विहीनवर्णं प्रचुरामयाढ्यं
नरं सदाकारविवर्जिताङ्गम् ॥ २७॥

बुधेन दृष्टो रविजः सुवाते
नरं सुदक्षं प्रियविप्रदेवम् ।
स्वबन्धुसौख्यं बहुदानभाजं
विषक्रियव्याकुलितं प्रधानम् ॥ २८॥

जीवेन दृष्टो रविजः सुवाते
सिंहाश्रितस्त्राणपरं द्विजानाम् ।
क्रियासमेतं वरतीर्थयुक्तं
विवर्जितं दुष्टसमागमेन ॥ २९॥

शुक्रेण दृष्टः प्रकरोति सौरः
सिंहस्थितो धान्यधनप्रधानम् ।
नरं सुविक्षं गुरुदानरक्तं
सुपूजिताङ्गं नृपसाधुवादैः ॥ ३०॥

कन्याश्रितः सूर्यसुतः प्रसूते
सूर्येण दृष्टः कफपित्तभाजम् ।
विधाविहीनमृणवृत्तिभाजं
विहीनधर्मं च खलं मनुष्यम् ॥ ३१॥

कन्याश्रितः सूर्यसुतः प्रसूते
चन्द्रेण दृष्टः प्रभया समेतम् ।
नरं सुधर्मानुरतं नितान्तं
स्वधर्मरक्तं प्रियसङ्गयुक्तम् ॥ ३२॥

कन्याश्रितः सूर्यसुतः सुवाते
भौमेन दृष्टोऽतिशृणं प्रसूते ।

नरं प्रधानैः परिहीनमानं
सुनिष्ठुरं पापरतं कुबुद्धिम् ॥ ३३॥

बुधेन दृष्टो रविजः सुवाते
नरं प्रशंसाभ्यधिकं सुरूपम् ।
जनेषु पूज्यं सुधिया समेतं
कुलप्रधानं बहुबुद्धियुक्तम् ॥ ३४॥

जीवेन दृष्टः प्रकरोति सौरिः
सदा सुशीलं भयवर्जिताङ्गम् ।
गुणानुगं चैव तु शास्त्ररक्तं
प्रभूतलाभं जनवल्लभं च ॥ ३५॥

शुक्रेण दृष्टः प्रकरोति सौरः
कन्यां गतः कान्तिधिया समेतम् ।
नरं हिरण्यार्थसमृद्धियुक्तं
प्रियं रतं पापजनानुषङ्गम् ॥ ३६॥

तुलास्थितो धर्मसुखं सुवाते
प्रभूतमित्रं प्रचुरान्नपानम् ।
सुरप्रियं ब्राह्मणदेवरक्तं
महाजनैः सेवितमिष्टभक्तम् ॥ ३७॥

चन्द्रेण दृष्टः प्रकरोति सौर-
स्तुलाश्रितः सत्यदयासमेतम् ।
प्रभूतवित्तं प्रचुरप्रभावं
हतद्विषं भृत्ययुतं सुरक्तम् ॥ ३८॥

भौमेन दृष्टः प्रकरोति मन्दः
सरोगयुक्तं विकृतानुकारम् ।
पित्तज्वरश्लेष्मभयार्तियुक्तं
दयाविहीनं गतमानलाभम् ॥ ३९॥

बुधेन दृष्टो रविजः सुवाते
तुलाश्रितो हस्तिहयार्थभाजम् ।
नरं विदग्धं नुतमेव लोकैः
सतामभीष्ट गुणवृद्धिरक्तम् ॥ ४०॥

जीवेन दृष्टः प्रकरोति मन्द-
स्तुलाश्रितो दानपरं मनुष्यम् ।
स्वभावसौख्यं क्षमया समेतं
पतिप्रियं धर्मविशारदं च ॥ ४१॥

शुक्रेण दृष्टः प्रकरोति मन्द-
स्तुलाश्रितः पार्थिवलाभभजन्
स्ववर्गपूज्यं परवर्गहीनं
दयाश्रितं शंसितमेव धीरैः ॥ ४२॥

मन्दोऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते कुटिलप्रभावम् ।
विरक्तपौरं परसेवयाढ्यं
नृशंसकर्माणमधर्मशीलम् ॥ ४३॥

चन्द्रेण दृष्टः रविजोऽलिसंस्थः
सुवीर्यविप्रैश्च धिया समेतम् ।
द्विजानुरक्तं विविधान्नपानं
सुरक्षिताङ्गं द्विजदेवकृत्यैः ॥ ४४॥

भौमेन दृष्टो रविजः प्रसूते
नरं सुतिक्षणं खलु वृश्चिकस्थः ।
सदातुरं रुद्रवपुर्नितान्त ..........
विदेशरक्तं सुरुजासमेतम् ॥ ४५॥

.......... ॥ ४६॥

जीवेन दृष्टः खलु वृश्चिकस्थो
मन्दो विधत्ते गुणमानयुक्तम् ।
नरं निरीहं सुतदारसौख्यैः
समन्वितं यज्ञविधानरक्तम् ॥ ४७॥

शुक्रेण दृष्टोऽलिगतश्च मन्दः
करोति लाभैः प्रचुरैः समेतम् ।
प्रियातिथिं वस्त्रविहीनभाजं
भयाधिकं कीर्तिधीया समेतम् ॥ ४८॥

चापाश्रितः सूर्यसुतः प्रसूते
सूर्येण दृष्टः परिहीनसत्यम् ।
नरं क्रियाहीनमुरुप्ररोगं
रुग्व्याकुलं शास्त्रमतेन हीनम् ॥ ४९॥

चन्द्रेण दृष्टः प्रकरोति मन्दो
नरं विशेषाचरितानुरक्तम् ।
सुधर्मशीलं बहुशास्त्ररक्तं
सुसंस्कृतं बान्धवभूमिपालैः ॥ ५०॥

चापाश्रितः सूर्ययुतो विधत्ते
भौमेन दृष्टः सुधिया समेतम् ।
सुनीतिरक्तं चतुरं प्रगल्भं
धनिप्रियं कान्तिविवर्जितं च ॥ ५१॥

बुधेन दृष्टो रविजः प्रसूते
चापाश्रितस्तीर्थकरानुरक्तम् ।
नरं विनीतं सुधिया समेतं
नृपप्रियं ब्राह्मणसंमतं च ॥ ५२॥

जीवेन दृष्टो रविजो विधत्ते
धनुर्धरस्थः सुतमित्रयुक्तम् ।
नरं धनाश्वप्रधनैः समेतं
सदा विहीनं कुजनागमेन ॥ ५३॥

शुक्रेण दृष्टो हयगः प्रसूते
शनिः सुदातारमलोलुपं च ।
नरं प्रतापप्रधनं प्रसह्यं
प्रभूतवित्तं सततं निरीहम् ॥ ५४॥

चन्द्रो मृगस्थो रविणा च दृष्टो
नरं प्रसूते तनयार्तियुक्तम् ।
विषादभाजं विजितं खलाद्यै-
र्वीर्येण हीनं सततं भयार्तम् ॥ ५५॥

चन्द्रेण दृष्टः प्रकरोति मन्दो

मृगाश्रितः प्राणयुतं मनुष्यम् ।
सुतार्थयुक्तं महीमासमेतं
विधानुरक्तं बहुवित्तभाजम् ॥ ५६ ॥

भौमेन दृष्टोऽर्कसुतो मृगस्थो
नरं विधत्ते घृणरोगभाजम् ।
विहीनपक्षं क्षतजार्तदेहं
प्रपंचशीलं भयसंयुतं च ॥ ५७॥

बुधेन दृष्टो मकरे प्रसूते
मन्दो विधिज्ञं परमं प्रदक्षम् ।
गुणाधिकं कीर्तिसुखैः समेतं
सदानुरक्तं द्विजबान्धवानाम् ॥ ५८॥

मन्दः सुरेज्येन मृगेऽपि दृष्टः
प्रभूतविन्तं जनयेन्मनुष्यम् ।
नरेन्द्रपूज्यं सुतसौख्ययुक्तं
सतां प्रियं शीलधनैः सदैव ॥ ५९॥

शुक्रेण दृष्टो मकरेऽर्कसूनुः
करोति मर्त्यं धनसौख्ययुक्तम् ।
तेजोधिकं सत्यमुदारदानं
चिन्तप्रसन्नं प्रणतं द्विजानाम् ॥ ६०॥

घटाश्रितो भास्करजः प्रसूते
सूर्येण दृष्टोऽथविहीनसत्यम् ।
विवर्जितं मानधनैः सुकृष्टैः
स्त्रीणां स्वभावं सुहृदप्रयुक्तम् ॥ ६१॥

चन्द्रेण दृष्टो घटगः प्रसूते
मन्दो विहीनं रिपुभिर्मनुष्यम् ।
धर्मह्वजं दानपरं गतारिं
सदानुरक्तं कृषिवित्तवर्गैः ॥ ६२॥

भौमेन दृष्टो घटगोऽर्कसूनु-
र्नरं प्रसूतेऽर्थधनं सदैव ।
शिरोर्तिपित्तज्वरजैर्विकारैः

क्रुद्धं विउद्धं गतसौहृदं च ॥ ६३॥

बुधेन दृष्टो घटगोऽथ मन्दो
नरं विधत्ते विधनं मनुष्यम् ।
सत्याधिकं विश्वविधानदक्षं
सुरक्षकं देवगुरुद्विजानाम् ॥ ६४॥

जीवेन दृष्टो घटगोऽथ मन्दो
नरं सुवातेऽर्थयशोनुरक्तम् ।
हितं गुरुणां निरुजं सदैव
प्रधानयुक्तं नृपकार्यदक्षम् ॥ ६५॥

शुक्रेण दृष्टो घटगोऽर्कसूनुः
करोति वित्तार्थयुतं मनुष्यम् ।
नरं गतार्थं घृणया समेतं
चरित्रशीलं सततं च दुष्टम् ॥ ६६॥

मीनस्थितः सूर्यसुतोऽर्कदृष्टो
नरं प्रसूते कठिनं कृतघ्नम् ।
विवेकहीनं गतबन्धुवर्गं
सुदीर्घसूत्रं गतमिष्ट.......... ॥ ६७॥

चन्द्रेण दृष्टो ह्यषगोऽर्कसूनु-
र्नरं प्रसूते विभवैः प्रधानैः
मुख्यं प्रगल्भं धनधान्यभाजं
विधाधिकं प्रीतिकरं जनानाम् ॥ ६८॥

भौमेन दृष्तो रविजः प्रसूते
मानाश्रितः शस्त्रभयार्तदेहम् ।
सरोगयुक्तं कृपणस्वभावं
पराजितं नीचजनेन नित्यम् ॥ ६९॥

बुधेन दृष्टः कुरुतेऽर्कसूनु-
र्मीनस्थितस्तीर्थव्रतैरुपेतम् ।
नरं प्रधानं स्वकुलस्य मध्ये
स्थिरस्वभावं गतपापरूपम् ॥ ७०॥

जीवेन दृष्टः प्रकरोति मन्दो
नरं सुवीर्याधिकमिष्तसत्यम् ।
लाभैः समेतं विविधप्रधानं
पुरोगवं बान्धवसज्जनानाम् ॥ ७१ ॥

शुक्रेण दृष्टः ह्यषगः  प्रसूते
मन्दोऽधिमन्दं सततं मनुष्यम् ।
सुधर्मशीलं विजितारिपक्षं
च्युतं त्रिलोके विविधप्रतापम् ॥ ७२ ॥

इति श्रीवृद्धयवने शनैश्चरदर्शनचारः ॥

---

आध्याय १६

ग्रहाणां भावाध्यायः

मूर्तिस्थितः संजनयेद्दिनेशो
नरं सरोगं विकलं महेर्ष्यम् ।
प्रभूतकोपं जडुशात्रुपक्षं
प्रभाविहीनं परतर्ककं च ॥ १ ॥

द्वितीयसंस्थः कुरुतेऽर्थहीनं
सूर्यः प्रसिद्धा रहितं कृतघ्नम् ।
श्रद्धाविहीनं विगतस्वभावं
कुमित्रयुक्तं परवाचकं च ॥ २ ॥

सूर्यस्तृतीयः कुरुते मनुष्यं
निरोगदेहं सुतबन्धुहीनम् ।
परोपकारं प्रणतं प्रसिद्धिं
विवेकविधाभ्यधिकं सदैव ॥ ३ ॥

चतुर्थगः संजनयेत् कृतघ्नं
हिंस्रं सदा शीलविवर्जिताङ्गम् ।
स्त्रीभिर्जितं युद्धपरं कुदेहं
विवर्जितं सत्यधनेन नित्यम् ॥ ४ ॥

सुतस्थितः स्वल्पसुत प्रसूते
दिवाधिनाथः प्रणयेन हीनम् ।

कुकृत्यरक्तं व्यसनाभिभूतं
पित्ताधिकं भूरिविपक्षयुक्तम् ॥ ५॥

रिपुस्थितो वासरपः प्रसूते
हतारिपक्षं पुरुषं सुरूपम् ।
विनीतवेषं सुजनैः समेतं
प्रियातिथिं बान्धवसंमतं च ॥ ६॥

कलत्रगस्तिक्ष्णकरः प्रसूते
कुरूपदेहं कुकलत्रभाजम् ।
कफानिलाभ्यां परिपीडितां
कामार्तदेहं गतसौहृदं च ॥ ७॥

.......... सूर्यः खलु ........
विदेशरक्तं पुरुषं प्रहीनम् ।
प्रपीडितं क्षुत्प्रभवैश्च रोगै-
र्जनानुरागेण विवर्जितं च ॥ ८॥

धर्माश्रितस्तीक्ष्णकरः प्रसीद्धं
करोति मर्त्यं नृपतेरभीष्टम् ।
परोत्थवित्तेन सदा समेतं
निरस्तधर्मं मतिवर्जितं च ॥ ९॥

कर्माश्रितो वासरपः प्रसूते
सुकर्मभाजं विनयैः समेतम् ।
प्रभूतमित्रं सुभगं सुकान्तं
नयाधिकं देवगुरुप्रभक्तम् ॥ १०॥

लाभाश्रितः संजनयेदिनेशः
प्रभूतलाभं सुभगं निरीहम् ।
सुभोजनाछादनवाहनाढ्यं
प्रियंवदं कामविचक्षणं च ॥ ११॥

व्ययाश्रितः संजनयेद्दिनेशो
व्ययैः समेतं कुजनोद्भवैश्च ।
प्रपीडितं वैरिभिरेव नित्यं
कुकर्मरक्तं कुजनं तथैव ॥ १२॥

मूर्तिस्थितो रात्रिपतिः प्रसूते
सम्पूर्णविंशः सुभगं सुकान्तम् ।
तीक्ष्णक्षयाङ्गं बहुपापयुक्तं
विहीनपक्षं गतसौहृदं च ॥ १३॥

द्वितीयसंस्थः कुरुते शशाङ्कः
कोशान्वितं सर्वसमृद्धियुक्तम् ।
प्रियंवदं ब्राह्मणदेवभक्तं
महाप्रभावं बहुसौहृदं च ॥ १४॥

ताराधिपः संजनयेत्तृतीयः
सुरूपदेहं सुभगं मनोज्ञम् ।
स्त्रीवल्लभं सर्वकलासु दक्षं
प्रजास्वभीष्टं बहुपुत्रपौत्रम् ॥ १५॥

सुखस्थितः संजनयेच्छशाङ्कः
प्रभूतसौख्यं पुरूषं प्रधानम् ।
स्त्रीणामभीष्टं गुरुदेवभक्तं
नयप्रधानं गतवैररोगम् ॥ १६॥

चन्द्रः सुतस्थः सततं प्रसूते
विद्याधिकं ब्राह्मणदेवभक्तम् ।
शुद्धस्वभावं विजितारिपक्षं
प्रियंवदं पार्थिववल्लभं च ॥ १७॥

षष्ठः शशाङ्कः कुरुतेऽल्पजीवं
रोगाधिकं शत्रुनिपीडिताङ्गम् ।
कुरूपदेहं कुधिया समेतं
सौख्यैर्विहीनं परवांचकं च ॥ १८॥

कलत्रगः संजनयेच्छशाङ्को
धर्मध्वजं भूरिदयासमेतम् ।
प्रसन्नमूर्तिं विभवान्वितं च
प्रख्यातकीर्तिं सुधिया समेतम् ॥ १९॥

चन्द्रोऽष्टमस्थः कुरूतेऽल्पवीर्यं

स्वल्पायुषं सत्यदयाविहीनम् ।
स्नेहैर्विहीनं परदाररक्तं
वृथाटनं बान्धववर्जितं च ॥ २०॥

धर्माश्रितः संजन्येच्छशाङ्कः
प्रभूतमित्रं प्रचुरान्नपानम् ।
प्रसिद्धियुक्तं प्रणतारिपक्षं
प्रशंसितं साधुजनेन नित्यम् ॥ २१॥

आकाशसंस्थः कुरुते शशाङ्को
भूपप्रियं बान्धवमानपुष्टम् ।
प्रियातिथिं प्रीतिकरं गुरुणां
सदैव भक्तं वरदेवतानाम् ॥ २२॥

लाभाश्रितः संनययेद्धिमांशुः
प्रभूतलाभं खलु शीतरश्मिः ।
सरूपदेहं सुजनानुरक्त-
मुदारचिन्तं हतशत्रुपक्षम् ॥ २३॥

व्ययाश्रितः शीतकरः प्रसूते
व्ययैरनिष्टैः सहितं कृतघ्नम् ।
वैरप्रधानं बहुशत्रुपक्षं
स्वल्पायुषं सत्यविहीनवेषम् ॥ २४॥

होराश्रितो भूतनयः प्रसूते
रक्तोत्थरोगैः परिपीडिताङ्गम् ।
पित्तानिलाभ्यां सहितं कुरूपं
विहीनशक्तिं मतिवर्जितं च ॥ २५॥

धनस्थितो भूतनयः प्रसूते
धनैर्विहीनं जनताविरुद्धम् ।
कठोरवाचानिरतं कुयुद्धिं
प्रभाविहीनं गतसौहृदं च ॥ २६॥

करोति भौमः सहजाश्रितश्च
निरोगदेहं विजयप्रधानम् ।
नरेन्द्रमानान्वितमिष्टधर्मं

प्रभूतकोपं सततं सुदान्तम् ॥ २७॥

सुखस्थितः संजनयेश्च वक्रः
सुखैर्विहीनं हतवीर्यमेव ।
सुबुद्धिहीनं गतबन्धुवर्गं
व्ययाश्रितं कामपरं मनुष्यम् ॥ २८॥

सुतस्थितः संजनयेश्च वक्रः
सुतैर्विहीनं पुरुषं सदैव ।
पापैः समेतं परतर्ककं च
विद्याविहीनं गतसौहृदं च ॥ २९॥

रिपुस्थितः संजनयेधतारिं
कुलप्रधानं प्रियदर्शनं च ।
संश्लाघितं साधुजनेन नित्यं
विनीतवेषं सततं सुशीलम् ॥ ३०॥

कलत्रसंस्थः क्षितिजः प्रसूते
विदेशभाजं कुकलत्रयुक्तम् ।
विवादशीलं बहुशत्रुपक्षं
नीचानुरक्तं प्रियसाहसं च ॥ ३१॥

मृत्युस्थितः संजनयेत् क्षितीजः
शस्त्रार्तदेहं प्रभया समेतम् ।
कुपार्थिवास..........ममित्रचेष्टं
कृपाविहीनं गतसौहृदं च ॥ ३२॥

धर्माश्रितः संजनयेत् कुधर्मं
भौमं कुमित्रं गतबन्धुवर्गम् ।
भाग्यैर्विहीनं विगताभिमानं
प्रतप्त मतिवर्जितं च ॥ ३३॥

कर्माश्रितो भूतनयः प्रसूते
कुकर्मरक्तं कुधिया समेतम् ।
जनाप्वादे निरतं कृतघ्नं
वृथाश्रमं बान्धवनिन्दितं च ॥ ३४॥

लाभाश्रितः पार्थिवलाभपुष्टं
नरं प्रसूते क्षितिपं सदैव ।
हतारिपक्षं निजबन्धुमान्यं
प्रशस्यशीलं प्रथिताभिमानम् ॥ ३५॥

व्ययाश्रितः संजनयेत् क्षितिजो
व्ययाधिकं भूरिरिपुप्रयुक्तम् ।
प्रभूतपापव्यसनैः समेतं
मर्षाधिकं धर्मविवर्जितं च ॥ ३६॥

तनुस्थितः सोमसुतः सुवाते
प्राज्ञधिकं मानिनमिष्टधर्मम् ।
महाप्रभावं वृजिनैर्विहीनं
गुणोत्कटं पार्थिवसंमतं च ॥ ३७॥

धनस्थितः संज्नयेच्छशाङ्कं
प्रभूतकोशं स्वजनानुरक्तम् ।
प्रियंवदं ब्राह्मणदेवभक्तं
मनस्विनं कीर्तिकर सदैव ॥ ३८॥

तृतीयगः सोमसुतः प्रसिद्धं
नरं प्रसूते प्रणतं विनीतम् ।
प्रभूतमित्रं प्रमदान्वभीष्टं
मायाप्रपंचैः रहितं निरीहम् ॥ ३९॥

बुधो विधत्ते बहुबुद्धियुक्तं
पातालगः पुष्टशरीरिणं च ।
कृषिप्रियालाभसुखं ..........
व्याधिप्रमुक्तं परमर्दनं च ॥ ४०॥

स्वल्पात्मजं संजनये
सुतस्थितः सोमसुतोऽल्पवीर्यम् ।
कीनाशमर्त्यं बहुपापसक्तं
क्षुधालिमिष्टैः परिवर्जितं च ॥ ४१॥

रिपुस्थितो भूरिरिपुं प्रसूते
बुद्धां विरुद्धं कलहप्रयुक्तम् ।

प्रियामिषं ब्राह्मणभक्तिहीनं
सदातुरं कामनिपीडितं च ॥ ४२॥

कलत्रगः सोमसुतः सुसत्यं
नरं प्रसूते लघुभोगभाजम् ।
पतिव्रताकान्तमभीष्टहीनं
परोपकारं प्रणतं सदैव ॥ ४३॥

रन्ध्रान्वितो रन्ध्रयुतं नितान्तं
बुधः प्रसूते सरुजं मनुष्यम् ।
कफानिलाभ्यं परिपीडिताङ्गं
कृशंविवर्णं कुलघातकं च ॥ ४४॥

भाग्याश्रितः सत्यगुणैः समेतं
चन्द्रात्मजः प्रीतिकरं मनुष्यम् ।
जितेन्द्रियं साधुजनानुरक्तं
कृषिप्रधानं च प्रगल्भमेव ॥ ४५॥

नभस्तलस्थः कुरुतेऽथ चन्द्रः
सुरूपदेहं सुभगं सुशीलम् ।
शय्यासनाच्छादनवाहनाढ्यं
स्त्रीणामभीष्टं सुनयान्वितं च ॥ ४६॥

आयस्थितः संजनयेनमनुष्यं
बुधो विवेकाढ्यमतीवकान्तम् ।
रोगप्रमुक्तं प्रथिताभिमानं
नृपक्रियाकृत्यविचक्षणं च ॥ ४७॥

व्ययाश्रितो भूरिदरिद्रभाजं
बुधः प्रसूते विषयप्रसक्तम् ।
पराभिभूतं निजबन्धुवर्गैः
कुरूपदेहं कुधिया युतं च ॥ ४८॥

जीवः प्रसूते तनुगः सुकान्तं
सौभाग्योपचितं दयालुम् ।
प्रसिद्धियुक्तं हतशत्रुपक्षं
सुकीर्तिकर्तारमतीव हृष्टम् ॥ ४९॥

कोशाश्रितः स्यात् सुरराजमन्त्री
सुवित्तदाता च सुखप्रदश्च ।
नाशाय पापस्य च शत्रुराशेः
परोपजातस्य च दूषणाय ॥ ५० ॥

तृतीयगो देवपतिप्रपूज्यो
मेधान्वितं संजनयेत् सुविश्वम् ।
कुलप्रधानं प्रमदानुमान्यं
प्रसिद्धमुर्वितलमण्डनं च ॥ ५१ ॥

सुखाश्रितः संजनयेत् सुसौ.........ं
देवेशमन्त्री नृपतेरभीष्टम् ।
प्रियातिथिं बान्धवलोकमान्यं
प्रभूतयानासनभोजनं च ॥ ५२ ॥

.......... सुरराज्मन्त्री
सुतस्थितः संजनयेन्मनुष्यम् ।
प्रख्यातियुक्तं प्रभया समेतं
प्रियंवदं ब्राह्मणसंमतं च ॥ ५३ ॥

षष्ठाश्रितो भूरिरिपुप्रयुक्तं
करोति मर्त्यं बहुरोगयुक्तम् ।
विदेशसेवानिरतं कृतघ्नं
सदैव सूते जडतासमेतम् ॥ ५४ ॥

सुरूपदारं सुमतिं सुशीलं
कामाश्रितो देवगुरुः प्रसूते ।
प्रख्यातकीर्तिं वृजिनेन हीनं
सत्याश्रितं देवगुरुप्रभक्तम् ॥ ५५ ॥

मृत्युस्थितो देवगुरुः प्रसूते
खलं  सुबुद्धा रहितं मनुष्यम् ।
विद्याविवेकागमद्भषकं च
प्रभाविहीनं परवंचनोक्तम् ॥ ५६ ॥

धर्माश्रितो देवगुरुः सुवाते

धर्ममिणं सत्यदयासमेतम् ।
नानाधणैः संयुतमिष्टबन्धुं
प्रतापीनं साधुजनप्रसक्तम् ॥ ५७॥

कर्माश्रितो देवगुरुः प्रसूते
सुकर्मभाजं जनताप्रधानम् ।
नरेन्द्रमान्यं प्रभुतासमेतं
देवद्विजानां निरतं निरीहम् ॥ ५८॥

लाभाश्रितो लाभपरं प्रसक्तं
सदैव सूतो सुररानमन्त्री ।
प्रभूतयानासनवित्तशंसा-
सुपूर्णहर्म्यं प्रमदाप्रियं च ॥ ५९॥

गुरुः प्रसूते व्ययगो मनुष्यं
विद्वेशशीलं परवित्तलुब्धम् ।
इर्ष्याधिकंपापजनानुरक्तं
कृशं कृतघ्नं परवंचकं च ॥ ६०॥

शुक्रस्तनुस्थः सुतनु प्रसूते
शास्त्रानुरक्तं प्रचितप्रभावम् ।
प्रियंवदं सर्वकलासु ..........
क्षतारिपक्षं विनयान्वितं च ॥ ६१॥

द्वितीयगो भार्गव एव धत्ते
धनं विचित्रं सुजननानुरागम् ।
सर्वणमुक्तामणिवस्त्रलाभं
विमुक्तरोगं हतपापचेष्टम् ॥ ६२॥

शुक्रम्तृतीयः प्रणतारिपक्षं
नरं प्रसूते सुसुतं सुदान्तम् ।
तेजविनं भूरिदयासमेतं
सुरूपगात्रं विनयान्वितं च ॥ ६३॥

सुखाश्रितो भार्गवनन्दनश्च
सुखानि सर्वाणि करोति नित्यम् ।
रोगक्षयं साधुजनेन सुख्य

सदानुरक्तं गुरुदेवतानाम् ॥ ६४॥

करोति शुक्रः खलु पंचमस्थः
सुतान् विचित्रान् प्रचुरप्रधानम् ।
वचातिमुख्यान् न च सर्वकालं
प्रभूतमन्यान् प्रचुरप्रभावान् ॥ ६५॥

षष्ठो भृगुः संजनयेत् कुरूपं
प्रज्ञाविहीनं जहताप्रधानम् ।
स्वल्पायुषं स्वल्पधिया समेतं
सत्यक्तशौचं निजभृत्ययुक्तम् ॥ ६६॥

कामाश्रितः संजनयेत् प्रसीद्धं
शुक्रः सुमूर्तिं सुकलत्रभाजम् ।
सत्याधिकं भूरिदयासमेतं
प्रशंसितं साधुजनैः सदैव ॥ ६७॥

शुक्रोऽष्टमस्थः कुरुतेऽल्पसत्यं
विदेशरक्तं व्यसनाभिभूतम् ।
स्वल्पायुषं बन्धुजनैर्विमुक्तं
सदारियुक्तं गुरुदेवकृत्यम् ॥ ६८॥

भाग्यस्थितः संजनयेन्मनुष्यं
भाग्यैः समेतं विविधैः सदैव ।
प्रभूतलाभं प्रचुराभिमानं
प्रसिद्धियुक्तं प्रणतारिपक्षम् ॥ ६९॥

शुक्रः प्रसूते खलु कर्मसंस्थः
सुकर्मभाजं सुधनं मनुष्यम् ।
सुशीलमाढ्यं सुसुतं सुतातं
सदैव सिद्धान्वितमिष्टधर्मम् ॥ ७०॥

आयस्थितो दैत्यगुरुः प्रसूते
प्रभूतमायुष्यमुदारचेष्टम् ।
कन्याप्रजं पार्थिवमानयुक्तं
भुप्रसिद्धं प्रभुतासमेतम् ॥ ७१॥

करोति शुक्रो व्ययगे मनुष्यं
व्ययाधिकं वीर्यविहीनचेष्टम् ।
कन्याप्रजं वित्तविहीनमुग्रं
विवर्जित शीलतनया च नित्यम् ॥ ७२॥

मन्दतनुस्थः कुरुते सुमन्दं
नीचाश्रयं पापक्थानुरक्तम् ।
रौद्राकृतिं रोगनिपीडिताङ्गं
विहीनसत्यं कुमतिं सदैव ॥ ७३॥

धनस्थितः सूर्यसुतः प्रसूते
धनैर्विहीनं बहुशत्रुभाजम् ।
नानाप्रकारैर्व्यसनैः समेतं
कृशं विवर्णं गतिवर्जितं च ॥ ७४॥

दीर्घायुषं सर्वकलास दक्षं
प्रसन्नचिन्त .......... ।
सौरस्तृतीयः कुरुते सुकर्यं
वित्तान्वितो ..........विवर्जितं च ॥ ७५॥

चतुर्थगः संजनयेन्मनुष्यं
शनैश्चरः सौख्यविवर्जिताङ्गम् ।
विदेशवासं च पराभिभूतं
सुदीनवृत्तिं निजबन्धुहीनम् ॥ ७६॥

करोति सौरः खलु पंचमस्थः
कुमित्रभाजं च कुमित्रयुक्तम् ।
विहीनकोशं विगतप्रतापं
विवर्जितं सर्वसुखेन नित्यम् ॥ ७७॥

सौरो रिपुस्थो विगतारिपक्षं
करोति मर्त्यं नृपतेरभीष्टम् ।
सद्भोजनाछादनयानयुक्त
स्वधर्मरक्तं सुधिया समेतम् ॥ ७८॥

कलत्रगः सूर्यसुतो विधत्ते
कुदाररक्तं कुधिया समेतम् ।

पापानुरक्तं विनयेन हीनं
कुसङ्गतिं शास्त्रविवर्जितं च ॥ ७९॥

मन्दोऽष्टमस्थो बहुमत्तयुक्तं
सदा प्रसूते विगतप्रभावम् ।
रक्तप्रकोपपेन निपीडिताङ्गं
धिया विहीनं परतर्ककं च ॥ ८०॥

धर्माश्रितः संजनयेत् सदार्किः
सत्यक्तधर्मं जनताविरुधम् ।
इर्ष्याधिकं वित्तधिया विहीनं
प्रभूतकोपं सुखवर्जिताङ्गम् ॥ ८१॥

शनैश्चरः कर्मगतः प्रसूते
सुकर्मभाजं सुकलत्रयुक्तम् ।
स्थिरस्वभावं सुनयप्रधानं
नरेन्द्रपूज्यं प्रचुरप्रतापम् ॥ ८२॥

शनैश्चरो लाभगतः प्रसूते
विचित्रलाभैः सहितं निरीहम् ।
शास्त्रानुरक्तं विजितारिपक्षं
प्रशंसितं साधुजनैः सदैव ॥ ८३॥

करोति सौरि व्ययगो विकोश-
मसद्व्ययं पापरतं कुमित्रम् ।
सदैव दीनं परपीडिताङ्गं
साधुप्रचारैः सकलैर्विहीनम् ॥ ८४॥

इति श्रीवृद्धयवने ग्रहाणां भावाध्यायः ॥

---

आध्याय १७
सूर्यचाराध्यायः

मेषं गतोऽर्कः समरप्रचण्डं
नरं प्रसूते धनवीर्ययुक्तम् ।
शास्त्रार्थवाक्कर्मसु लब्धशब्दं
जयैषिणं साधितमुच्छ्चेष्टम् ॥ १॥

वृषं गतोऽर्कः प्रियगन्धमाल्यं
मिष्टाशनाह्लादनलब्धसौख्यम् ।
सङ्गितविद्याभिरतं रतिज्ञं
नरं सुवाते बहुमित्रयुक्तम् ॥ २॥

बन्धुप्रियं साहसकर्मशिलं
मुखाक्षिरोगोपहतं सपापम् ।
तिष्ठन् तृतीये दिनकृत् प्रसूते
नरं शुभाचारगुणैः समेतम् ॥ ३॥

मेधाविनं वाङ्मधुरे विनीतं
नैपुण्यवाक्सत्यगुणैरुपेतम् ।
तिष्ठन् रविः कर्कटके मनुष्यं
करोति नानाविधसौख्यभाजम् ॥ ४॥

सिंहे तु सूर्यो जनयत्यरिघ्नं
नरं भृशक्रोधसुदारचेष्टम् ।
सत्याधिकं शौर्यविलब्धकीर्ति-
मुत्साहयुक्तं सततं बलाढ्यम् ॥ ५॥

कन्याश्रितो दुर्बलमल्पसत्यं
रविः प्रसूते मृदुदीनसत्त्वम् ।
स्त्रीतुल्यवीर्यं कृपणस्वभावं
निन्दानुरक्तं सततं गुरूणाम् ॥ ६॥

भृत्यक्षयार्तिं व्ययशोकतप्तं
प्रकृष्टनीचोपहतं प्रतीष्टम् ।
तुलाधरस्थो दिनकृन्मनुष्यं
करोति नीचं व्यसनाभिभूतम् ॥ ७॥

नित्यं प्रसूते मृतिधर्मशिलं
सूर्योऽष्तमस्थो वनितास्वभीष्टम् ।
नानार्थयुक्तं सुभगं मनुष्यं
नृपप्रसादप्तसुखं जितारिम् ॥ ८॥

धनुर्धरस्यो जनयेन्मुष्यं

सूर्यो नरेन्द्राभिमतं महान्तम् ।
शस्त्रार्थशिक्षानिपुणं निघृष्टं
प्राज्ञं सुनीतिव्यनहारदक्षम् ॥ ९॥

मृगाभिधाने सविता निविष्टो
विपन्नशीलं जनयेन्मनुष्यम् ।
अनीष्टकार्येषु सदानुरक्तं
मनोज्ञविद्वेषिणमल्पसत्त्वम् ॥ १०॥

तिष्ठन् रविः कुम्भधरे प्रसूते
नरं दृढद्वेषविरोधरोधम् ।
अनिश्चितं कर्मसु दुःप्रलापं
व्ययान्वितं पापपरं कृतघ्नम् ॥ ११॥

मीनाभिधाने सविता सुपुण्यं
कर्यान्मनुष्यं हतशत्रुपक्षम् ।
सुहृद्गुरुप्रीतिकरं सुवाक्यं
प्रसन्नशीलं बहुधर्मवित्तम् ॥ १२॥

होरं गतोऽर्कः प्रकरोति तीक्ष्णं
स्वपित्तरोगं स्वजनापमानम् ।
इष्टैर्वियोगं कलहं च दुःखं
धनक्षयं वैरवशं प्रसूतम् ॥ १३॥

होरां गतो रात्रिपतेर्दिनेशो
नरं विधत्ते सततं सुशीलम् ।
रोगैर्विमुक्तं विगतारिपक्षं
प्रियातिथिं बन्धुजनप्रधानम् ॥ १४॥

रोगाभिभूतं सविता करोति
नरं त्रिभागे प्रचुरं स्वकीये ।
हृद्विग्नचिन्तं परदेशभाजं
गतप्रतापं प्रबलं नितार्त्तम् ॥ १५॥

त्र्यंशे निधोर्वासरपः प्रसूते
धर्मिष्ठमिष्तं स्वजनैर्विपापम् ।
गीतप्रियं वाग्मिनमृद्धदारं

प्रभूतकोशं दयितं नराणाम् ॥ १६॥

दृकाणगोऽर्कौ धरणीसुतस्य
यदा प्रयातः प्रकरोत्ययारीन् ।
असृग्व्यथानीचसमागमं च
पुत्रार्थहानिं सततं नराणाम् ॥ १७॥

त्र्यंशं गतः सोमसुतस्य भानुः
स्वधर्मशिलं प्रकरोति मर्त्यम् ।
बिलासिनीकामपरं सदैव
विचित्रवाक्यं द्विजदेवभक्तम् ॥ १८॥

बृहस्पतेस्त्र्यंशभनुप्रयातो
भानुर्विधत्ते मनुजं विहीनम् ।
प्रियातिथिं सर्वगुणैः समेतं
मेधाविनं वाक्यविशारदं च ॥ १९॥

त्र्यंशस्थितो दैत्यपुरोहितस्य
भानुर्विधत्ते सुखिनं मनुष्यम् ।
स्त्रीवल्लभं देवगुरुप्रसक्त-
मारोग्य्देहं बहुसत्ययुक्तम् ॥ २०॥

दृकाणमर्कः प्रगतोऽर्कजस्य
पापं प्रसूते सरुजं कृतघ्नम् ।
नरं सुतापव्यसनोपतप्तं
सुशीलिनं बन्धुजनैर्विमुक्तम् ॥ २१॥

नवाम्शके स्वे सविता प्रसूते
नरं पराभूतमनासौख्यम् ।
कलिप्रियं बह्वृणमध्वशीलं
गतप्रभावं बहुरोगाजम् ॥ २२॥

नवांशके रात्रिपतेर्विवस्वां
करोति मर्त्यं स्थित एव दक्षम् ।
सुतान्वितं शानयशोधनाढ्यं
नृपप्रियं मुख्यतमं स्वपक्षे ॥ २३॥

कुजस्य भानुर्नवभागसंस्थो
दरिद्ररोगाभिहतं प्रसूते ।
निराकृतं दीनसुहृत्प्रकोपं
पापानुरक्तं क्षतजातिर्भाजम् ॥ २४॥

तिष्ठन् रविः सोमसुतस्य भांशे
..........आके वातभयं करोति ।
जितारिपक्षं सुतयानुरक्त
नरं सदा भोगसुखैः समेतम् ॥ २५॥

नवांशके देवपुरोहितस्य
तिष्ठन् रविः सत्यधनं प्रसूते ।
तपोनुरक्तं कृतिनामभिष्टं
जिन्तेन्द्रियं सर्वसुखाधिवासम् ॥ २६ ॥

इज्यान्वितं बन्धजनप्रधानं
विवेकिनं धर्मपरं जितारिम् ।
नवांशके दैत्यपुरोहितस्य
नरं प्रसूते सविता प्रगल्भम् ॥ २७॥

पराजितं निर्धनसत्यवीर्यं
कामान्वितं बन्धुजनैर्विमुक्तम् ।
शनेर्नवंशे सविता प्रसूते
नरं खलं दुर्गतिरोगभाजम् ॥ २८॥

सूर्यांशके स्वे सविता प्रसूते
नरं सुतीक्ष्णं परिभीतचिन्तम् ।
प्रभूतसेवं गतवीर्यर्पं
परैः सुदक्षं मतिभृद्विहीनम् ॥ २९॥

सूर्यांशके रात्रिपतेर्विवस्वान्
करोति सौम्यं शुभक्रमदक्षम् ।
विक्षाविनीतं सततं सुखाढ्यं
प्रसन्नचिन्त विभवैः समेतम् ॥ ३०॥

प्रियैर्विमुक्तं वधबन्धयुक्तं
पापनुरक्तं पुरुषं प्रसूते ।

सूर्यांशके भूतनयस्य भानु-
र्विहीनसत्यं परतर्ककं च ॥ ३१॥

सत्याधिकं सर्वसुखैः समेतं
प्रियातिथिं ब्राह्मणसंमतं च ।
सूर्यांशके सोमसुतस्य भानु-
स्तिष्ठन् प्रसूते मनुजं सनाथम् ॥ ३२॥

स्त्रीवल्लभः गीतकलासु दक्षं
भोगान्वितं वस्त्रविलेपनाढ्यम् ।
सूर्यांशके देवगुरोर्विनस्वान्
करोति सत्यं विनयप्रधानम् ॥ ३३॥

सुशिल्पिनं धर्मरतं सुदान्तं
प्रियातिथिं सर्वसंह सुपुत्रम् ।
सूर्यांशके दैत्यगुरोः सुवाते
भानुर्नरं पार्थिवमानयुक्तम् ॥ ३४॥

क्लीबं कृशं पापरतं कृतघ्नं
श्रियां विहीनं सततं कुचैलम् ।
करोति भानुर्बहुदुःखयुक्तं
सूर्यांशकस्यस्तु शनैश्चरस्य ॥ ३५॥

त्र्यंशल्लवस्थो धरणिसुतस्य
भानुर्विधत्तेऽधमल्पपुण्यम् ।
वित्ताधिवासे भृतकं कुशीलं
रोगाधिकं सह्यजनैः समेतम् ॥ ३६॥

त्र्यंशल्लवे सूर्यसुतस्य भानु-
र्नरं विधत्ते वृजिनानुरक्तम् ।
विहीनवित्तं परुषं कृतघ्नं
विदेशशीलं गतसौहृदं च ॥ ३७॥

त्र्यंशल्लवे देवपुरोहितस्य
करोति भानुः प्रणयप्रधानम् ।
यशस्करं शौर्यगुणैः समेतं
महाधनं शास्त्ररतं मनुष्यम् ॥ ३८॥

हिरण्यमुक्तामणिवस्त्रभाजं
स्त्रीणामभीष्टं सुरभक्तियुक्तम् ।
त्र्यंशल्लवस्थः शशिजस्य् भानुः
करोति मर्त्यं विगतारिपक्षम् ॥ ३९॥

त्र्यंशल्लवे दैत्यपुरोहितस्य
करोति सूर्यं सुभगं मनुष्यम् ।
नानार्थयुक्तं वरवाजिभाजं
निरोगकायं व्रतिनामभीष्टम् ॥ ४०॥

करोती भनुः सुहृदस्य वीर्यत्
प्रभूतमित्रं विजितारिपक्षम् ।
स्वबन्धुपूज्यं धनधान्ययुक्तं
पुत्रान्वितं ब्राह्मनसंमेतं च ॥ ४१॥

धीरं गुरुं सुप्रजमप्रभृष्यं
प्रभूतकोशं गजवाजिपुष्तम् ।
स्वक्षेत्रवीर्यः प्रकरोति भानु-
र्नरं सदा सत्यगुणैः समेतम् ॥ ४२॥

स्वतुङ्गवीर्यात् कुरुते दिनेशो
नरं प्रसिदं विजितारिपक्षम् ।
प्रियातिथिं पार्थिवमानयुक्तं
महाधनं नीतिपरप्रधानम् ॥ ४३॥

नवांशवीर्यप्रबलो विवस्वान्
नरं प्रसूते सततं मनोज्ञम् ।
विचित्रमाल्याभरणं सुखाढ्यं
प्रशान्तचिन्तं निरुजं सुशीलम् ॥ ४४॥

शुभग्रहालोकनवीर्ययुक्तो
भानुः प्रसूते निरुजं मनुष्यम् ।
सौभाग्ययुक्तं सुतलाभभाजं
नरेन्द्रपूज्यं द्विजदेवभक्तम् ॥ ४५॥

पुंराशितीर्थप्रबलो विवस्वान्

करोति भक्तं गुरुसद्द्विजानाम् ।
नरं विनीतं सुभगं मनुष्यं
धर्मान्वितं प्रीतिकरं शुशीलम् ॥ ४६॥

आशाबलाढ्यः सविता प्रसूते
नानार्थयुक्तं सततं मनुष्यम् ।
हस्त्यवमाल्यम्बररत्नयुक्तं
यशोन्वितं पार्थिवमानयुक्तम् ॥ ४७॥

चेष्टाबलाढ्यः प्रकरोति भानु-
र्नरं सुचेष्टानुगतिं गतारिम् ।
प्रभूतमित्रं गतसवेदुःखं
सुखान्वितं बान्धुसौख्ययुक्तम् ॥ ४८॥

करोति भानुर्दिनवीर्ययुक्तो
नरं प्रसिद्धं विनयेन युक्तम् ।
धर्मनुरक्तं प्रिय्वक्गुवाक्यं
सदानुकूलं दायेतं जनानाम् ॥ ४९॥

करोति भानुः स्वदीनस्यः वीर्याण्
नरं प्रगल्भं सुभगं सुकान्तम् ।
प्रभूतवित्तं प्रियमप्रधृष्यं
विद्वेषणां कीर्तिहरं नितान्तम् ॥ ५०॥

होरावताढ्यः प्रकरोति भानुः
प्रसिद्धेमत्युन्नतवीर्ययुक्तम् ।
नरं नृणामिष्टतमं सुवाक्यं
स्तुत्यं सदा बन्दिजनस्य मर्त्यम् ॥ ५१॥

दिनाहिपः पक्षबलेन पुष्टः
प्रभूतपक्षं पुरुषं प्रधानम् ।
सुचारुवाक्यं बहुकोशयुक्तं
विक्षाविनीतं सुभगं मनोज्ञम् ॥ ५२॥

मासाबलाढ्यः प्रकरोति भानु-
र्नरं विदग्धं धनवाजियुक्तम् ।
प्रभूतमित्रं रणलब्धशब्द

महाविनितं रतलालसं च ॥ ५३॥

दिनाधिपो वर्षबलेन युक्तः
करोति कृत्येष शुभेशु सक्तम् ।
नरं गतारिं गतदुःखशोकं
नित्यं सुपुष्टं द्विजदेवभक्तम् ॥ ५४॥

निस्त्रिंशचेष्टं पिशुनवभावं
परान्नरक्त कट्ःइनं दरिद्रम् ।
भानुर्यदा मित्रबलेन हीन-
स्तदा नरं कामपरं प्रसूते ॥ ५५॥

.......... ॥ ५६॥

.......... ॥ ५७॥

सूर्यो नवांशान्मकवीर्यहीनः
करोति मर्त्यं प्रियविग्रहं च ।
विषामिशस्त्रज्वरपित्तभाजं
पितुर्नन्या विकृतोपचारम् ॥ ५८॥

शुभग्रहालोकनवीर्यनः
करोति भानुः सुकृशं विरूपम् ।
हृद्रोगीणं बह्वटनं च मूर्खं
कृतापराधं सततं सभीतम् ॥ ५९॥

भानुर्विधत्ते नरवीर्यहीनः
शौर्येण हीनं बहुभिः समेतम् ।
पराजितं सर्वजनैः प्रहीन
सुतार्थयानैर्धनधान्यवस्त्रैः ॥ ६०॥

आशाबलप्रोझ्यत एव सूर्यः
सर्वासु दिक्ष प्रकरोति हानिम् ।
मिथ्याप्रलपं विदधाति बुद्धि-
पराङ्मुखं सद्विजदेवभक्तम् ॥ ६१॥

चेष्टाबलेन प्रविवर्जितोऽर्कः
करोति चेष्टां सततं सुनिन्द्याम् ।

नृणां तथा बुद्धिविपर्ययं च
विभूषितं साधुजनेन वैरम् ॥ ६२॥

दिवाबलेन प्रविवर्जितोऽर्कः
करोति मर्त्यं मनुष्यम् ।
हतप्रतापं स्वजनैर्विहीनं
पराङ्गनासेवकभ्युपेतम् ॥ ६३॥

स्ववारवीर्येण विवर्जितोऽर्कः
करोति मर्त्यं सततं कुचैलम् ।
विधर्मरक्तं बहुकूटभाजं
सुहृदिगुरूणां प्रसभं सुदुष्टम् ॥ ६४॥

होरबलेनैव विवर्जितोऽर्कः
करोति मूर्खं प्रणयेन हीनम् ।
विद्वेषियुक्तं परतर्ककं च
प्रज्ञाविहीनं प्रखलं मनुष्यम् ॥ ६५॥

दिनाधिपः पक्षबलेन हीनः
करोति मर्त्यं सततं सुदुःखम् ।
स्वपक्षहीनं विगतप्रतापं
मायाविनं निष्ठरवाक्यक्तम् ॥ ६६॥

सूर्यो यदा मासबलेन हीन-
स्तदा प्रसूते विकृतं मनुष्यम् ।
द्यूतक्रियानशितभूरिवित्तं
वेश्यानुरक्तं सुजनेन हीनम् ॥ ६७॥

बह्वाशिनं व्याधिभिरर्दिताङ्गं
चौरावनीशैः परिभूतमेव ।
दिनाधिपो वर्षबलेन हीनो
दारिद्र्ययुक्तं कुरुते मनुष्यम् ॥ ६८॥

इति श्रीवृद्धयवने सूर्यचार्ः ॥

आध्याय १८

चन्द्रचाराध्यायः

मेषे तु चन्द्रः पुरुषं प्रसूते
शुरं मुदासत्त्वबलैरुपेतम् ।
ख्यातं बहुस्त्रीयुतभृत्यवर्गं
प्रभाविणं त्यागिनमूर्जितं च ॥ १॥

वृषे शशि गर्वितमिष्टदारं
स्मिताल्पभाषं सुभगं प्रसूते ।
निजस्विनं बह्वशिनं सुखेषं
महाजनद्रव्यपरिग्रहं च ॥ २॥

चन्द्रस्तृतीये मधुराभिधानं
कार्याभिचारं निपुणं प्रसूते ।
..........
.......... ॥ ३॥

तिष्ठन् शशी कर्किणि कार्यधीरं
सुमेधसं वाग्विशदं प्रसूते ।
प्रियप्रदानं प्रियदर्शनं च
प्राज्ञं बहुश्चान्विकीर्णबुद्धिम् ॥ ४॥

सिंहे शशी सत्त्वबलोपपन्नं
नरं प्रसूते नरब्धमानम् ।
सिंहाननास्यं पृथुपीनकायं
मांस..........इयं दुःप्रसहं क्षुधालुम् ॥ ५॥

कन्यां समाश्रित्य शशी प्रसूते
नरं सुवाक्यं मधुरं विनीतम् ।
स्त्रीलाललितैः सुकुमारमूर्तिं
सुमेधसं साधनाभिरामम् ॥ ६॥

तुलाधस्थो जनयत्युदार
नरं शशी वाग्मतीसत्त्वयुक्तम् ।
मनस्विनं सात्त्विकमन्त्रेअशीलं
शुचिं विनीतं सुभगं सुरूपम् ॥ ७॥

निशकरो वृश्चिकगः समृद्धं

शूरं नरं साहसिकं प्रसूते ।
ख्यातं सतामीश्वरलब्धमानं
क्रूरं पराधातरुचिं प्रचण्डम् ॥ ८॥

धनुर्धरस्थो नृपलब्धमानं
चन्द्रः प्रसूते नरमुच्छवृत्तिम् ।
शूरं शुचिं सत्यपरं विनीतं
श्रीमन्तमाढ्यं गुरुदेवभक्तम् ॥ ९॥

तिष्ठन् प्रसूते मकरे शशाङ्को
नरं वनारण्यज्लाभिरामम् ।
सङ्गीतहास्यभीरतं सुवेषं
ख्यातं परस्त्रीरतिलोलुपं च ॥ १०॥

कुम्भे शशी रोषिणमल्पसौख्यं
सूते कृशं दुर्भरमल्पवित्तम् ।
बहुक्रियारम्भमजातमिष्टं
प्रद्विष्टबन्धुं गुरुवंचकं च ॥ ११॥

मीनद्वये प्रत्यधीनम् सुसत्यं
पाण्डित्यसामर्थ्यवरार्थयुक्तम् ।
ह्वीदानदाक्षिण्यपरं विनीतं
नरं शशी वाह्मधुरं प्रसूते ॥ १२॥

होरां गतोऽर्कस्य करोति चन्द्रो
नरं सकामं  वनिताजितं च ।
दोषात्मकं बन्धुजनैर्विमुक्तं
सव्याधिदेहं रिपुवर्गगम्यम् ॥ १३॥

होरां गतो रात्रिपतिर्यदा स्वां
तदा नरं शीलतरं करोति ।
स्वधर्मरक्तं नृपमानयुक्त
कृतशमुत्साहिनमप्रहृष्यम् ॥ १४॥

त्र्यंशे शशी वासरपस्य नित्यं
करोति पापं बहुशत्रुयुक्तम् ।
अल्पर्थसत्त्वं विगुणं हृतस्वं

दौर्भाग्यदेहं परदारलुब्धम् ॥ १५॥

करोति विशं बहुमित्रविन्तं
पुत्रान्वितं बन्धुजनैः समेतम् ।
त्र्यांशे स्वकीये सुखिनम् सुकान्तं
निशाहिपो मर्त्यमलंधिताशम् ॥ १६॥

त्र्यंशे शशाङ्को विचरन् कुजस्य
नरं प्रसूते विगतप्रतापम् ।
हीनक्रियं दुःखशतिरुपेतं
परार्थलुब्धं गतसौहृदं च ॥ १७॥

द्रेष्काणमाप्तः प्रकरोति चन्द्रः
सौम्यस्य सौम्यं सुभगं मनुष्यम् ।
मेधाविनं सर्वगुणैः समेतं
विधाविनं सर्वकलासु दक्षम् ॥ १८॥

त्र्यंशे गुरो रात्रिपतिः प्रसूते
शास्त्रानुरक्तं मनुजं सुशीलम् ।
नानासुहृत्संस्तुतमल्पकोपं
प्रियातिथिं देवगुरुप्रभक्तम् ॥ १९॥

सितस्य चन्द्रो विचरन् त्रिभागे
करोति मर्त्यं वरयानयुक्तम् ।
स्त्रीवल्लभं सत्यमुदारचेष्टं
कुलाधिकं पूज्यतमम् नृपाणाम् ॥ २०॥

शनेर्यदा त्र्यंशमुप्रयात-
श्चन्द्रस्तदा रोगिपमेव धत्ते ।
दीनं दरिद्रं विकृतं सपापं
महापदं निष्ठुरमव मर्त्यम् ॥ २१॥

नवांशके रात्रिपतिर्यदा स्यात्
सूर्यस्य दुष्टं मनुजं प्रसूते ।
स्त्रीचंचिन्तं पापमतिं सदैव
प्रणष्टवृद्धिं विजितं परैश्च ॥ २२॥

नवाम्शके स्वे प्रकरोति चन्द्रो
नरं सुरूपं सुभगं सुशीलम् ।
स्त्रीसंमतं सर्वगुणैः समेतं
विधाविनीतं जनवल्लभं च ॥ २३॥

नवांशके भूमिसुतस्य चन्द्र-
स्त्वसृग्रुगार्तं प्रकरोति मर्त्यम् ।
क्लीतं कृशं व्याधितमल्पसत्त्वं
श्रीदुर्भगं कामपरं सदैव ॥ २४॥

सौम्यय भागे नवमे शशाङ्कः
करोति सौम्यं सततं सुखाढ्यम् ।
नित्यं सुहृदेवगुरुप्रसक्तं ..........
महाधनं मण्डितमप्रमेयम् ॥ २५॥

गुरोनवांश विचरन् शशाङ्को
नरं प्रसूते बहुवित्तयुक्तम् ।
पुत्रान्वितं पुण्यधनिरुपेतं
प्रियात्थिं सर्वजनाभिरामम् ॥ २६॥

करोति मर्त्यं नयसत्यसारं
विधानिनीतं सुहृदां वरिष्ठम् ।
द्विजप्रियं रोगभयव्योपेतं
शुक्रस्य भागे नवमे शशाङ्कः ॥ २७॥

चन्द्रः शनेर्भागमनुप्रयातो
नवाख्यम्त्यन्तदुरुक्तवाचम् ।
नरं प्रसूते विकृतस्वभावं
परार्थलुब्धं व्यसनैः समेतम् ॥ २८॥

सूर्यांशकेऽर्कस्य निशाधिनाथो
..........नकं उःखयुतं म्नुष्यम् ।
प्रमादिनं मित्रजनैर्विहीनं
सुदीर्घसूत्रं सततं कृतघ्नम् ॥ २९॥

सूर्यांशके स्वे प्रकरोति चन्द्रो
धनान्वितं वाह्मिनमल्पशत्रुम् ।

नरं नितान्तं शुभपुत्रयुक्तं
सुवाहनाढ्यं परपक्षहीनम् ॥ ३०॥

सूर्यांशके भूमिसुतस्य चन्द्रः
करोति नित्यं बहुसौख्ययुक्तम् ।
विचक्षणं भोगयुतं सुवेषं
सुधर्मशीलं सततं सुशीलम् ॥ ३१॥

सूर्यांशके सोमसुतस्य सोमः
सौम्यं प्रसूते सुखिनं मनुष्यम् ।
शिल्पज्ञमत्यद्भुतकर्मयुक्तं
प्रियातिथिं विश्रुतमेव नित्यम् ॥ ३२॥

सूर्यांशके देवपुरोहितस्य
नरं सुवेषं प्रकरोति चन्द्रः ।
नृपप्रसादं विनयैः समेतं
सुचित्रपानं बहुमित्रयुक्तम् ॥ ३३॥

सूर्यांशके भार्गवनन्दनस्य
नरं विनीतं प्रकरोति चन्द्रः ।
नृपप्रसादैः प्रचुरैः समृधं
हस्त्यश्वयुक्तं प्रचुरान्नपानम् ॥ ३४॥

शनैश्चरस्यार्कविभागसंस्थो
विधुर्विधत्ते च सपत्नयुक्तम् ।
कीनाशमालस्यतमं नितान्तं
स्वबन्धुवर्गैः परिपीडितं च ॥ ३५॥

त्रिंशल्लवे भूमिसुतस्य चन्द्रः
श्रद्धाविहीनं कुरुतेऽतिकौलम् ।
मलिम्लुचं नीचजनानुरक्तं
रक्तार्दितं कोपपरं सुजिह्मम् ॥ ३६॥

त्रिंशद्विभागेऽकसुतस्य चन्द्रो
विरूपदेहं मुखरं करोति ।
ब्रह्माशणं स्थूलत्वचं सुजिह्मं
परापवादे निरतं सदैव ॥ ३७॥

त्रिंशल्लवे रात्रिपतिर्यदा स्या-
न्मेधाविनं चैव तदा प्रसूते ।
जीवस्य मर्त्यं भुवि लब्धकीर्तिं
श्रियाधिकं पार्थिववल्लभं च ॥ ३८॥

त्रिंशांशके सोमसुतस्य मर्त्यं
चन्द्रः प्रसूते शुचिमप्रमन्तम् ।
स्त्रीवल्लभ गीतकलास्यु ..........
प्रियातिथिं नित्यमुदारचेष्ठम् ॥ ३९॥

त्रिंशांशकस्थो विधुराधत्ते
शुक्रस्य मर्त्यं बहुवीर्ययुक्तम् ।
सुपुण्ययुक्त हययानयुक्त..........
दयाधिकं सत्सु सदानुरक्तम् ॥ ४०॥

सुहृद्बलाच्छीतमयूखमाली
नरं विधत्ते बहुमित्रयुक्तम् ।
सुहृत्प्रियं पार्थिवमानपुष्टं
सुधाधिकं साधुतरं सलज्जम् ॥ ४१॥

स्वस्थानवीर्येण युतः शशाङ्को
नरं विधत्ते वनितासमृद्धम् ।
स्वथानपूज्यं पतिसङ्गरक्तं
नित्यं प्रशान्तं त्वृतवाक्यमेव ॥ ४२॥

स्वतुङ्गसारेण युतः शशाङ्कः
प्रोत्तुङ्गकर्माणमहीनसत्त्वम् ।
नरं प्रसूते विजदेवभक्तं
बह्वश्वयुक्तं सततं समृद्धम् ॥ ४३॥

नवांशपुष्टः प्रबलः शशाङ्को
नरं विधत्ते सुतयानयुक्तम् ।
रोगैर्विमुक्तं सुकुमारदेहं
भोगाधिकं सर्वकलासु दक्षम् ॥ ४४॥

शुभग्रहालोकनसारयुक्त-

चन्द्रो भयैर्वर्जितमुत्तमम् च ।
हस्त्यश्वयुक्तं पुरुषं प्रसूते
शूरं महोत्साहिनमृधिमन्तम् ॥ ४५॥

स्त्रीक्षेत्रवीर्यात् प्रबलाच्छशाङ्कः
कुर्याज्जितरातिगणं गुणाढ्यम् ।
बह्वन्नवित्तं प्रमदास्वभीष्टं
मर्त्यं महालोकयुतं करोति ॥ ४६॥

आशाबलाद्रात्रिपतिर्जितारिं ..........
स्वबन्धुमान्यं सुधृतं सुलज्जम् ।
महाधन सर्वगुणाधिवास ..........
स्त्रीवल्लभं मानधनं करोति ॥ ४७॥

चेष्टाबलाढ्यो बहुमित्रकोशं
चन्द्रो विधत्ते निरुजं मनुष्यम् ।
भृत्याधिल सत्यरतं ..........
नित्यं सुराराधनतत्परं च ॥ ४८॥

निशाबलाढ्यः प्रबलः शशाङ्को
नरं प्रसूते धुतितेजयुक्तम् ।
वस्त्रान्नपानैर्विविधैरुपेतं
सौभाग्यवन्तं बहुदानशीलम् ॥ ४९॥

करोति चन्द्रः स्वदिनोद्भवेन
युक्तः प्रसक्तं सततं मनुष्यम् ।
मित्राधिकं सौम्यवपुः प्रसिद्धं
नानार्थवृध्या   परिपुष्टवित्तम् ॥ ५०॥

होराबलाढ्यो विषमार्गदक्षं
गुरुप्रियं गीतरतं सुकान्तम् ।
महासहिष्णुं कृषिकर्मयुक्तं
चन्द्रः प्रसूते सुतकन्यकाढ्यम् ॥ ५१॥

हिमद्युतिर्मासबलेन कुर्यात्
क्रियान्वितं कल्पतरुं समृद्धम् ।
शिल्पाधिकं कीर्तिकरं सुदारं

प्रियातिथिं तुष्टिपरं नयज्ञम् ॥ ५२॥

बन्दिस्तुतं वर्षबलाच्छशाङ्को
नरं प्रसूते शुभकर्मरक्तम् ।
दिव्याङ्गनाभोगरसानुरक्तं
सत्त्वाधिकं पापजनैर्विमुक्तम् ॥ ५३॥

चन्द्रः सुहृद्वीर्यविहीनमुर्तिः
करोति दीनं परतर्ककं च ।
सुदीर्घसूत्रं व्यसनैरुपेतं
हितार्थशक्तिं पुरुषं सदैव ॥ ५४॥

स्वस्थानवीर्येण विहीनमूर्ति-
..........ईनरतं सुवाते ।
पराभवाढ्यं नृप्मानहीनं
कृशं विवेर्णं कुसुहृत्समेतम् ॥ ५५॥

तुङ्गवीर्येण विवर्जितस्तु
चन्द्रः प्रसूते कृपणं मनुष्यम् ।
नीचानुरक्तं परहीनसत्त्वं
प्रकीर्णकामं बहुशोकभाजम् ॥ ५६॥

नवांशवीर्येण विवर्जितस्तु
नयेनहीनं पुरुषं शशाङ्कः ।
करोति दुष्टं च तथा कृतघ्नं
भीरुं रुजार्तं नृपपीडितं च ॥ ५७॥

शुभग्रहालोकनहीनमूर्तिः
करोति चन्द्रः सततं कुरूपम् ।
कुचलसुग्र कृपणस्व ..........ं
पापानुरक्तं सुभुजं सदैव ॥ ५८॥

स्त्रीक्षेत्रवीर्येण यदो विहीन-
स्तदा शशाङ्कः प्रकरोति पापम् ।
दौर्भाग्यक्तं द्विजभक्तिहीनं
विहीनशक्ति परिपीडितं च ॥ ५९॥

चन्द्रो दिशावीर्यविवर्जितश्च
विदेशरक्तं प्रकरोति मर्त्यम् ।
वृथाटनं दुर्भगमल्पकृत्यं
कृपाविहीनं सुतमित्रहीनम् ॥ ६० ॥

चेष्टाबलेनैव विवर्जितस्तु
चन्द्रः प्रसूते सततं कुचेष्टम् ।
विद्वेषभाजं परदाररक्तं
नित्यं खलं पार्थिवमानहीनम् ॥ ६१ ॥

चन्द्रो निशावीर्यबलेन हीनः
करोति नेत्रोद्भवरोगयुक्तम् ।
चौरप्रमृष्टार्थचतुष्पदाढ्यं
स्त्रीलोकनिन्ध विकलं खलं च ॥ ६२ ॥

स्ववारवीर्येण विवर्जितस्तु
करोति चन्द्रो बहुहानियुक्तम् ।
सेवारतं धर्मसुखैर्विहीनं
परान्नभोक्तारमनल्पदोषम् ॥ ६३ ॥

होराबलेनैव विहीनमूर्ति-
श्चन्द्रस्तु मूर्खं मनुजं प्रसूते ।
सङ्कष्टभाजं सुविहीनकोश
सुहृज्जनैस्त्यक्तमरिप्रधानम् ॥ ६४ ॥

चन्द्रो यदा मासबलेन हीन-
स्तदा प्रसूते विकृतं मनुष्यम् ।
सुमन्दभाग्यं विजितं परैश्च
प्रमादिनं मन्दगतिं कृतघ्नम् ॥ ६५ ॥

चन्द्रो यदा वर्षबलेन हीन-
स्तदा सुवाते धनधान्यहीनम् ।
मर्त्यं सुभीरुं विजितं गतार्थं
पराभवैकास्पदमेव नित्यम् ॥ ६६ ॥

इति श्रीवृद्धयवने चन्द्रचारः ॥

आध्याय १९

भौमचाराध्यायः

मेषे तु भौमो रभसं प्रचण्डं
शुरं नरं साहसकर्मशीलम् ।
तेजस्विनं सात्त्विकमुग्रधृष्यं
दुर्मषणं दिनपरं प्रसूते ॥ १॥

वृषे स्वबन्धुप्रतिबुद्धवैरं
भौमः पुत्रोत्साहकरं प्रसूते ।
सुदुष्टशीलं बहुदुःप्रलापं
प्रभक्षणे मन्दधनात्मजं च ॥ २॥

सन्तुष्तमानो मिथुने प्रसूते
भौमो मनुष्यं बहुलप्रवासम् ।
नानार्थशिल्पासु कलासु दक्षं
बहुश्रुतं वाक्यतिशारदं च ॥ ३॥

स्थितः कुजः कर्कतके कृशार्थं
कुर्वीत वैकल्परुगार्दिनं च ।
पुनः पुनर्वर्धितनिःकृताथ
नरं परावेशनविश्रुतं च ॥ ४॥

अङ्गारकः सिंहमुपेत्य सूते
नरं वपुष्मन्तमुदग्रसत्त्वम् ।
अमर्षिणं शूरमतिप्रचण्डं
परप्रहर्तारमसंशयं च ॥ ५॥

कन्यां गतो लोहितमूर्तिरा
पूज्यं सतामार्जवमल्पशौर्यम् ।
प्रियप्रतापं परगीतदक्षं
नरं प्रसूतेविविधव्ययं च ॥ ६॥

तुलाधरस्यस्तु कुजोऽध्वशीलं
प्रसक्तवाक्यं जनयत्यनिष्टम् ।
विकत्थनं बह्वनृतं कुपुण्य

हीनाङ्गमुत्सादितपूर्वमित्रम् ॥ ७॥

भौमोऽष्टमे पापमतिं कुवृत्तं
कर्यान्नरं बह्वपराधवैरम् ।
शठं वधद्रोहकृतानुबन्ध-
माचारसत्यं भृतधर्मशीलम् ॥ ८॥

होरां गतो धन्विनि लोहिताङ्गो
बहुक्षतं क्षीणतनुं प्रसूते ।
शठं नरं निष्ठरवाक्यशीलं
विपन्नदारात्मजमस्वतन्त्रम् ॥ ९॥

मृगे तु भौमः सुखिनं सुकान्तं
निरन्तरं श्रेष्ठतमम् प्रसूते ।
धन्यं धनोपार्जणतो रमाढ्यं
चमूपतिं वा मनुजेश्वरं वा ॥ १०॥

कुम्भे तु भौमो विकृतं मनुष्यं
सूते नरं दुर्भगदर्शनं च ।
पैशून्यवादानृतवंचनादि-
दोषैरजस्त्रोपहतं मनुष्यम् ॥ ११॥

तिष्ठन् कुजो मीनगतो रुजार्तं
प्रवासिनं मन्दसुतं प्रसूते ।
बहुद्विजाभ्यर्थनवंचनादि-
विपन्नसर्वस्वमतिक्ष्णरागम् ॥ १२॥

होराश्रितो वासपस्य भौमो
वधप्रियं साहसकर्मशीलम् ।
नरं सुवाते बहुरोगयुक्तं
पित्ताश्रितं तप्ततनुं नितान्तम् ॥ १३॥

होराश्रितो रात्रिपतेर्महीजः
करोति मर्त्यं विनयेन युक्तम् ।
भोक्तारमाढ्यं व्यवहारशीलं
गतप्रसूतं विगतारिपक्षम् ॥ १४॥

मुखाशिरोगोपहतं सुशीलं
स्वल्पात्मजं क्लेशपरं खलं च ।
त्र्यांशे कुजो वासरपस्य तिष्ठन्
करोति मर्त्यं विगतप्रतापम् ॥ १५॥

क्रूरं खलं द्वेषिणमिष्टधर्मं
ख्यातं नृपाणां स्वगुणैरुदारैः ।
त्र्यंशे चरन् रात्रिपतेर्नहीजो
नरं प्रसूते विगतारिपक्षम् ॥ १६॥

स्वत्र्यंशभागे विचरन् महीजो
दुःखं प्रसूते विकृतं मनुष्यम् ।
सरह्यरागातमसश्च सख्यं
विद्वेषीणं साधुजनस्य नित्यम् ॥ १७॥

द्रेष्काणके स्वे विचरन् महिजः
करोति मर्त्यं बहुरोगयुक्तम् ।
परान्नरक्त प्रचुरप्रकोपं
गतप्रताप सततं कुशीलम् ॥ १७अ॥

त्र्यंशे कुजः सोमसुतस्य तिष्ठन्
गम्भीरसत्त्वस्थितिमृद्धिमन्तम् ।
नरं प्रसूते बहु .......... उ ........
नरेन्द्रसन्मानसमन्वितं च ॥ १८॥

त्र्यंशे गुरोर्भूमिसुतः प्रसूते
नरं विदग्धं प्रथितं कुवेषम् ।
सुश्रूषकं देवगुरुद्विजानां
..........चिन्तं मतिमन्तमेव ॥ १९॥

त्र्यंशे कुजो भार्गव ..........
नरं प्रसूते वनितास्वभीष्टम् ।
हिरण्यलोहप्रधनं प्रसिद्धिं
क्रियासु चाभिप्रयतं प्रगल्भम् ॥ २०॥

नवांशके वासरपस्य भौमो
लुब्धं कुयोषिद्गतसङ्गवित्तम् ।

तिष्ठन् विधत्तेऽल्पसुखं मनुष्यं
हृद्रोगिणं बह्वशनं शठं च ॥ २२॥

नवांशकस्यः प्रकरोति भौम-
श्चन्द्रस्य कान्तासुखमानयुक्तम् ।
सुहृद्द्विजातिच्यपरं प्रशान्तं
पूज्यं सतां बन्धुहिते रतं च ॥ २३॥

नवांशके स्वे विचरन् महीजः
करोति मर्त्यं बहुरोगयुक्तम् ।
परान्नरक्त प्रचुरप्रकोप
गतप्रतापं सततं कुशीलम् ॥ २४॥

बुधस्य भौमः प्रचरन्नवांशे
करोति मर्त्यं प्रणतं द्विजानाम् ।
द्रव्यान्वितं धीरमुदारसत्त्वं
विस्तीर्णसत्त्वं सुभगं सुखाढ्यम् ॥ २५॥

गुरोनवांशे विचरन् महीजः
करोति मर्त्यं विविधान्नपानम् ।
शूरं प्रचण्डं रणरङ्गरक्तं
गतद्विषं यानवरैः समेतम् ॥ २६॥

शुक्रस्य भागे नवमे तु भौमः
करोति मर्त्यं रतिलुब्धसौख्यम् ।
सुहृद्गुरुप्रीतिकरं सुवाक्यं
सुसाधरक्तं बहुभृत्ययुक्तम् ॥ २७॥

शनेर्नवांशे विगतो महीजे
नरं सुवाते बहुपापयुक्तम् ।
गुह्याशिरोगोपहतं सुदुष्तं
प्रियाविहीनं परतर्ककं च ॥ २८॥

पतिप्रियं कूटरतं कुशिलं
चरस्थित बह्वृणबन्धनं च ।
सूर्यांशके वासरपस्यं भौमो
नरं प्रसूते विदेधूर्तचेष्टम् ॥ २९॥

सूर्यांशके रात्रिचरस्य भौमो
नरं प्रसूते सुवपुः सुकान्तम् ।
प्राचं बहुभ्रातरमूर्जितं च
.......... ॥ ३०॥

द्वादशांशे विचरन् महिजः
स्त्रीदुर्भगं प्रेष्यकमस्वतन्त्रम् ।
स्त्रीरूपतुल्याकृतिकर्मयुक्त-
मसृग्रुगार्तं व्यसनैः समेतम् ॥ ३१॥

व्यायामशय्याम्बरभूषणाढ्यं
ख्यातं स्थिरस्फीतवराङ्गनं च ।
सूर्यांशके सोमसुतस्य भौमो
नरं प्रसूते नृपपीडितस्वम् ॥ ३२॥

प्रख्यातबुद्धिं सुखिनं स्वतन्त्रं
कविं विवादेऽप्यनिवारितं च ।
सूर्यांशके देवगुरोः कुजश्च
प्रभूतवित्तं सुभगं प्रसूते ॥ ३३॥

स्त्रीणामभीष्टं मधुरं विनीतं
दानोपचारादरमानयुक्तम् ।
सूर्यांशके भूमिसुतो भृगोश्च
करोति नित्यं प्रणतारिपक्षम् ॥ ३४॥

स्वबन्धुविद्वेषविवादशीलं
बहुप्रलाप चपल कुशालम् ।
सूर्यांशकस्थो रविजस्य भौमः
करोति मर्त्यं कलहानुरक्तम् ॥ ३५॥

अनेकदिक्पट्टनवेश्मचेष्टं
बहुव्ययानर्थपरं सदैव ।
त्रिंशल्लवे स्वे प्रकरोति भौमो
नरं कुरूपं व्यसनैः समेतम् ॥ ३६॥

लुब्धं परस्त्रीनिरतं सदैव

विद्वेषिणं दुर्वनितापतिं च ।
त्रिंशांशके सूर्यसुतस्य भौम-
स्तिष्ठन् विधत्ते विकृतं मनुष्यम् ॥ ३७॥

यज्ञव्रताध्यायनदानशीलं
पुरोहित पार्थिवमन्त्रिणं च ।
त्रिंशांशके देवगुरोर्महीजः
करोति मर्त्यं बहुधर्मयुक्तम् ॥ ३८॥

दातारमिष्टाम्बरगन्धमाल्यं
बहुप्रजं बन्धिहितं सदैव ।
त्रिंशल्लव सोमसुतस्य तिष्ठन्
कुजो विधत्ते सुखदं प्रसूते ॥ ३९॥

आलोख्यविधानिपुणं सुशीलं
वाधप्रियं गीतविशारदं च ।
त्रिंशल्लवे वै भृगुजस्य भौमो
नरं प्रसूते बहुपुत्रयुक्तम् ॥ ४०॥

भौमो यदा मित्रबलेन युक्तः
करोति मर्त्यं सुहृदैः समेतम् ।
प्रभूतसौख्येन युतं सुरूपं
गुरुद्विजाचार्यपरायणं च ॥ ४१॥

स्वक्षेत्रविर्येण युतो महीज
करोति मर्त्यं सुतमानयुक्तम् ।
स्त्रीभूषणश्चं रतिभूरिदक्षं
कलालिपिज्ञं मधुरं गतारिम् ॥ ४२॥

विधागमाढ्यं सुतवित्तयुक्तं
सुपुण्यशीलं निपुणप्रयोगम् ।
स्वतुङ्गवीर्येण युतस्तु भौमः
करोति मर्त्यं प्रणतं द्विजानाम् ॥ ४३॥

देवद्विजाभ्यर्थनलब्धकीर्तिं
शूरं सतामाश्रयमाप्तविधम् ।
भौमः स्वनवांशकवीर्ययुक्तः

करोति मर्त्यं नृपमानयुक्तम् ॥ ४४॥

सुवृत्तदार गतशत्रुक्ष..........
कविं नृपामात्यमहत्तरं वा ।
शुभग्रहालोकनवीर्ययुक्तो
भौमः प्रसूते सुभगं मनुष्यम् ॥ ४५॥

पुंक्षेत्रवीर्येण युतस्तु भौमो
नरं प्रसूते द्विजदेवभक्तम् ।
प्रभूतगोजातहिरण्यधान्यं
बह्वङ्गनानन्दनमद्भुतार्थम् ॥ ४६ ॥

दिग्वीर्ययुक्तः प्रकरोति भौमो
नरं प्रसूते सततं सुशीलम् ।
कान्ताश्रमं क्लेशसहं विनीतं
..........आन्वितं धर्मपरायणं च ॥ ४७॥

चेष्टाबलाढ्यः प्रकरोति भौमो
नरं प्रसूते सततं कुमेष्टम् ।
हितानुकूलं सुहृदां सतं च
नैपुण्ययुक्तं निपुणं क्रियासु ॥ ४८॥

भौमो यदा रात्रिबलेन युक्त-
स्तदा प्रसूते सुभगं मनुष्यम् ।
आरामवापीकरणानुरक्तं
स्त्रीलाभयक्तं प्रचुरान्नयुक्तम् ॥ ४९॥

स्ववारवीर्यप्रबलो महीजः
स्मृतिश्रुताचारमतिं सुशीलम् ।
नरं सुवाते बहुभोगभाजं
कान्तं प्रियं स्थानविलोपनं च ॥ ५०॥

होराबलाढ्यः प्रकरोति भौमो
नरं नितान्तं स्मृतिशास्त्रविचम् ।
प्रभूतगोभूमिसुताङ्गनाढ्यं
प्रियं वदं सर्वसहं मनुष्यम् ॥ ५१॥

प्रख्यारमत्यन्तसुखापभोगं
जितारिमारक्षकसाधुदारम् ।
स्वमासवीर्येण युतो महीजो
नरं विधत्ते दयितं नृपाणाम् ॥ ५२॥

आरो यदा वर्षबलेन युक्तः
करोति मर्त्यं धनधान्ययुक्तम् ।
हतत्विषं तुष्तीपरं सहीष्णुं
प्रियंवदं सर्वजनानुकूलम् ॥ ५३॥

भौमो यदा पक्षबलेन पुष्ट-
स्तदा प्रसूते विगतारिपक्षम् ।
प्रभुं प्रसिद्धं क्षुतिमानयुक्तं
शूरं धनाढ्यं स्वकुलप्रधानम् ॥ ५४॥

भौमो यदा मित्रबलेन हीन-
स्तदा कुमित्रं जनयन्मनुष्यम् ।
खलं कुरूपं धनधान्यहीनं
देवद्विजानां च तथा विरक्तम् ॥ ५५॥

स्वक्षेत्रवीर्येण विवर्जितस्तु
भौमोऽतिकष्टं विदधाति मर्त्यम् ।
स्त्रीवल्लभं बन्धुजनव्यपेतं
गताथशाक्तं विजितं विपक्षैः ॥ ५६॥

स्त्रीपानदोषप्रभवैरनथ-
र्व्ययादिदोषैः कलहैर्विचित्रैः ।
सम्पीड्यते सर्वजनैर्मनुष्यो
भौमो यदा तुङ्गबलेन हीनः ॥ ५७॥

विंशवीर्येण विवर्जितस्तु
भौमः प्रसूते सुहृजं मनुष्यम् ।
प्रपीडितं शत्रुकृतैर्विकारः
पराभवैर्मित्रकृतैस्तथैव ॥ ५८॥

शुभग्रहालोकनवीर्यहीनः
करोति मर्त्यं विकृताङ्गमेव ।

विमुक्तधर्मं सहजापरक्तं
विगर्हितं शीलपरिच्युतं च ॥ ५९॥

स्वक्षेत्रवीर्यप्रविवर्जितस्तु..........
भौमः प्रसूते ..........
हिंसापरं बह्वृणशून्यकोशं
श्रिया विमुक्तं रतिहीनसौख्यम् ॥ ६०॥

आशाबलेनैव विवर्जितस्तु
भौमः प्रसूते ह्यधनं मनुष्यम् ।
वृद्धाङ्गनासेवनमध्वशीलं
परार्थचेष्टास्वतिकष्टभाजम् ॥ ६१॥

हृद्रोगिणं दुर्बलदेहयन्त्रं
मूर्छास्मृतिं नीचपरिग्रहं च ।
..........बलेन प्रविवर्जितस्तु
भौमः प्रसूते विगताभिमानम् ॥ ६२॥

विमुक्तधर्मं विगतप्रभावं
द्यूतप्रियं पापरतं कुशीलम् ।
सदा विहीनः प्रकरोति मर्त्यं
भौमः सदा शत्रुविमर्दितं च ॥ ६३॥

स्ववारवीर्यप्रविवर्ज्जितस्तु
भौमः प्रसूते विकृतं मनुष्यम् ।
सानोपभोगाभरणाइबाह्यं
पराङ्गनोपासनकर्मशीलम् ॥ ६४॥

.......... राङ्गनासङ्गमसक्तभाष्यं
वीव्रतघ्नं वसुदारण च ।
होराबलैर्हीन..........उश्च भौमः
करोति मर्त्यं व्यसनैः समेतम् ॥ ६५॥

द्वेष्यं जगत्यद्भुतवेषचेष्टं
विहीनसत्यं सुखलं कृतघ्नम् ।
भौमो यदा मासबलेन हीन-
स्तदा प्रसूते सरुजं मनुष्यम् ॥ ६६॥

अनात्मजं कर्मविपक्षदारं
पापोधतं धर्मफलव्यपेतम् ।
करोति भौमोऽब्दबलेन हीनो
नरं नितान्तं प्रियसाहसं च ॥ ६७॥

शठं परोपासनसङ्गहेप्सुं
सुहृद्मं स्त्रीगमनोर्सुकं च ।
स्वपक्षवीर्येण विवर्जितस्तु
भौमः प्रसूतेऽतिविकर्मशीलम् ॥ ६८॥

इति श्रीवृद्धयवने भौमचारः ॥

---

आध्याय २०

बुधचाराध्यायः

मेषं गतस्त्विन्दुसुता..........
कुर्यात् कृशं बह्वटनं शठं च ।
मिथ्याप्रलापं प्रियविग्नहास्त्रं
भूरित्रमोत्पन्नविपन्नचिन्तम् ॥ १॥

वृषं गतस्तु पृथुपीनकान्तं
बुधो नरं त्यागिनमिष्टरम् ।
गान्धर्वलीलारतिहास्यशीलं
दक्षं प्रगल्भं प्रियवल्गुवाक्यम् ॥ २॥

बुधः प्रसूते मिथुने सुवाक्यं
नरं प्रियाभाषणमिष्टकेशम् ।
शिल्पश्रुतिज्ञापकलाविदग्धं
विकत्थिनं मानिनमूर्जितं च ॥ ३॥

चतुर्थराशौ तु शशाङ्कसूनु-
स्तिष्ठन् विदेशाभिरतं प्रसूते ।
प्राज्ञं कविं स्त्रीरतिगेयवित्तं
बहुक्रियासक्तमनस्विनं च ॥ ४॥

बुधो नरं सिंहमुपेत्य..........उ........

दल्पस्मृतं चानकलावियुक्तम् ।
अत्माहसत्त्वस्थित्तिवित्तहीनं
जगत्यतिज्ञातमसत्यवाक्यम् ॥ ५॥

कन्यामपत्य प्रचुरं प्रसूते
र्मप्रियं वाङ्मिनमिन्दुसूनुः ।
आलेख्यलेख्यश्रुतिकाव्यवित्तं
विज्ञानशिल्पादिविमिश्रितं च ॥ ६॥

तुलाधरे शिल्पविवादवन्तं
बुधो विधत्ते चपलं प्रसूते ।
शठप्रचार कृतकोपचार
पण्यक्रियोपायविधानदक्षम् ॥ ७॥

बुधो नरं वृश्चिकमेत्य कर्या-
दमर्णदुःखत्रमशोकतप्तम् ।
विद्विष्टकर्माणमसाधशीलं
पारुष्यदम्भच्छलनिश्चितम् ॥ ८॥

धनुर्धरस्थिस्त बुधो मनुष्यं
विख्यातशब्दिं जनयत्युदारम् ।
शास्त्रार्थाशिल्पश्रुतिशौर्ययुक्तं
मेधाविन नाक्यविशारदं च ॥ ९॥

बुधो मृगस्थो जनयत्यनर्थं
नीचं परप्रेष्यमसत्यचेष्टम् ।
मुर्खं कलाशिल्पगुणैर्विहीनं
निरुद्यमस्थं पिशुनस्वभानम् ॥ १०॥

कुम्भे तु सौम्यः शुचिशीलहीनं
नरं प्रसूते परिभूतमन्यैः ।
वाग्बुद्धिकर्मोपहतं हताशं
प्रहीनलज्जं रतिदुर्भगं च ॥ ११॥

मीनद्वयस्थस्तु बुधो मनुष्य-
माचारशोभाभिरतं प्रसूते ।
देशानुगं वाह्मीनकर्मसाधुं

दरिद्रमिष्टप्रजम्ल्पमिष्टम् ॥ १२॥

होरं बुधो वासरपस्य यात-
स्तीव्रं खलं कामपरं विशीलम् ।
गतप्रतापं बहुपापरक्तं
देवद्विजानां परिनिन्दकं च ॥ १३॥

होरां गतो रात्रिपतेस्तु सौम्यो
नरं प्रसूते सुभगं सुशीलम् ।
विशिष्टवाग्बुद्धिगुणं नयश्चं
प्रियातिथिं नित्यमुदारचेष्टम् ॥ १४॥

त्र्यंशे बुधो वासरपस्य तिष्ठन्
नरं प्रसूते परिवादयुक्तम् ।
क्रूरं हतारिं सरणं कुरूपं
कूटानुरक्तं च सदा सकामम् ॥ १५॥

त्र्यंशे बुधो रात्रि..........
नरं प्रसूते विगतारिपक्षम् ।
मुश्रूषकं देवगुरुद्विजानां
कुलप्रधानं बहुपुत्रयुक्तम् ॥ १६॥

बुधो यदा भूमिसुतस्य संस्थो
भागे तृतीये प्रकरोति मर्त्यम् ।
माङ्गल्यधर्मं श्रुतिधर्मबाह्यं
वबन्धुमानं सम्पदा वियुक्तम् ॥ १७॥

स्ववह्विभोगेन्दुसुतः सुवाते
सुरूपदेहं सुभगं मनुष्यम् ।
यश्चव्रतादिष्वनुरक्तचेष्टं
दातारमार्यं बहुमित्रपक्षम् ॥ १८॥

तृतीयभागे सुरपूजितस्य
बुधो विधत्ते प्रसभं मनुष्यम् ।
स्त्रीवल्लभं शुभ्रमलंघ्यवीर्यं
प्रभूतकोशं विविधार्थयुक्तम् ॥ १९॥

भागे तृतीये शशिजः सितस्य
तिष्ठन् प्रसूते सुविदग्धमेव ।
मर्त्यं महाधामनिधिं गतारिं
प्रसन्नचिन्तं नृपवल्लभं च ॥ २० ॥

त्र्यंशे शनेः सोमसुतः प्रयातः
करोति मर्त्यं सघृणं
विषादिनं दुर्बलदेहसत्त्वं
प्रवासिनं विक्रयविग्रहं च ॥ २१ ॥

चरन् नवांशे दिनपस्य सौम्य
करोति पापं विकृत मनुष्यम् ।
स्त्रीदुर्भगं बन्धुजनैर्विमुक्तं
प्रसक्तशीलं हतशक्तिदर्पम् ॥ २२ ॥

चन्द्रांशके स्यान् नवमे यदैन्दव-
स्तदा विधत्ते सुसुख नितान्तं
ख्यातं वपुष्मन्तमुदारचेष्टं
जेतारमीज्यं सुहृदां सतां च ॥ २३ ॥

नवांशके भूमिसुतय सौम्यो
नरं विधत्ते रुधिरार्तदेहम् ।
विकर्मशीलं सुहृदामभीष्टं
द्वेष्यं खलं पार्थिवपीडितं च ॥ २४ ॥

नवांशके स्वे प्रकरोति सौम्यः
सौम्यं सुरूपं सुभगं मनुष्यम् ।
देवद्विजातोप्रणतं प्रसन्न
प्रियातिथिं ब्रह्मणसंमतं च ॥ २५ ॥

नवांशकस्यः सुरपूजितस्य
सौम्यः प्रसूते सुखिनं मनुष्यम् ।
नानार्थलाभं प्रभुत्प्रतापं
सुमित्रयुक्तं प्रसुतं सुशिलम् ॥ २६ ॥

शुक्रस्य भागे नवमे बुधस्तु
करोति मर्त्यं विविधार्थयुक्तम् ।

प्रभूतामत्र द्विजपूजनप्सु..........
सुतान्वितं नित्यमुदारचेष्टम् ॥ २७॥

सौरस्य भागे नवमे च तिष्ठन्
करोति सौम्योऽतिरुजं मनुष्यम् ।
कुशिल्पिनं साधुगुणैरयोग्यं
पराङ्गनासक्तमनर्थयुक्तम् ॥ २८॥

सूर्यांशकस्थो विदधाति सौम्यो
नृणां रवेः पापमतिं न सौख्यम् ।
कुमित्रसङ्गं रिपुपक्षवृद्धिं
यशोर्वि.......... सतसंशयं च ॥ २९॥

सूर्यांशके शातकरस ..........औ........
नरं विधत्ते विवि..........तापम् ।
सतार्थयुक्तं रतिसौख्यभाजं
विशिष्टशीलं विनयैः समेतम् ॥ ३०॥

सूर्यांशक भूमिसुतस्य सौम्यो
नरं विधत्तेऽतिशठं विशिलम् ।
गतश्रियं बन्धुजनेन नित्यं
पापात्मकं रोगसमन्वितं च ॥ ३१॥

सूर्यांशके स्वे प्रकरोति सौम्यो
नरं .......... शास्त्ररतं सदैव ।
कलासु दक्षं प्रणतारिपक्षं
जीतेन्द्रियं श्लाघ्यतमं सदैव ॥ ३२॥

सूर्यांशके देवपुरोहितस्य
सौम्यः प्रसूते सुतरां सुशिलम् ।
मर्त्यं महावृत्तविबुद्धियुक्तं
प्रियातिथिं धर्मपरं सदैव ॥ ३३॥

सूर्यांशके भार्गव एव सौम्यः
करोति मर्त्यं प्रचुरान्नकोशम् ।
नृपप्रियं साधुजनानुरक्तं
सद्धर्मशीलं बहुपुण्यसौख्यम् ॥ ३४॥

सूर्यांशके सूर्यसुतस्य सौम्यज्
करोति दिनं कृपगमनष्यम् ।
व्यपेतसिलं बहुरोगयुक्तं
..........अयापट निदयान........ च ॥ ३५॥

सूर्यांशके वासरपस्य सौम्यो
नरं प्रसूते कुटिलं कुशीलम् ।
कुकर्मरक्तं कुजनप्रसक्तं
कुस्त्रीषु रक्तं नृपमानयुक्तम् ॥ ३५अ॥

सूर्यांशकस्थः शशिनश्च सौम्यो
नरं प्रसूते सुतमानयुक्तम् ।
श्रियाधिकं कान्तियुतं सुशिलं
प्रपन्नमित्रं परदाररक्तम् ॥ ३५ब्॥

सूर्यंशके भूमिसुतस्य मर्त्यं
सौम्यः प्रसूते निरुजाभितप्तम् ।
विनार्थयुक्तं विगतप्रतापं
पाखण्डिनं दुर्जनवल्लभं च ॥ ३५च्॥

स्वसूर्यभागे विचरन् बुधस्तु
सुरूपमेव प्रकरोति मर्त्यम् ।
नृपप्रियं सत्यरतं सुवाक्यं
सदानुकूलं द्विजदेवताभ्यः ॥ ३५द्॥

सूर्यांशके देवपुरोहितस्य
बुधः प्रसूते सुभगं मनुष्यम् ।
विक्षाविनीतं बहुशास्त्ररक्तं
विवेकिनं विप्रमतिं प्रगल्भम् ॥ ३५ए॥

सूर्यांशके दैत्यपुरोहितस्य
बुधो विधत्ते बहुलाभयुक्तम् ।
त्रीसौख्ययुक्तं प्रणतारिपक्षं
सुवर्चसां सादितमल्मशत्रुम् ॥ ३५फ्॥

रौद्रं सुकृष्णं सततं कुचै

मालम्लुच पापरत सदैव ।
सूर्यांशके सूर्यसुतस्य सौम्यो
नरं विधत्तेऽतिखलं कृतघ्नम् ॥ ३५ग्॥

त्रिंशल्लवस्थोऽवनिजस्य सौम्यो
नरं प्रसूते कठिनं कुरूपम् ।
सतार्थहीनं व्यसनैरुपेतं
पराङ्मुखं देवगुरुद्विजानाम् ॥ ३६॥

त्रिंशल्लवस्थोऽर्कसुतस्य सौम्यः
करोति तिष्ठन् परतर्ककं च ।
रौद्रक्रियासक्तमतिं प्रचण्डं
द्यूतप्रियं व्याधिभिरर्दितं च ॥ ३७॥

चन्द्रात्मजो देवपुरोहितस्य
त्रिंशांशकस्थः प्रकरोति धीरम् ।
सदा विनीतं गुणिनामभीष्टं
स्वबन्धुपूज्यं कुलसत्तमं च ॥ ३८॥

त्रिंशांशके स्वे शशिसूनुरेव
श्रुतार्थयुक्तं मनुजं सुवाते ।
गुणैर्विख्यातमलंघ्यवीर्यं
प्रसन्नमूर्तिं सततं सुशीलम् ॥ ३९॥

त्रिंशल्लवे दानवपूजितस्य
सौम्यो विधत्ते प्रचुरप्रतापम् ।
प्रभुं परक्षेत्रवमाधनानां
प्रदानशिलं सुकलत्रयुक्तम् ॥ ४०॥

स्वमित्रवीर्येण युतस्तु सौम्यः
करोति मर्त्यं बहुमित्रयुक्तम् ।
प्रदानशिलं गुरुदेवभक्तं
सुश्रूषकं साधुजनं सदैव ॥ ४१॥

सौम्यो यदा क्षेत्रबलेन युक्तः
करोति मर्त्यं प्रियमेन लोके ।
स्थिरक्रियारम्भजनस्वभावं

विख्यातशब्दं दृढमित्रपक्षम् ॥ ४२॥

स्वतुङ्गवीर्येण युतस्तु सौम्यो
नरं विधत्ते प्रमदास्वभिष्टम् ।
प्रदानशीलं गुरुदेवभक्तं
सुश्रूषकं साधुजनस्य नित्यम् ॥ ४३॥

नवांशवीर्येण युतस्तु सौम्यो
नरं प्रसूते सततं मनोज्ञम् ।
शुचिं क्षमासत्यरत कृतज्ञ
मनस्विनं सर्वसुखाभिवासम् ॥ ४४॥

शुभग्रहालोकनवीर्ययुक्तः
करोति सौम्यः प्रणतं मनुष्यम् ।
शूरं बहुक्लेशसहं रतश्चं
नृपप्रियं पुण्यमतिं सदैव ॥ ४५॥

विचानशास्त्रश्रुतकाव्यशिल्म-
गान्धर्वसङ्गितकलाभिरामम् ।
पुंवीर्ययुक्तः प्रकरोति सौम्यो
..........कीर्तिम् ॥ ४६॥

..........
सौभाग्यचातुर्यगुणैरूपेतम् ।
अशाबलाढ्यः प्रकरोति सौम्यः
प्रसन्नमूर्तिं प्रथितं पृथिव्याम् ॥ ४७॥

चेष्टाबलाढ्यः प्रकरोति सौम्यः
स्त्रीवल्लभं भूपयुतं मनुष्यम् ।
स्वाचारधर्मप्रचुरं प्रगल्भं
सत्याधिकं नीतिपरं सदैव ॥ ४८॥

.......... रात्रिवीर्यप्रबलस्तु सौम्यो
नरं प्रसूते सततं धनाढ्यम् ।
मिष्टान्नपानं प्रियगन्धमाल्यं
सेवाविधज्ञं सुकृतोपचारम् ॥ ४९॥

स्ववारवीर्येण युतस्तु सौम्यः
करोति मर्त्यं बहुधर्मशीलम् ।
प्रियप्रदानं प्रियदर्शनं च
प्राज्ञं बहुज्ञानविकीर्णबुद्धिम् ॥ ५० ॥

होराबलाढ्यः प्रकरोति सौम्या
नरं नराणामनिशं हितोप्सुम् ।
बहुश्रमक्लेशसह विनात
दुर्धर्षमन्यैः प्रणतारिपक्षम् ॥ ५१ ॥

बुधो यदा पक्षबलेन युक्त-
स्तदा प्रसूते बहुपक्षयुक्तम् ।
जनप्रियं धर्मपरं सुरूपं
प्रमाथिनं वैरिगणस्य सम्यक् ॥ ५२ ॥

..........असवीर्यप्रबलस्तु सौम्यः
करोति मर्त्यं बहुवित्तभाजम् ।
देवद्विजेभ्यो निरतं विनीतं
..........अस्विनं स्त्रीसुभगं मनुष्यम् ॥ ५३ ॥

सौम्योऽब्दवीर्यप्रबलः प्रसूते
नरं कलाकोविदमद्भुतार्थम् ।
सौ..........
गान्धर्वशिलं प्रियनृत्यहास्थम् ॥ ५४ ॥

स्त्रीहेतुः ..........अस्तिक्षयक्तिकीर्तिं
जघन्यरक्तं च न सौहृदं च ।
सौम्यः सुहृवीर्यविवर्जितस्तु
नरं उवाते विषयप्रसक्तम् ॥ ५५ ॥

वक्षेत्रवीर्येण विवर्जितो ज्ञः
करोति मर्त्यं विगताभिमानम् ।
स्त्रीपानदोषप्रभवैरनर्थै-
र्व्याध्यादिविद्वेषयुतं सदैव ॥ ५६ ॥

स्वतुङ्गवीर्येण विवर्जितो ज्ञो
नरं प्रसूतेऽतिनिकृष्टचेष्टम् ।

प्रपीडितं वंशसमुद्रवैश्च
दारिरभाजं सततं  कुचैलम् ॥ ५७॥

नवाम्शवीर्येण विवर्जितो ज्ञः
कठोरवाक्यं जनयेन्मनुष्यं
..........ए.......सहजाङ्गरक्तं
विगर्हितं शीलपरिक्रियाधिः ॥ ५८॥

शुभग्रहालोकनवर्जितो ज्ञः
करोति मर्त्यं सुहृदामनीष्टम् ।
हिंसापरं बहॄणमल्पकोशं
विरक्तमित्रं विकृतिप्रगल्भम् ॥ ५९॥

पुंक्षेत्रवीर्येण विवर्जितो ज्ञः
करोति भीरुं सततं हताशम् ।
खलं वधद्रोहकृतानुबन्.........ं
स्वाचारसत्यश्रुतिधर्महीनम् ॥ ६०॥

दिग्वीर्यहीनः प्रकरोति सौम्यो
नरं हताशं नयनष्टतप्तम् ।
युधोत्सुकं चौरगणाधिपं च
क्रियाविहीनं परदेशरक्तम् ॥ ६१॥

चेष्टाब्लेन प्रविवर्जित्प् चो
नरं सवातेऽतिखलं कुचेष्टम् ।
शठं तथा निष्ठुरवाक्यशिल
विपन्नदारात्मजसंघतन्त्रम् ॥ ६२॥

.......... ॥ ६३॥

स्ववारवीर्येण विवर्जितो ज्ञो
नरं प्रसूते बहुकष्टभाजम् ।
.......... रुज्वसह्यं विफलश्रमार्त-
मन्योन्यवैरोपहतात्मजन्तुम् ॥ ६४॥

होराबलेन प्रविवर्जितो ज्ञो
नरं प्रसूते बहुशात्रुपक्षम् ।

भोगान्वितं दुःखपरीतवृत्तं
द्यूतप्रियं प्रश्रयसौचहीनम् ॥ ६५॥

स्वपक्षवीर्येण विवर्जितो ज्ञो
नरं प्रसूते मलिनं सुदीनम् ।
प्रभूतदोष सततं रुजार्तं
विहीनपक्षं बहुतर्ककं च ॥ ६६॥

स्वमासवीर्येण विवर्जितो ज्ञः
करोति मर्त्यं कुटिलस्वभावम् ।
गुरुद्विजावज्ञकरं हितज्ञ
परान्नरक्तं कृपणस्वभावम् ॥ ६७॥

बुधो यदा वर्षबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् ।
नानार्थनाशैः परिपिडिताङ्गं
खलानुरक्तं गुरुभक्तिहीनम् ॥ ६८॥

इति श्रीवृद्धयवने बुधचारः ॥

आध्याय २१

## गुरुचाराध्यायः

मेषे गुरुर्देवनरं प्रसूते
दुर्मर्षणं शौर्यबलस्वभवम् ।
विख्यातकर्माणमतिप्रगल्भ-
मोजस्विनं बुद्धिगुणैरुपेतम् ॥ १॥

वृषे गुरुः पाण्डुयशः प्रतारं
नरं प्रसूते सुभगं सुवेषम् ।
कान्तं स्वदाराभिरतं विनीतं
देवविजाचार्यकृतोपचारम् ॥ २॥

तृतीयराशौ च सुरेज्यमन्त्री
नैपुण्यदाक्षिण्यपरं प्रसूते ।
सुमेधसं वाग्मिनमाहितार्थं
कृपापरं बुद्धिगुणान्वितं च ॥ ३॥

तिष्ठन् गुरुः कर्कटके सुरूपं
विद्वांसमोजोबलवीर्ययुक्तम् ।
प्राज्ञं प्रसूते प्रियधर्मभाजं
यशन्वितं लोकपुरस्कृतं च ॥ ४॥

सिंहं गतो देवगुरुः प्रवीरं
नरं प्रसूते स्थिरहृ..........असत्त्वम् ।
विद्वांसमालक्ष्यमुदारनुग्र
शूरं बहुस्निग्धसुहृज्जनं च ॥ ५॥

षष्ठे क्रियाज्ञानविशुद्धबुद्धिं
मेधाविनं कर्मकथाभिरामम् ।
शास्त्रार्थशिल्पश्रुतिकाव्यचिन्तं
सुदर्शनं देवगुरुः प्रसूते ॥ ६॥

तुले विचित्रार्थबहुप्रलापं
गुरुः प्रसंख्यातधियं प्रसूते ।
कान्तं शुभाचाररतं विनीतं
प्राज्ञं वणिक्सार्थमहत्तरं च ॥ ७॥

गुरूर्नरं वृश्चिकमभ्युपेतः
क्षुद्रं प्रसूते बहुशत्रुपक्षम् ।
सुहृच्छलद्रोहरतं कुशीलं
प्रपंचकं हिंस्रमनिष्टदारम् ॥ ८॥

धनुधरस्यस्तु गुरुः प्रसूते
प्रियोपहारंश्रुतधर्मशीलम् ।
यज्ञव्रताचार्यमसंस्थितार्थं
दातारमार्यं बहुमित्रपक्षम् ॥ ९॥

गुरुर्मृगे मार्दवमल्पवीर्यं
नीचक्रियाचाररतं दुरन्तम् ।
मूर्खं पराज्ञकरमर्थहीनं
बहुश्रमं क्लेशसहं प्रसूते ॥ १०॥

कुम्भे तु जीवः नृशस

विद्वेशशीलं जनयत्यसत्यम् ।
कुशिल्पिनोपाश्रयकर्कशं च
मुख्यं गणानामतिनीचचेष्तम् ॥ ११॥

मीनद्वयस्थो गुरुगौरवज्ञं
गुरुर्नरं श्लाघ्यधनं प्रसूते ।
हृष्टं स्थिरारम्भमनिष्टदर्पं
वेदार्थशास्त्रश्रूतिकाव्यवित्तम् ॥ १२॥

होरां रवेर्देवगुरुः प्रयातः
करोति मर्त्यं बहुरोषयुक्तम् ।
लुब्धं स्ववाग्दोषयुतं सुतीव्रं
सुगुप्तपापं परतर्ककं च ॥ १३॥

चन्द्रस्य होराधिगतः सुरेज्यो
नरं प्रसूते सुभगं मनोज्ञम् ।
स्थिरक्रियारम्भधनं शरण्यं
धर्मस्वभावं दृढसौहृदं च ॥ १४॥

भागे तृतीये सुरराजमन्त्री
सूर्यस्य सूते कृपणं मनुष्यम् ।
क्रूरं क्रियाहीनमनप्रधृष्यं
निन्द्यं कुकर्मार्जितसम्पदं च ॥ १५॥

जीवस्त्रिभागे रजनीकरस्य
तिष्ठन् प्रसूते सुमनोश्चरूपम् ।
..........अरं प्रसिद्धं बहुमानवित्तं
प्रगल्भचिन्तं द्विजदेवभक्तम् ॥ १६॥

त्र्यंशे गुरुर्भुमिसुतस्य धत्तो
नृणां भयं बन्धुजनैः प्रसूते ।
..........आक्षिरोगं ........
प्रपोषणं .......... ॥ १७॥

.......... सामसुतस्य तिष्ठन्
करोति मर्त्यं प्रवरं प्रसिद्धम् ।
विद्याविनीतं बहुधर्मसक्तं

सौम्याकृतिं सौम्यगुणैः समेतम् ॥ १८॥

त्र्यंशे स्वके देवगुरुः प्रसूते
.......... सुशील विजितारिपक्षम् ।
क्षमन्वितं पार्थिवमानयुक्तं
चतुष्पदाढ्य प्रणतं गुरूणाम् ॥ १९॥

द्रेष्काणसंस्थो भृगुजस्य जीवो
.......... प्रसूते बहुकांचनाढ्यम् ।
.......... वरत्नैयुक्तं
सुखान्वितं पार्थिवव्लभं च ॥ २०॥

रौद्रं परस्वापहरं कुबुधिं
कनिष्ट्ःअकर्माणममित्रवन्तम् ।
द्रेष्काणसंस्थो रविजय जीवो
नरं प्रसूते बहुशोकभाजम् ॥ २१॥

प्रेष्यः कुकर्मातिखलस्वभावो
धनैर्विहीनस्त्वथ मन्दसत्त्वः ।
नवांशके वासरपस्य जीवो
यदा तदा स्यान्मनुजः प्रचण्डः ॥ २२॥

नवांशके रात्रिपतेः सुरेज्य-
स्तिष्ठन् प्रसूते सुभगं मनुष्यम् ।
प्रियातिथिं प्रीतिकरं नराणां
प्रसन्नचिन्तं प्रमदास्वभीष्टम् ॥ २३॥

मुखादिरोगं व्यसनोपतप्तं
भायान्वितं पापरतं प्रकामम् ।
नवांशके भूमिसुतस्य जीव-
स्तिष्ठन् प्रसूतेऽतिखलं मनुष्यम् ॥ २४॥

बुधस्य भागे नवम सुरेज्य-
स्तिष्ठन् प्रसूते सदयं मनोज्ञम् ।
वित्तान्वितं धर्मपरं सुवेषं
शास्त्रर्थरक्तं सुतसौख्ययुक्तम् ॥ २५॥

जीवो नवांशे विचरन् स्वकीये
करोति मर्त्यं नृपतुल्यवेषम् ।
पुत्रान्वितं शुद्धकलत्रयुक्तं
शास्त्रार्थयुक्तं सुजनार्थवन्तम् ॥ २६॥

शुक्रस्य भागे नवमे सुरेज्य-
तिष्ठन् प्रसूते सुखिनं मनुष्यम् ।
तेजस्विन कीर्तिकरं कृतज्ञं
पुण्यात्मकं धर्मरतं सदैव ॥ २७॥

भाराक्षिरोगव्यसनैः समेतं
प्रियाविहीनं विगतप्रतापम् ।
नवांशकस्थोरविज्यस्य जीवो
नरं सुवाते नृपपीडितं च ॥ २८॥

सूर्यांशके वासरपय जीवो
नरं प्रसूते विधनं विरूपम् ।
अकीर्तिवन्तं बहुशात्रुपक्षं
मित्रैर्वियुक्तं विसुखं विशीलम् ॥ २९॥

सूर्यांशके देवगुरुः प्रसूते
चन्द्रस्य तिष्ठन् धनिनं मनुष्यम् ।
प्रियातिथिं पुत्रसुतार्थयुक्तं
भूपालपूज्यं दयितं जनानाम् ॥ ३०॥

बृहस्पतिर्द्वादशभागसंस्थो
भौमस्य सूते प्रखलं मनुष्यम् ।
विधर्मशीलं व्यसनैरुपेतं
रोगार्दितं बन्धनभागन च ॥ ३१॥

अर्कांशसंस्थः शशिजस्य जीवो
नरं प्रसूते प्रथितं नृलोके ।
सत्याधिकं सर्वगुणैरूपेतं
प्रभुप्रियं बन्धुजनस्य नित्यम् ॥ ३२॥

अर्कांशके वे प्रकरोति जीव-
स्तिष्ठन् नरं सर्वसमृद्धिमतम् ।

पुष्टं जितारिं भयरोहयुक्तं
रामास्वभीष्टं सततं सुशिलम् ॥ ३३॥

जीवो भृगोर्द्वादशभागसंस्थो
नरं प्रसूते हयकांचनाढ्यम् ।
प्रियातिथिं भोगिनमार्यशीलं
प्रमाथिनं वैरिजनय नित्यम् ॥ ३४॥

सूर्यांशके भास्करनन्दन
जीवः कुचैलं कुरुते मनुष्यम् ।
दीनं विरूपं बहुदुःखभाजं
प्रपीडितं दस्युभिरेव भूपैः ॥ ३५॥

..........
नरं प्रसूते कुटिलं मनुष्यम् ।
हीर्ष्यापरं पीडितलोकवर्गं
विहीनशिलं परवादरक्तम् ॥ ३६॥

त्रिम्शल्लवे सूर्यसुतस्य जीव-
स्तिष्ठन् विधत्ते विभृतं ..........म् ।
पापानुरक्तं परदारशीलं
स्वबन्धुहीनं कुटिलस्वभावम् ॥ ३७॥

त्रिंशांशके स्वे सुरराजमन्त्री
मनीषिणं वाक्चतुरं करोति ।
मर्त्यं सुरक्तं द्विजदेवभक्तं
सन्तुष्टचिन्त्तं सततं सुशिलम् ॥ ३८॥

त्रिंशांशके सोमसुतस्य जीवः
करोति विज्ञं सततं मनुष्यम् ।
अध्यात्मविधागमसक्तचिन्त्तं
क्षमान्वितं ब्रह्मविदां वरिष्ठम् ॥ ३९॥

त्रिंशांशके भार्गवनन्दनस्य ..........
जीवश्चरन् वित्तयुतं विधत्ते ।
नरं विनीतंउतलाभयुक्तं
स्त्रीणामभीष्टं नृलोकमान्यम् ॥ ४०॥

सुहृद्बली देवगुरुः प्रसूते
नरं विनीतं सततं सुशीलम् ।
ख्यातं स्थिरस्फीतधनं सुमित्रं
सद्वृत्तयुक्तं च तथा जितारिम् ॥ ४१ ॥

वक्षेत्रवीर्येण युतः सुरेज्यो
नरं प्रसूते गुणशीलवन्तम् ।
मेधाविनं देवगुरुप्रसक्तं
प्रख्यातकर्माणमनल्पवीर्यम् ॥ ४२ ॥

स्वतुङ्गवीर्येण युतः सुरेज्यः
करोति नानार्थयुतं मनुष्यम् ।
.......... र्वशिल्पव्यवहारकाव्य-
माधुर्यदाक्षिण्यपतुं दयालुम् ॥ ४३ ॥

.......... ॥ ४४ ॥

शुभग्रहलोकनवीर्ययुक्तो
जीवो विधत्ते विरुजं मनुष्यम् ।
पापैरनार्थैः प्रखलैर्विरुध्ये-
दभ्यर्चितं ज्ञातिभिरेव भूपैः ॥ ४५ ॥

पुंक्षेत्रवीर्येण युतस्तु जीवो
गाम्भीर्यधैर्यप्रवरं मनुष्यम् ।
चतुष्पदाढ्यं कुलदैवमुख्यं
सुधर्मशीलं नृपवल्लभं च ॥ ४६ ॥

बृहस्पतिर्दिग्बलवान् प्रसूत
सुपण्डितं भूरिगुणैः समेतम् ।
वस्त्रान्नपानैः सहितं मनोज्ञं
गतातिपक्षं गतसाध्वसं च ॥ ४७ ॥

चेष्टाबलाढ्यः सरराजमन्त्री
..........तिष्ठं संजनयेन्मनुष्यम् ।
मन्त्रान्वितं सौरतलब्धसौख्यं
शूरं महाश्वानयुतं सहिष्णुम् ॥ ४८ ॥

देवाबलाढ्यः प्रकरोति जीवो
नरं प्रसिद्धं बहुवित्तयुक्तम् ।
प्रसन्नमूर्तिं प्रणतारिपक्षं
सुखान्वितं तन्त्रविदां वरिष्ठम् ॥ ४९॥

स्ववारवीर्येण युतस्तु जीवो
विद्याधिकं संजनयेन्मनुष्यम् ।
स्त्रीलाभयुक्तं सुजनानुकूलं
प्रियंवदं सर्वकलासु दक्षम् ॥ ५०॥

गुरुर्यदा वर्षबलेण युक्त-
स्तदा प्रसूते सुभगं मनुष्यम् ।
अत्यार्यशीलं बहुवीर्ययुक्तं
चेष्टं नृपाणां प्रचुरान्नपानम् ॥ ५१॥

स्वमासवीर्येण युतः सुरेज्य
करोति मर्त्यं सुभगं कृतज्ञम् ।
कान्तं विनीतं प्रचुराङ्गनाढ्यं
स्वबन्धुपूज्यं सततं धनाढ्यम् ॥ ५२॥

होराबलाढ्यः प्रकरोति जीवो
नरं महाज्ञानयुतं पशान्तम् ।
विज्ञानशास्त्रश्रुतसौख्ययुक्तं
प्रियातिथिं मानधनैः समेतम् ॥ ५३॥

जीवो यदा पक्षबलेन युक्तो
नरं प्रसूतेऽतिबलं कृतज्ञम् ।
विधान्वितं सर्वसुखाधिवासं
रत्नान्वितं वाजिगजैरुपेतम् ॥ ५४॥

जीवो यदा मित्रबलेन हीन-
स्तदा प्रसूते कृपणं मनुष्यम् ।
शात्रुप्रहार ज्वरपानदोष
स्त्रीरोगबन्धादिनिपीडिताङ्गम् ॥ ५५॥

स्वस्थानवीर्येण विवर्जितस्तु

जीवः प्रसूते कठिनस्वभावम् ।
मृताङ्गनं कुक्षिरुगार्तदेहं
मित्रैर्विहीनं भयविक्लवं च ॥ ५६॥

जीवोश्ववीर्येण विवर्जितस्तु
करोति नीचप्रकृतिं मनुष्यम् ।
पुत्रार्थहीनं कठिनं कृतघ्नं
प्रपीडितं पार्थिवचौरसंघैः ॥ ५७॥

नवांशवीर्येण विवर्जितस्तु
सुरेन्द्रमन्त्री कुरुते भयार्तम् ।
पामादिरोगैः सहितं ..........
बुद्धा विहीनं विसुखं सशोकम् ॥ ५८॥

शुभग्रहालोकनवीर्यहीनो
जीवः प्रसुतेऽतिकुरूपदेहम् ।
स्वबन्धुहीनं जठरस्वभावं
वैरप्रियं क्रोधपरं कुशिलम् ॥ ५९॥

पुंवीर्यहीनः सुरराजमन्त्री
नरं प्रसूते ललनस्वभावम् ।
भीरुं शठं नैकृतिकप्रकारं
श्लेष्मात्मदेहं वृजिनात्मकं च ॥ ६०॥

दिग्वायहिनः कुरुते सुरेज्या
नरं विहीनं धनधान्यजातैः ।
विदेशरक्त प्रचलस्व ..........
..........नित्यम् ॥ ६१॥

चेष्टाबलेनैव विना सुरेज्यः
करोति पापात्मकमुग्ररूपम् ।
..........
सम्पीड्यते वा नृपतिर्मनुष्यैः ॥ ६२॥

करोति जीवो द्युबलेन हीनो
नरं प्रकृत्या पिशुनस्वभावम् ।
कन्याप्रजं वातरुजाभितप्तं

नीचारिविद्वेषविवृद्धदोषम् ॥ ६३॥

स्ववारवीर्येण विना सुरेज्यो
नरं प्रसूते परिभूतवीर्यम् ।
पित्ताग्निदाहज्वरशस्त्रचौरैः
प्रपीडितं धर्मविवर्जितं च ॥ ६४॥

स्ववर्षवीर्येण विना सुरेज्यः
करोति मर्त्यं धनबुद्धिहीनम् ।
कृशं कृतघ्नं चपलस्वभावं
कफानिलाभ्यं सततं च युक्तम् ॥ ६५॥

विवर्जितो मासबलेन जीवः
करोति मिथ्यात्मकमुग्ररूपम् ।
परापवादेषू रतं कृतघ्नं
परान्नरक्तं परयोषिताढ्यम् ॥ ६६॥

करोति होराबलहानमूर्तिः
सुरेज्य.......... बहुशाठ्ययुक्तम् ।
गतत्रपं हीनबलं कुरूपं
वधात्मकं शङ्करकारकं च ॥ ६७॥

बृहस्पतिः पक्षबलेन हीनः
करोति मर्त्यं निजपक्षहीनम् ।
रोगाभिभूतं प्रविहीनसत्यं
प्रभूतशत्रुपरदाररक्तम् ॥ ६८॥

इति श्रीवृद्धयवने गुरुचारः ॥

---

आध्याय २२

शुक्रचाराध्यायः

मेषे तु शुक्रो जनयत्यशान्त..........
नरं बहुक्षोधविरोधशीलम् ।
.......... परस्त्रीहरणे प्रसक्तं
सेर्ष्यं वनारण्यविचारणं च ॥ १॥

वृषे बहुस्त्रीसुतरत्नमाढ्यं
..........आतं प्रसूते भृगुजः सुमूर्तिम् ।
स्वबन्धुधर्तारमनेकवीर्यं
कृषीबलं गोकुलजीवनं च ॥ २॥

निषेवमानो मिथुने प्रसूते
शुक्रो नरं वाःमिनमुर्जितं च ।
सुर्द्विजातिथ्यपरं कृतज्ञं
विज्ञानशास्त्रार्थकथारतं च ॥ ३॥

चतुर्थराशौ यदि षोडशार्चि-
स्तिष्ठन् प्रसूते रतिधर्मशीलम् ।
प्राज्ञं श्रुतिज्ञानविदां वरिष्ठं
मृदुस्वभावं प्रियदर्शनं च ॥ ४॥

सिंहाश्रितस्तु प्रियबन्धुपक्षं
शुक्रं प्रसूते नरमत्मसह्यम् ।
विचित्रसौख्यव्यसनं सुरूपं
गुरुद्विजाचारपारयणं च ॥ ५॥

कन्यां गतो मार्दवमल्पवित्तं
शुक्रः परोपासनजीवितं च ।
स्त्रीभूषणज्ञं रतिगेयकाव्य-
कलालिपिज्ञं मधुरं च कुर्यात् ॥ ६॥

तुलाधरस्थो भृगुसूनुराढ्यं
नरं प्रसूतेऽर्थविराजपण्यम् ।
विचित्रमाल्याम्बरमात्मवश्यं
बहुप्रवासं श्रमलब्धवित्तम् ॥ ७॥

शुक्रोऽष्टमक्षेत्रगतो नृशंसं
विद्वेषशीलं जनयत्यहन्यम् ।
प्रद्विष्टदुष्ट प्रातलोम..........
शठं परस्त्रीष्वनयप्रपंचम् ॥ ८॥

.......... रस्थो विगतार्थविद्यं
शुक्रः प्रसूतेऽतिविलक्षशब्दम् ।

सधर्मकामाचफलरुपत
गतन्प्रियं कान्तमनल्पसौख्यम् ॥ ९॥

कुर्वीत राशौ दशमे मनुष्यं
शुक्रो बहुक्लेशभयश्रमार्तम् ।
नैशून्यलोभाश्रितवंचनानां
प्रयोगिणं क्लिवविपन्नचेष्तम् ॥ १०॥

शुक्रश्चरन् कुम्भधरे मनुष्य-
मुद्योगरोगव्यसनोपतप्तम् ।
कर्मस्वसम्पन्नफलेषु सक्तं
कुर्याद्विरुद्धं गुरुभिः सुतैश्च ॥ ११॥

मीनद्वयस्थो जनयत्युदारं
शुक्रः श्रुतिज्ञानरतं मनुष्यम् ।
दिग्बुद्धिकर्मप्रचुरं सुरूपं
नृपप्रियं सज्जनमानलब्धम् ॥ १२॥

होरां गतो वासरपस्य शुक्रः
करोति मूर्खं विधनं विशीलम् ।
हिंसानृतस्तेयरतं प्रकामं
पैशून्ययुक्तं च विधर्मशीलम् ॥ १३॥

होरां गतो रात्रिपतेस्तु शुक्रः
सतां प्रियं स्फीतधनं करोति ।
गान्धर्वलीलाश्रुतिगीतरक्तं
विप्रप्रियं पार्थिववल्लभं च ॥ १४॥

द्रेष्काणसंस्थो दिनपस्य शुक्रो
नरं प्रसूते कठिनं गतस्वम् ।
कुयोषितामागतसौख्ययुक्तं
क्षुद्रं नृशंसं बहुरोषिणं च ॥ १५॥

तृतीयभागे शशलांछनस्य
तिष्ठन् भृगुः सौख्ययुतं प्रसूते ।
विद्याविनीतं पितृमातृभक्तं
तपस्विनं धर्मपरं कृतज्ञम् ॥ १६॥

तृतीयभगे धरणीसुतस्य
शुक्रश्चरन् पापरतं करोति ।
क्षुद्रोगवन्त व्यसनरूपेत
मायाविनं वंचनतस्परं च ॥ १७॥

द्रेष्काणसंस्थः शशिजस्य शुक्रो
नरं प्रसूते सुभग मनोज्ञम् ।
रतप्रगल्भं प्रियपूर्तदारं
सुवर्णरत्नात्मजभागिनं च ॥ १८॥

भागे तृतीये सुरपूजितस्य
शुक्रश्चरन् श्रेष्ठतमं सुरूपम् ।
सत्यान्वितं सर्वकलासु दक्षं
क्षमान्वितं प्रीतिकरं जनानाम् ॥ १९॥

त्र्यंशे स्वकीये भृगुजः प्रसूते
नरं प्रगल्भं धनिनं सुशिलम् ।
अध्यात्मविद्यानिरतम् सुरूपं
.......... विहीनम् ॥ २०॥

..........ग तृतीये रविजस्य शुक्रः
करोति मर्त्यं वधबन्धुरक्तम् ।
स्वबन्धुहीनं परदाररक्तं
विद्वेशशीलं सततं कुसेव्यम् ॥ २१॥

नवांशथो दिनपस्य शुक्रः
करोति मर्त्यं विकलं सुभीरुम् ।
बहुद्विषं निःक्रियमल्पवीर्यं
प्रपंचयुक्तं गतसत्त्वसौख्यम् ॥ २२॥

नवाम्शके भार्गवनन्दनस्तु
चन्द्र धत्ते तनयं नराणम् ।
सद्योषितं वा धनधान्यलाभं
रिपुक्षयं बन्धुसमागमं च ॥ २३॥

नवांशके भूमिसुतस्य शुक्रो

नरं प्रसूते रुधिरर्दिताङ्गम् ।
प्रपीडितं दस्युनृपैः सदिव
प्रद्वेषशीलं निकृतिप्रियं च ॥ २४॥

बुधस्य भोगे नवमे तु शुक्रः
करोति मर्त्यं विबुधं सुधर्म्यम् ।
तीर्थाश्रयं देवगुरुप्रसक्तं
प्रियातिथिं संनियमैरुपेतम् ॥ २५॥

शुक्रो नवांशे सुरपूजितस्य
करोति मर्त्यं प्रणतं द्विजानाम् ।
विवेकविधगमशास्त्रलु ..........
नृपप्रियं मित्रवरैः समेतम् ॥ २६॥

नवांशके स्वे भृगुजः प्रसूते
अध्यात्मविक्षानिरतं मनुष्यम् ।
स्वधर्मपूज्यं सुधिया समेतं
हतारिपक्षं व्रतशीलिनं च ॥ २७॥

स्थितो नवांशेऽर्कसुतस्य शुक्रो
नरं प्रसूते सरुजं सदुःखम् ।
भार्यास्यतर्थैः परिवर्जितं च
प्रपीडितं नीचजनैर्विशेषात् ॥ २८॥

सूर्यांशके वासरपस्य शुक्रः
करोति दिनं न च दीर्घसूत्रम् ।
..........धा विहीनं सुजनैर्विमुक्तं
..........द्रोहात्मकं वादरतं नृशंशम् ॥ २९॥

शुक्रोऽर्कभागे शशलांछनस्य
नरं प्रसूते वरयानभाजम् ।
नृपप्रियं भोगिनमर्थवन्तं
विहारवापीकरणेषु सक्तम् ॥ ३०॥

..........ऊ........ शुक्रो
विदेशरक्तं मनुजं प्रसूते
द्यूतप्रियं युद्धपरं कृतघ्नं

विवेकहीनं परदारभाजम् ॥ ३१॥

सूर्यांशके सोमसुतस्य शुक्रो
नरं प्रसूते सुभगं मनोज्ञम् ।
स्थानार्थमानैः सहितं प्रसिद्धं
विधार्जने तत्परमल्पदोषम् ॥ ३२॥

सूर्यांशकस्थः सुरपूजितस्य शुक्रः
करोत्यार्यमतिं सुदानम् ।
सन्मानसौहदसुखाथयुक्तं
विचित्रभोगं द्रविणोपपनम् ॥ ३३॥

सूर्यांशके स्वे भृगुजः प्रसूते
विचित्रवाभ्यं रतिगेयरक्तम् ।
धर्मार्थकामैः सहीतं सुविचं
नृपप्रधानं निजबन्धुमान्यम् ॥ ३४॥

अर्कांशके सूर्यसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सुखभाग्यहीनम् ।
नापात्मकं शत्रुविवर्जितं च
प्रवासिनं  व्याधिभिरर्दितं च ॥ ३५॥

त्रिंशांशके भूमिसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सुरुजं मनुष्यम् ।
पित्तार्दितं सज्वरमल्पवीर्यं
स्वनीचयुक्तं बहुना यथोक्तम् ॥ ३६॥

त्रिंशल्लवे सूर्यसुतस्य शुक्र-
स्तिष्ठन् प्रसूते बहुदोषखिन्नम् ।
हतात्मकं बन्धुवियोगयुक्तं
प्रपंचशीलं गतसत्यशौचम् ॥ ३७॥

त्रिंशांशके देवपुरोहितस्य
शुक्रश्चरन् देवरतं प्रसूते ।
सुधर्मशीलं सुजनाप्ततोषं
नरेन्द्रपूज्यं व्रतचारिणं च ॥ ३८॥

त्रिंशांशके सोमसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सवपुं मनुष्यम् ।
सौम्यं धनाढ्यं वरदारयुक्तं
हस्त्यश्वभाजं नृपवल्लभं च ॥ ३९॥

त्रिंशल्लवे स्वे भृगुजः प्रसूते
नरं विनीतं धनधान्यवन्तम् ।
तुलाधिकं कीर्तिकरं सुविश्वं
हास्त्ये रतं केलिकरं प्रसह्यम् ॥ ४०॥

शुक्रो यदा मित्रबलेन युक्त-
स्तदा प्रसूते बहुमित्रयुक्तम् ।
प्रियातिथिं देवगुरुप्रसक्तं
प्रभान्वैश्वर्यगुणैः समेतम् ॥ ४१॥

स्वस्थानवीर्येण युतस्तु शुक्रः
करोति मर्त्यं पुरुषप्रधानम् ।
स्वथानपूज्यंप्रमदास्वभीष्टं
प्रसन्नचिन्तं धृतिनाधिपं च ॥ ४२॥

स्वतुङ्गवीर्येण युतस्तु शुक्रः
करोति मर्त्यं बहुकीर्तिभाजम् ।
पुण्यात्म्क सत्यसमृद्धिमन्तं
चतुष्पदाढ्यं प्रियदर्शनं च ॥ ४३॥

नवाम्शवीर्येण युतस्तु शुक्रः
करोति मर्त्यं विजितारिपक्षम् ।
यशप्रियं दानप्तिं प्रसिद्धं
निर्मुक्तदोषं स्वकुलप्रधानम् ॥ ४४॥

शुभग्रहालोकनवीर्ययुक्तः
शुक्रः प्रसूते शुभकर्यमग्र्यम् ।
रोगैर्विमुक्तं प्रणतारिप..........
प्रियातिथिं सर्वसुखैः समेतम् ॥ ४५॥

स्त्रीक्षेत्रवीर्यप्रबलस्तु शुक्रः
करोति मर्त्यं बहुयोषिताढ्यम् ।

सौभाग्यसौन्दर्ययुतं सुकान्तं
नानार्थलाभैः सहितं सदैव ॥ ४६॥

आशाबलाढ्यः प्रकरोति शुक्रो
नरं प्रसन्नं गतशत्रुपक्षम् ।
दिग्देशविख्यातियुतं सुताढ्यं
प्रभूतवित्तं च सदा प्रियम् ॥ ४७॥

चेष्टाबलाढ्यः प्रकरोति शुक्रो
नरं प्रसन्नधुतिमल्पपापम् ।
..........श्चयुक्त गुरुव्........
भयैर्वियुक्तं सुतलाभयुक्तम् ॥ ४८॥

.......... ॥ ४९॥

.......... वारबलेन युक्त-
स्तदा प्रसूते महजस्वभाम् ।
विज्ञानशीलं बहुशास्त्ररक्तं
सुधर्मशीलं हतशत्रुपक्षम् ॥ ५०॥

करोति शुक्रोऽब्दबलेन युक्तः
प्रियातिथिं सौख्ययुतं मनुष्यम् ।
..........व्यसनरुपेत ........
नृपप्रियं ब्रह्मणसंमतम् च ॥ ५१॥

शुक्रो यदा मासबलेन युक्त-
स्तदा प्रसूते सुभगं जितारिम् ।
चतुष्पदाच्छादनभोजनाधैः
समन्वितं अर्वसमृधिमन्तम् ॥ ५२॥

होराबलाढ्यः प्रकरोति शुक्रो
नरं सुशीलं प्रियवाक्यदक्षम् ।
महाजनैः पूजितमेव नित्यं
प्रसन्नमूर्तिं प्रियदर्शनं च ॥ ५३॥

शुक्रो यदा पक्षबलेन युक्त-
स्तदा प्रसूते विजितारिपक्षम् ।

स्वपक्षमान्यं बहुधर्मयुक्तं
प्रियागमं सङ्गमलब्धसौख्यम् ॥ ५४॥

शुक्रो यदा मित्रबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् ।
मित्रैर्विहीनं बहुदुःखशोकै-
रूपद्रुत पार्थिवपीडितं च ॥ ५५॥

स्वक्षेत्रवीर्येण विवर्जितस्तु ..........
शुक्रः प्रसूतेऽतिखलं विशीलम् ।
दुष्टाङ्गनासख्यरत कुरूप
विधर्मिणं पापरतं कृतघ्नम् ॥ ५६॥

तुङ्गवीर्येण विवर्जितस्तु
शुक्रः प्रसूते मलिनं सपापम् ।
नीचानुरक्तं पर्दारलुब्धं
हिंस्रं महाव्याधिभिरर्दितं च ॥ ५७॥

नवांशवीर्येण विवर्जितस्तु
शुक्रः प्रसूतेऽतिकठोरचिन्तम् ।
भयानुरं सत्यधनिर्विहीनं
विद्वेषशीलं गतसौहृदं च ॥ ५८॥

शुभग्रहालोकनवीर्यहीनः
शुक्रः प्रसूते परिभूतदेहम् ।
विकर्मरक्तं सततं ..........
प्रपीडितं पार्थिवदस्युभिश्च ॥ ५९॥

स्त्रीक्षेत्रवीर्येण विवर्जितस्तु
करोति शुक्रः प्रखलं मनुष्यम् ।
नरापवादात्मकमल्पसौख्यं
स्त्रिया वियुक्तं बहुहानियुक्तम् ॥ ६०॥

आशाबलेनिव विवर्जित..........
शुक्रः प्रसूते परदेशरक्तम् ।
भाग्यैर्विहीनं जठरं कृतघ्नं
मायाविनं साधुजनैर्विहीनम् ॥ ६१॥

चेष्टाबलेनैव विवर्जितस्तु
शुक्रः प्रसूते वधबन्धुरक्तम् ।
क्रूरं कुकर्माश्रितमल्पसत्यं
प्रभूतशत्रुं धनदारहीनम् ॥ ६२॥

शुक्रो यदा वासरवीर्यहीनः
करोति मर्त्यं सतत कुचैलम् ।
चौरप्रदुष्टं बहुदुष्टसङ्गं
वीर्यप्रयुक्तं बहुविह्वलं च ॥ ६३॥

शुक्रो यदा वारबलेन हीन-
प्रसूते हतशत्रुदारम् ।
सत्येन हीनं परिभूतमन्यैः
सदा सशोकं स्वजनैर्वियुक्तम् ॥ ६४॥

करोति शुक्रोऽब्दबलेन हीनो
नरं निकृष्टं कुटिलस्वभावं
वित्तैर्विहीनं गतबन्धुवर्गं
प्रवासशिलं कलहप्रियं च ॥ ६५॥

शुक्रो यदा मासबलेन हीन-
स्तदा प्रसूते वृजिनैः समेतम् ।
विवादशीलं व्यसनैः प्रतप्तं
..........बाह्यम् साधुजनस्य ॥ ६६॥

होराबलनैव विवर्जितस्तु
शुक्रः प्रसूते मतिसत्यहीनम् ।
लज्जावियुक्तं विधनं कुचैलं
पराङ्मुखं देवगुरुद्विजानाम् ॥ ६७॥

शुक्रो यदा पक्षबलेन हीन-
स्तदा प्रसूते पुरुषं गतस्वम् ।
अनार्यशीलं गतमानलभं
भयातुरं कापुरुषं सजिह्मम् ॥ ६८॥

इति श्रीवृद्धयवने शुक्रचारः ॥

आध्याय २३

शनैश्चरचाराध्यायः

मेषेऽर्कसूनुर्जनयत्यनार्यं
कुवेषमाधिव्यसनं श्रमार्तम् ।
गताश्रियं निष्ठुर..........उ........
विगर्हितं निर्धनमिष्टवैरम् ॥ १॥

..........असङ्गतिमर्थहीनं
वृषेऽर्कसूनुर्जनयेन्मनुष्यम् ।
असक्तकर्माणमयुक्तवाक्यं
वृद्धाङ्गनानां हृदयानुरागम् ॥ २॥

क्रमाद्गतोऽर्किर्मिथुने प्रसूते
श्रमातुरं बह्वृणबन्धनार्तम् ।
शठप्रयोगं छलकूटमेव ..........
दुष्टक्रियं दा..........कमन्त्रिणं च ॥ ३॥

शनैश्चरः कर्कटके प्रसूते
नरं दरिद्रं सुभगाभिमानम् ।
सदा रुगार्तं जननीवियुक्तं
मृदुं विशिष्टक्रिय माचरं च ॥ ४॥

..........ओऽर्किर्जनयत्यशीलं
विगर्हिताचारगुनं मनुष्यम् ।
प्रवृद्धदोषं निजलोकबाह्यं
क्रियासु नीचासु सदाभिसक्तम् ॥ ५॥

शनैश्चरः षष्ठमुपेत्य राशिं
नपुंसकाकारतनुं प्रसूते ।
नरानवेश्माभिरतं गतस्वं
शठं शिशुस्त्रीजनदूषणं च ॥ ६॥

तुलाधरस्यस्त्वसितः प्रधान-
..........अर्थपरं मनुष्यम् ।

उराष्ट्रदेशाटनलब्धमानं
वयःप्रकर्षोपकृतास्पदं च ॥ ७॥

शनैश्चरो वृश्चिकगो
विद्वेषवैषम्यपरं प्रसूते ।
धर्मादपेतं विषशस्त्रदग्धं
प्रचण्डकोपं निरयत्प्रपंचम् ॥ ८॥

धनुर्धरस्यो मृदुमल्पवाक्यं
वधर्मवृत्ताभिरतं प्रसूते ।
श्रुतार्थवाक्यं व्यवहार्शिक्षा-
क्रियाभिधायश्चमनल्पसौख्यम् ॥ ९॥

स्थितोऽर्कसूनुर्जनयेन्मृगाख्ये
नरं स्ववंशोद्भवपूज्यमग्र्यम् ।
क्रियाकयाचार्यमनेकशिल्पं
प्रवासिनं वृन्दपुरस्कृतं च ॥ १०॥

शनशिचरः कुम्भधरं प्रपन्नः
कुर्याचरं सत्यधनं सुवाक्यम् ।
आरोग्यकायं वरयाणयुक्तं
शूरं नृपैः पूजितमल्पपापम् ॥ ११॥

शनैश्चरो मीनयुगे प्रसूते
..........उसंबन्धिसुहृद्वरिष्ठम् ।
त्रिंशन्तसत्यार्चितमिष्तयज्ञं
विधासु शिल्पेष्वभिजातशिल्पम् ॥ १२॥

होरां गतो वासरपस्य सौरि-
र्नरं प्रसूते बहुवैरयुक्तम् ।
प्रणष्टधर्मं विगताभिमानं
दयाविहीनं परदारलुब्धम् ॥ १३॥

होरां गतो रात्रिपतेस्तु सौरि-
र्नरं प्रसूते बहुकीर्तियुक्तम् ।
सौन्दर्यसौख्यार्थसमृद्धियुक्तं
प्रियं मनोज्ञं प्रणतं सुराणाम् ॥ १४॥

द्रेष्काणसंस्थो दिनपस्य सौरिः
करोति कन्याप्रजनं मनुष्यम् ।
व्यायामभाजं विगतप्रतापं
विपन्नशीलं सततं सजिह्मम् ॥ १५॥

भागे तृतीये रविजः प्रसूते
चन्द्रस्य मर्त्यं महदर्थयुक्तम् ।
विवेकिनं सर्वकलासु..........
विपक्षहीनं सुतलालसं च ॥ १६॥

भागे तृतीयेऽवनिजस्य सौरि-
श्चौरं परप्रेष्यकरं प्रसूते ।
सिनिष्ठुरं पापरतं नृशंसं
व्यपेतलज्जं गतसौहृदं च ॥ १७॥

द्रेष्काणसंस्थः शशिजस्य सौरः
करोति मर्त्यं बहुशास्त्रयुक्तम् ।
विचानिनं धर्मरतं प्रसक्तं
स्वदारतु..........गतसाध्वसं च ॥ १८॥

द्रेष्काणसम्स्थः सुरपुजितस्य
सौरः प्रसूते द्विजदेवभक्तम् ।
प्रियंवदं सर्वसहं प्रगल्भं
महाजनैः पूजितसाधुदारम् ॥ १९॥

भागे तृतीये रविजः प्रसूते
शुक्रस्य तिष्ठन् प्रचुरानपानम् ।
लाभान्वितं धर्मपरंसुमित्रं
हतारिपक्षं व्यसनैर्वियुक्तम् ॥ २०॥

.........nइभोगे........ऊ........
..........सौख्यम् ।
नृपात्मजैः प्रीतिपर वदान्य
विमुक्तरोग बहुमित्रयुक्तम् ॥ २१॥

सूर्यस्य भागे नवमेऽर्कसूनुः

करोति मर्त्यं बहुतीव्रकोपम् ।
हिंस्रं प्रणष्टं सुजनैर्वियुक्तं
प्रद्वेषशीलं परिभूतमन्यैः ॥ २२॥

चन्द्रस्य भागे नवमेऽर्कसूनु-
र्नरं प्रसूते सुकलत्रयुक्तम् ।
शास्त्रानुरक्तं क्रतुदानशीलं
जितेन्द्रियं मन्त्रविदां वरिष्ठम् ॥ २३॥

शनैश्चरो भौमनवांशसंस्थो
नरं प्रसूते वचनस्वभावम् ।
पराङ्गनासङ्गरतं विधर्मं
मित्रैर्विहीनं सततं कुचैलम् ॥ २४॥

शनैश्चरः सौम्यनवांशसंस्थः
करोति मर्त्यं सुखभोगतृप्तम् ।
कान्तं सुभार्यात्मपरं विधिश्चं
प्रियातिथिं यज्ञरतं प्रधानम् ॥ २५॥

शनिर्नवांशे सुरपूजि..........
नरं प्रसूते सुरविप्रभक्तम् ।
विवेकविक्षागमसत्ययुक्तं
प्रसन्नवक्त्रं प्रचुरान्नपनम् ॥ २६॥

मातण्डजः शुक्रनवांशसंस्थः
करोति तीर्थाश्रयमिष्टधर्मम् ।
प्राज्ञं कृतज्ञं बुधलोकसेव्यं
जितेन्द्रियं शुभ्रमतिं मनोज्ञम् ॥ २७॥

नवांशके स्वे प्रकरोति सौरो
नरं सुदातारतरं विरोगम् ।
सूर्योषितां सङ्गप्रवृद्धसौख्यं
हतारिपक्षं स्थिरमुग्रवीर्यम् ॥ २८॥

सूर्यांशके वासर्पस्य शौरो
नरं प्रसूते गतधर्मबुद्धिम् ।
सुनिष्ठुरालापपरं सुदुष्टं

नीचानुरक्तं विगतप्रभावम् ॥ २९॥

सूर्यांशके त्वृक्षपतेः प्रयातः
सौरः सुवाते सुमतिं मनुष्यम् ।
लाभान्वितं पार्थिवमानपुष्टं
गान्धर्वशिल्पादिष सक्तचिन्तम् ॥ ३०॥

शनैश्चरो द्वादशभागसंस्थो
नरं प्रसूते क्षितिजस्य जिह्मम् ।
प्रपीडितं पित्तविकारदोषै-
र्भीरुं सदा निन्धतमं नराणाम् ॥ ३१॥

मार्तण्डजो द्वादशभागसंस्थो
बुधस्य सूतेऽप्रतिमं मनुष्यम् ।
वित्तान्वितं धर्मपरं सलज्जं
कीर्त्यान्वितं शास्त्रविशारदं च ॥ ३२॥

आदित्यजो द्वादशभागसंस्थो
जीवस्य सूतेऽर्थपरं मनुष्यम् ।
पुत्रान्वितं बान्धवनामयुक्तं
लज्जान्वितं ब्राह्मणसंमतं च ॥ ३३॥

अर्कांशके भार्गवजस्य संस्थः
करोति मर्त्यं प्रचुरान्नपानम् ।
विशिष्टदाराम्बररत्नभाजं
भाग्याधिकं प्राणभृतां वरिष्ठम् ॥ ३४॥

सूर्यांशके स्वे दिनपस्य पुत्रो
नरं प्रसूते स्थिरबुद्धियुक्तम् ।
व्रतोपवासान्वितमिष्टमित्रं
कुल.......... ॥ ३५॥

त्रिंशांशके भूमिसुतस्य सौरः
करोति पापात्मकमुग्रचेष्टम् ।
.......... रेन्द्रैः परिभूतदेहं
रोगापतप्तं प्रखलस्वभावम् ॥ ३६॥

त्रिंशांशके स्वे रविजः प्रसूते
नरं विनीतं विगतारिपक्षम् ।
वित्तार्जने तत्परमिष्टमित्रं
महाबलं सत्यरतं नयज्ञम् ॥ ३७॥

त्रिंशांशके देवगुरोः प्रयातः
शनिः प्रसूते सुभगं मनुष्यम् ।
श्रतोपवासार्जितधर्मवृद्धिं
प्रियंवदं सत्ययुतं प्रगल्भम् ॥ ३८॥

त्रिंशल्लवे सोमसुतस्य सौरि-
र्नरं प्रसूते प्रवरं कुलस्य ।
सौम्यान्वितं पण्डितमिष्टधर्मं
नृपप्रियं शास्त्ररतं सदैव ॥ ३९॥

त्रिंशांशके भार्गवनन्दनस्य
करोति सौरः सुतसौख्ययुक्तम् ।
प्रियातिथिं बुद्धियुतं कृतज्ञं
नारीप्रियं पूज्यतमं नृलोके ॥ ४०॥

शनैश्चरो मित्रबलेन युक्तो
नरं प्रसूते बहुमित्रबन्धु..........
स्थिरवभावं बहुकीर्तियुक्तं
विधाविनीतं सततं मनोज्ञम् ॥ ४१॥

शनिर्यदा स्थानबलेन युक्त-
स्तदा प्रसूते शुचिमप्रमत्तम् ।
त्रभूतवेश्मार्थयुतं सुदारं
चतुष्पदाढ्यं नृपपूजितं च ॥ ४२॥

मन्दो यदा स्वोच्छबलेन युक्त-
प्रसूते प्रभूतरत्नार्थसुतैः
गतारिपक्षं सततं सुशिलम् ॥ ४३॥

नवांशवीर्योऽर्कसुतो बलिष्ठो
नरं प्रसूते बहुयश्चशीलम् ।
मेधाविनं पुण्यपरं जितारिं

सभासदं ब्राह्मणसंमतं च ॥ ४४॥

शुभग्रहालोकनवीर्ययुक्तः
करोति सौरो दृढकार्यसुग्रम् ।
कषिक्रियालब्धसुभूरि..........
वराश्वयुक्त सारवन सुशीलम् ॥ ४५॥

पुंक्षेत्रविर्येण युतोऽर्कसूनु-
र्नरं प्रसूते बहुवीर्ययुक्तम् ।
परैरधृण्य वनितास्वभीष्टं
प्रियंवदं सर्वकलासु दक्षम् ॥ ४६ ॥

शनैश्चरो दिग्बलबुद्धियुक्तो
नरं प्रसूते प्रचुरान्नपानम् ।
दाक्षिण्यशीलं बहुभोगयुक्तं
गान्धर्वशीलं द्विजदेवभक्तम् ॥ ४७॥

चेष्टाबलाढ्यो रविजः प्रसूते
नरं सुचेष्टं सुतरां सदैव ।
सत्यान्वितं देवगुरुप्रभक्तं
सुतीर्थयुक्तं पितृभक्तिरक्तम् ॥ ४८॥

शनैश्चरो रात्रिबलेन युक्तो
नरं प्रसूते रतसौ..........उ........
..........योगाधिकं सौम्यवपुं सुचेष्टं
दयान्वितं दानरतं सलज्जम् ॥ ४९॥

शनैश्चरो वर्षबलेन युक्तः
कीर्त्याभिरक्तं संजनयेन्मनुष्यम् ।
नित्यं सुदान्तं व्यसनैर्विहीनं
जितेन्द्रियं विप्रसुरानुरक्तम् ॥ ५०॥

शनैश्चरो मासबलेन युक्तो
नरं प्रसूते नयनाभिरामम् ।
प्रतापिनं धर्मपरं सहीष्णुं
हितैषिणं सर्वजनस्य नित्यम् ॥ ५१ ॥

शनैश्चरो वारबलेन युक्तो
नरं प्रसूते बहुशात्रयुक्तम् ।
अहिंसकं मानगुणैः स..........
प्रभूतकोशं जनवल्लभं च ॥ ५२॥

होराबलाढ्यो रविजः प्रसूते
सन्मानभाजं जननीप्रभक्तम् ।
धर्मे रतं पार्थिवमा..........उ
विशिष्टलोकानुगतं सदैव ॥ ५३॥

शनिर्यदा पक्षबलेन युक्त-
स्तदा प्रसूते गतशात्रुपक्षम् ।
..........
विमुक्तरोगं गतपापमेव ॥ ५४॥

शनैश्चरो मित्रबलेनहीनो
नरं प्रसूतेऽतिखलं विमित्रम् ।
हतात्मजं श्रीरहितं विरूपं
प्रपीडितं भूपतिना सदैव ॥ ५५॥

स्वस्थानवीर्येण विवर्जितोऽर्कि-
र्नरं प्रसूते विधनं विशीलम् ।
परार्दितं पापरतं कृतघ्नं
रोगार्दितं बान्धवविवर्जितं च ॥ ५६॥

स्वतुङ्गवीर्येण विवर्जितोऽर्कि-
र्नरं प्रसूते विधनं विशीलम् ?
पापैर्जितं हीनधनेश्च युक्तं
भूतादिदोषैः सहितं सदैव ॥ ५७॥

नवांशवीर्येण विवर्जितोऽर्किः
करोति नित्यं बहुशास्त्रयुक्तम् ।
सूर्यं सुहिंस्त्रं धनधान्यहीनं
प्रमादिनं पार्थिवपीडितं च ॥ ५८॥

.......... ॥ ५९॥

पुंक्षेत्रवीर्येण विवर्जितस्तु..........
सौरः प्रसूते रिपुरोगयुक्तम् ।
दौर्भाग्ययुक्तं विकृतं सुतीक्ष्णं
सदा विधर्मं निजधर्महीनम् ॥ ६०॥

शनैश्चरो दिग्बलवर्जितस्तु
नर प्रसूते परदाररक्तम् ।
निराशिमुग्रं गुरुद्रोहरक्तं
विपन्नलज्जं सरुजं सदैव ॥ ६१॥

चेष्टाबलोनो रविजः प्रसूते
कुचेष्टितानर्थपरं मनुष्यम् ।
विद्वेषशीलं कुटिलं कुदारं
सन्मानहीनं धनवर्जितं च ॥ ६२॥

शनैश्चरो रात्रिबलेन हीनो
नरं प्रसूते रतसौख्यहीनम् ।
मायाविनं व्याधिभिरार्तदेहं
दुष्टाशयं सर्वजनैश्च निन्धम् ॥ ६३॥

शनिर्यदा वारबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् ।
बहुप्रकारैर्व्यसनैरुपेतं
निन्धं कुवेषं बहुसाहसं च ॥ ६४॥

शनैश्चरो वर्षबलेन हीनो
नरं प्रसूते ज्वरपित्तयुक्तम् ।
नामाशिरोर्तिप्रभवैर्विकरैः
सम्पीडितं सत्यविहीनमेव ॥ ६५॥

शनैश्चरो मासबलेन हानिः
करोति मर्त्यं परतर्ककं च ।
गतस्वकं हानियुतं कठोरं
प्रवासशिलं दयिताविहीनम् ॥ ६६॥

होराबलेनः प्रकरोति सौरो
नरं प्रमूर्खं सुतदारहीनम् ।

विधर्मरक्तं सततं कुवेषं
प्रपीडितं बन्धुजनेन नित्यम् ॥ ६७॥

शनैश्चरः पक्षबलेन हीनः
करोति मर्त्यं निजपक्षहीनम् ।
पापात्मकं दद्रुभिरार्तदे..........
विदेशशीलं परतर्ककं च ॥ ६८॥

इति श्रीवृद्धयवने शनैश्चरचारः ॥

---

आध्याय २४
तनुस्थानचिन्ताध्यायः
मेषस्य लग्ने तु भौ..........ऊ........
श्चण्डो धनी सर्वकलासु दक्षः ।
स्वपक्षहन्ता बहुमन्युयुक्तो
..........अतिस्तीक्ष्णकरः सदैवः ॥ १॥

वृषस्य लग्ने तु नरः प्रसूते
मित्रः क्षमी हास्यरतः सुवाभ्यः ।
विज्ञानयुक्तो गुरुर्लोकभक्तः
शूरः प्रधानः सुतलालसश्च ॥ २॥

तृतीयलग्ने तु नरोऽभिजातो
..........अब्धः ।
..........अक्षपूज्यः परपक्षहन्ता........
..........जितेन्द्रियः स्याद्बहुवित्तयुक्तः ॥ ३॥

लग्ने कूलीरस्य तु सम्प्रसूतो
..........प्रियोऽसृष्टरुगिष्टयोगः ।
सौभाग्ययुक्तो रतिलालसश्च
मन्त्रोपसेवी गुरुवत्सलः स्यात् ॥ ४॥

सिंहस्य लग्न तु भवे.......... प्रसूतो
नरो विभागी रिपुर्दनश्च ।
लग्ने विधत्ते विधनं मनुष्यं
बह्वाशिनं नित्यविमुक्तलज्जम् ।

निन्द्यं सतां नीचरतं कृतघ्नम् ॥ ५॥

कन्याविलग्ने तु नरः प्रसूतो
[विज्ञानविद्यागमशास्त्रलुब्धः ।]
लुब्धो गुरुणां रतिलालसश्च
मानी च सौभाग्यगुणैश्च युक्तः ॥ ६॥

तुलाविलग्ने तु नरः प्रसूतः
स्वकर्मणा जीवति बुद्धिमांश्च ।
विद्वत्प्रिशः सर्वकलास्वभिज्ञ-
श्चलस्वभावो वनिताजितश्च ॥ ७॥

जातो विलग्ने खलु वृश्चिके स्यात्
चण्डोऽभिमानी पुरुषोऽतिशूरः ।
विज्ञानवान् काव्यकरः कृतज्ञ
स्यात् संविभागी बहुरोषंचिन्तः ॥ ८॥

धनुर्विलग्ने भवति प्रसूतः
..........नः सुभगो मनुष्यः ।
शूरोऽर्थवान् भीतिपरः कृतज्ञो
बन्धूपभोग्यो द्रविणो वपुष्मान् ॥ ९॥

मृगस्य लग्ने पुरुषोऽभिजातः
..........बहुभृत्य........उ........
लुब्धोऽलसः स्वात्मपरः कृतघ्नः
.......... र्यनित्यो गुरुवत्सलश्च ॥ १०॥

कुम्भस्य लग्ने पुरुषोऽभिजात-
..........औहृदश्च ।
प्रभूतधान्यार्थयुतः प्रचण्डो
लुब्धोऽन्यनारिरतिलालसश्च ॥ ११॥

मीने विलग्नोपगतेऽभिजातः
..........न्द्रविणोऽल्पकश्च ।
त्यागात्मवान् शास्त्रविशारदश्च
न दीर्घसूत्रो न च मन्दबुद्धिः ॥ १२॥

होरा यदा वासरपस्य लग्ने
तदा प्रसूते बहुसौख्ययुक्तम् ।
विवेकिनं धर्मपरं कृतज्ञं
त्यागात्मकं सत्यरतं मनुष्यम् ॥ १३॥

शीतांशुहोरा यदि जन्मकाले
पराङ्गनाभोगपरो नरश्च ।
शुभे शुभं तत्र च क्रूरयुक्ते
सम्भोगकाले न चेरप्रदिष्टम् ॥ १४॥

त्र्यंशो यदा वासरपस्य लग्ने
तदा सुतीव्रं जनयेन्मनुष्यम् ।
कलिप्रियं धनरतं विशालं
विद्वेषशीलं द्विजदेवतानाम् ॥ १५॥

चन्द्रस्य लग्ने तु यदा त्रिभाग-
स्तदा प्रसूते सुखलाभवन्तम् ।
श्रियान्वितं भक्तिपरं गुरूणां
प्रख्यातकर्माणमुदारचेष्टम् ॥ १६॥

..........यंशको भूमिसुतस्य लग्ने
करोति मर्त्यं क्षतजार्तदेहम् ।
क्रूरवभाव हतबन्धुदार
प्रतापहीनं विषयार्दितं च ॥ १७॥

तृतीयभागः शशिजस्य लग्ने
करोति सौम्यं सरुजं मनुष्यम् ।
नदीर्घसूत्रं न च वित्तहीनं
सत्याधिकं भूरिसुतं सदैव ॥ १८॥

त्र्यंशो यदा देवपुरोहितस्य
लग्नं प्रयातः प्रकरोति मर्त्यम् ।
तेजस्विनं सर्वौखाधिवासं
सुधर्मिणं प्रीतिकरं स्वपक्षम् ॥ १९॥

द्रेष्काणसंस्थो भृगुजस्य लग्नो
वित्तान्वितं संजनयेन्मनुष्यम् ।

शास्त्रानुरक्त गतरोगपाप
नृपप्रियं देवगुरुप्रसक्तम् ॥ २०॥

शनैश्चरस्य त्रिविभागस्..........
लग्नः प्रसूते कृपणस्वभावम् ।
धनेन हीनं बहुदुःखयुक्तं
चलप्रतिज्ञं शठतासमेतम् ॥ २१॥

भागे नवमे विवस्वान
नरं प्रसूते विजितं खलं च ।
नीचानुरक्तं वृजितैः समेतं
.......... ॥ २२॥

..........शको रात्रिपतेर्विल........
मर्त्यं बहुशोधनाढ्यम् ।
कृष्याप्तवित्तं सुतसौख्ययुक्तं
प्रियातिथिं सर्वजनप्रियं च ॥ २३॥

..........शको भूत ........लग्ने
करोति मर्त्यं बहुदुःखयुक्तम् ।
पित्तज्वरासृक्परिपीडिता..........
प्रतापहीनं सततं कुचैलम् ॥ २४॥

लग्ने नवांशः शशिनन्दनस्य
करोति मर्त्यं बहुवित्तयुक्तम् ।
मेहाविनं सर्वसुखर्द्धिभाजं
विवेकिनं पण्डितमल्पवैरम् ॥ २५॥

नवांशको देवपुरोहितस्य
लग्ने विधत्ते सुतवित्तसौख्यम् ।
नरातिगाठं कनकायभाजं
सदा नराणां नृपतेश्च पूज्यम् ॥ २६॥

नवांशको भार्गवन..........
लग्ने विधत्ते बहुपुत्रभोगम् ।
.......... र्मक्रियासिद्धिपरोपघातं
दिव्याङ्गनाभोगसुखं सदैव ॥ २७॥

नवांशकः सूर्यसुतस्य लग्ने
नृणां विधत्ते बहुभूमिनाशम् ।
अर्थक्षयं न्यायम्तान्तमुग्रं
प्रमोषणं चौरकृतं सदैव ॥ २८॥

सूर्यांशको वासरपस्य लग्ने
नरं प्रसूते बहुमन्युवश्यम् ।
लाल्यान्वितं धर्मसुखैर्विहीन
निस्त्र्यंशमुग्रं चपलस्वभावम् ॥ २९॥

सूर्यांशको रात्रिपतेर्विलग्ने
करोति मर्त्यं बहुर्लभाज्म् ।
नानार्थलाभैः सहितं सुशीलं
कुलप्रधानं भुमित्रयुक्तम् ॥ ३०॥

सूर्यांशको भूमिसुतस्य लग्ने
नरं प्रसूते रुधिरामयाढ्यम् ।
पामादिरोगैर्व्यसनैः समेतं
प्रपंचयुक्तं रणकातरं च ॥ ३१॥

सूर्यांशकः सोमसुतस्य लग्ने
नरं सुवाते सुभगं सुशीलम् ।
विद्यासुरक्तं गुरुदेवभक्तं
परैरधृष्यं रतलालसं च ॥ ३२॥

सूर्यांशको देवगुरोर्विलग्ने
करोतिमर्त्यं बहुशास्त्ररक्तम् ।
..........नुरागेण युतं विनीतं
प्रभूतमित्रं रणकोविदं च ॥ ३३॥

सूर्यांशको भार्गवनन्दनस्य
लग्ने प्रसूते सुभगं मनुष्यम् ।
रूपान्वितं पार्थिवमानयुक्तं
प्रियातिथिं पुत्रधनैः समेतम् ॥ ३४॥

सूर्यांशको घस्त्रपनन्दनस्य

लग्ने प्रसूते रणरोगयुक्तम् ।
नरं कुशीलं निजबन्धुहीनं
शोकार्दितं हानियुतं सदैव ॥ ३५॥

त्रिंशांशको भूमिसुतस्य लग्ने
करोति मर्त्यं व्यसनाभिभूतम् ।
व्ययेन हीनं बहुवैरयुक्तं
प्रपूजितं भूपतिना सदैव ॥ ३६॥

त्रिंशल्लवाः सूर्यसुतस्य लग्ने
करोति मर्त्यं परदेशरक्तम् ।
क्षुत्तृच्छमार्तं बहुरोगयुक्तं
स्त्रीणामभीष्टं प्रणतारिपक्षम् ॥ ३७॥

त्रिंशांशको देवगुरोर्विलग्ने
नरं सुवाते बहुशास्त्ररक्तम् ।
दृढप्रतिश्चं दृढसाहसं च
सत्यात्मकं देवगुरुप्रसक्तम् ॥ ३८॥

त्रिंशांशकः सोमसुतस्य लग्ने
नरं प्रसूते सुखिनं समृद्धम् ।
सद्धर्मयुक्तं गुरुबन्धुमान्यं
मिताशिनं धर्मपरं कृतज्ञम् ॥ ३९॥

त्रिंशांशको भार्गवनन्दनस्य
लग्ने प्रसूते सदयं मनुष्यम् ।
..........न्वितं सत्यपरं कृतज्ञ
मुदारचेष्टं सुखिनं सुरूपम् ॥ ४०॥

लग्नं यदा स्थानबलेन युक्तं
तदा नृणां स्थानविवृद्धिदं स्यात् ।
करोति पूजां नृपलोकजातां
सौभाग्ययुक्तं च कलत्रलाभम् ॥ ४१॥

लग्नं यदाशोत्थबलेन युक्तं
तदा प्रसूते गुणिनं मनुष्यम् ।
सर्वासु दिक्षु प्रकरोति लाभं

रोगारिनाशं प्रियतां च लोके ॥ ४२॥

चेष्टाबलाढ्यंप्रकरोति लग्नं
नृणांसुचेष्टां प्रियमित्रलाभम् ।
मिष्टान्नपानं विविधं च लोके
चतुष्पदानामधिपत्यतां च ॥ ४३॥

लग्नं यदा कालबलेन युक्तं
तदा नराणां प्रियलोभकारि ।
सदा तु पूजां नृपतेः सलोकं
रोगक्षयं साधुजनेन सख्यम् ॥ ४४॥

लग्नं यदा स्थानबलेन हीनं
तदा प्रसूते परदेशरक्तम् ।
..........स्थानविद्वेषपरं सुजिह्मं
परान्नरक्तं परदारसक्तम् ॥ ४५॥

आशबलोनं प्रकरोति लग्नं
धान्यार्थहानिं सततं नराणाम् ।
प्रमोषणं तकरचारकाद्यैः
पराभवं शत्रुकृतं सदैव ॥ ४६॥

चेष्टबलेन प्रकरोति लग्नं
नृणां कुचेष्टां परदारराता ।
कुचलतां शोकमनन्तरोगं
स्वबन्धुवैरं परतर्कक ॥ ४७॥

लग्नं यदा कालबलेन हीनं
नरं तदा हीनतरं प्रसूते ।
विधर्मशीलं विगताभि..........
श्लेष्मार्दितं चौरविवर्जितं च ॥ ४८॥

षड्वर्गशुद्ध याद जन्मलग्न
भवेच्छरीरे मनुजस्य सौख्यम् ।
सौभाग्ययुक्तं यदि पाणिपादं
कान्त्यान्वितं सर्वगुणैः समेतम् ॥ ४९॥

तदेव युक्तं यदि पापवर्गे
हीनं शिरालुं च विरुद्धगन्धम् ।
..........
भवेत् सदा स्त्रीषु भयानकं च ॥ ५० ॥

षड्वर्गशुद्धं यदि सूर्यपुत्र-
भौमाश्रितं सम्भवते .......... ।
दुष्कर्मरूपो रविणा ..........न युक्तः
काणो धिकाङ्गस्तु निरिक्षितं च ॥ ५१ ॥

भौमांशके सौम्यदृशा विहीने
भौमे व्ययस्थे निधनाश्रिते वा ।
भवेत् सकर्णाक्षिरुजो मनुष्यः
कृशोऽल्पवीर्यः सततं च दीनः ॥ ५२ ॥

सूर्यांशके सौम्यदृशा विहीन
सूर्ये व्ययस्थे निधनस्थिते वा ।
..........वेन्निशान्धस्तु निशा प्रजातो
दिवाथवा तैमिरिको मनुष्यः ।
सौम्योऽधिकाङ्गस्तु शिरावनद्धः ॥ ५३ ॥

पापा व्ययस्थाः प्रभवन्ति यस्य
..........अ रविणा यदा स्युः ।
खल्वाटकस्तत्र भवेत् प्रजातो
विपर्ययस्थाः शुचिवर्जितश्च ॥ ५४ ॥

क्लीबे व्ययस्थे त्वथ पंचमे च
लग्न ग्रहे चैव भवेन्मनुष्यः ।
बृहत्तडाकारधरोऽतिरुद्रो
ग्रहैश्चलैर्दृष्टिविवर्जितश्च ॥ ५५ ॥

.........०दये सूर्यसुते कुदृष्टि-
श्चन्द्रे व्ययस्थे प्रभवेऽर्धदृष्टिः ।
कुजस्य लग्ने कुजसंश्रिते च
विरूपनेत्र प्रभवेन्मनुष्यः ॥ ५६ ॥

पापा यदा लग्नगताः सम्स्ताः

सौम्याश्च सर्वेऽष्टमगा भवन्ति ।
कुब्जो भवेदत्र नरोऽभिजातो
..........द्वामनकः प्रदिष्टः ॥ ५७॥

पापाश्चतुर्था यदि नैधनस्थाः
सौम्या ग्रहाः खे जनकोऽत्र योगे ।
विमिश्रितैस्तैः प्रभवेन्मनुष्यः
पापांशकस्थैः संभवेश्च कुष्ठी ॥ ५८॥

दुर्गन्धिवक्त्रो व्ययगैश्च पापै-
स्तृतीयगैः सौम्यनपुर्धरैश्च ।
पापांशकस्थैरथ हृद्रदः स्यात्
सदा दरिद्रोऽरिगृहं प्रयातैः ॥ ५९॥

पापांशके पापनिरिक्षिते च
पापे विलग्ने शुभदृष्टिहीने ।
भवेन्मनुष्यो वृषणैः प्रलम्बै-
र्जीवस्य दृष्टयाधिकलिङ्ग एव ॥ ६०॥

नखैर्विहीनो रविजस्य लग्ने
मन्दांशके मन्ददृशा विहीने ।
मन्दस्य वर्गे शकटं प्रयात
एवं हि चक्रस्य विदृष्टकः स्यात् ॥ ६१॥

तुलाधिकः सूर्यसुते व्ययस्थे
भौमे सुखस्थे विनितायकेऽर्के ।
महादरश्चन्द्रसुते कुनेत्रः
कुमित्ररक्तो वनिताविहीनः ॥ ६२॥

वक्रे व्ययस्थे निधनाश्रिते ज्ञे
विवस्वरति ..........खगेऽर्कपुत्रे ।
भौमेऽस्तगेहे गगने दिनेशे
दिजि .......... मूर्तिगते च वक्रे ॥ ६३॥

सूर्ये सुखस्थे रविजेऽष्टमस्थे
स्ववर्गसंस्थे शशिजे तनुस्थे ।
शूरो भवेत् कान्तियुतो मनुष्यः

कलस्वनः सत्यर्तः सुचक्षुः ।
सुमीनवक्षा रतकोविदश्च ॥ ६४॥

जीवांशके जीवयुतो विलग्ने
भवेन्मनुष्यः सुभगः सुरूपः ।
स्त्रीणामभीष्टः सुरतेऽतुलस्थः
प्रियंवदो गितविचक्षणश्च ॥ ६५॥

शुक्रांशके शुक्रयुते विलग्ने
भोगी सुविज्ञः प्रणतो मनुष्यः ।
भवेत् सुरूपः सततं दयालुः
..........भिरणप्रियश्च ॥ ६६॥

चन्द्रांशक चन्द्रयुते विलग्ने
शुक्रो महीभोगयुतो मनुष्यः ।
भवेत्तथाज्ञो मलिनः कृशश्च
कृच्छः सदा स नयतिर्वृथादः ॥ ६७॥

सौम्ये विलग्ने ..........
शुभांसवक्षाः शुभजे नवांशे ।
चन्द्रस्य होरा शुभबाहुधात्री
त्रिंशांशकः सौम्यभवः सुशीलः ॥ ६८॥

सूर्यांशके सौम्यसमुद्रवे च
नरो भवेच्छोभनजानुपार्श्वः ।
लग्नं शुभालोकित्मिष्टवीर्य-
मोजो विधत्ते सततं नराणाम् ॥ ६९॥

पापो यदा नीचगतो विलग्ने
स्वभावसंस्थः शुभवर्जितश्च ।
स्याच्छयामदन्तः पुरुषोऽत्र जातः
क्रियाविहीनः पिशुनस्वभावः ॥ ७०॥

..........विहीने
विलग्नसंस्थे पुरुषोऽत्र जातः ।
कन्यारतो वांछितपापयुक्तं
स्त्रीलपटः स्यात् सततं विलुब्धः ॥ ७१॥

शनैश्चरे सप्तमगे विलग्ने
यदा नवांशो धरणिसुतस्य ।
वृद्धाङ्गनानां निरतो मनुष्यः
सदा भवेत् कामनिपीडितात्मा ॥ ७२॥

यदा विलग्ने सधनुः शशाङ्को
नवांशके स्याद्रविनन्दनस्य ।
वेश्यानुरक्तं कुरुते मनुष्यं
..........अम् ॥ ७३॥

सिंहांशके सूर्ययुते विलग्ने
भौमेन दृष्टे रविजेऽस्तसंस्थ ।
भवेन्नरो वक्रभगोऽत्रयोगे
विपर्ययाद्वक्ररतानुरक्तः ॥ ७४॥

शनैश्चरे नीचगतेऽस्तसंस्थे
पापे विलग्ने शुभदृष्टिहीने ।
..........अन्मनुष्यः करतोऽक्षतप्सुः
सदा विरक्तो वरयोषितानाम् ॥ ७५॥

धनाश्रिते भूतनये सुखस्थे
सौरे व्ययस्थेऽरिनवांशसंस्थे ।
रूपोऽत्र भवेन्मनुष्यः
सर्वत्र निन्द्यः कृतविस्मृतिश्च ॥ ७६॥

सूर्यत्रिकोणे यदि भूमिपुत्रः
शनैश्चरे सौम्यगृहाश्रिते च ।
तदा मनुष्यस्तु सुदीर्घजानु-
र्विरूपदेहः प्रियसाहसश्च ॥ ७७॥

व्रणार्दिताङ्गः सततं विरूपः
प्रजावियुक्तः पिशुनस्वभावः ।
शनैश्चरे मृत्युगते व्ययस्थे
भौमे भवेत् पापरतो मनुष्यः ॥ ७८॥

इति श्रीवृधयवने ल्हुस्थानचिन्ता ॥

आध्याय २४अ

तनुस्थानचिन्ताध्यायः

तनुस्थितो वासरपः स्वतुङ्गे
तीव्रां तनुं संजनयेन्नराणाम् ।
तुङ्गांशके वा दृढतासमेतां
षड्वर्गशुद्धो बहुधार्यतां च ॥ १॥

नीचाश्रितस्तीक्ष्णक..........
कायं विधत्ते सरुजं सदैव ।
..........ण्यहीनं भृशनिचभागे
..........वर्गे नतये प्रयुक्तम् ॥ २॥

मित्राश्रयस्थो यदि वासरेशो
मूर्तिं गवो दीर्घतरं प्रसूते ।
मित्रस्य भागे जतिलं नितान्तं
वर्गोत्तमे वाधिकशासिनं च ॥ ३॥

शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-
र्लग्नाश्रितो हीनशरीरकं च ।
नरं प्रसूते त्वथ शत्रुभागे
हीनक्षकोणं नयवर्जितं च ॥ ४॥

चन्द्रो विलग्ने परिपूर्णदेह-
स्तुङ्गस्थितः सौम्यतनुं प्रसूते ।
तुङ्गस्य भागे सुमनोहरां च
षड्वर्गशुद्धोऽपरनेत्रयुक्ताम् ॥ ५॥

नीचाश्रितः क्षीणतनुः शशाङ्कः
काणां तनुं लग्नगतः प्रसूते ।
निशान्धकं नीचनवांशशंस्थः
पापोत्थवर्गे तिमिरेण युक्ताम् ॥ ६॥

मित्रगृह शीतकरा विलग्ने
तनुं सुवाते सुभगां मनोज्ञाम् ।

मित्रस्यभागे वरवक्रयुक्तां
वर्गोत्तमस्थः सुशरितकान्तिम् ॥ ७॥

निशान्धकं शत्रुगृहाश्रिते च
लग्नं गतः स्थूलरुडं प्रसूते ।
शत्रोर्विभागे पृथुदीर्घकं च
मूलत्रिकोणेषु शुभाधरौष्ठम् ॥ ८॥

भौमः स्वतुङ्गे मूर्तिसंस्थः
करोति संरक्तननीशमर्त्यम् ।
तुङ्गांशके वा चिपिटस्वभावं
षड्वर्गशुद्धस्त्वथ कर्कशाख्यम् ॥ ९॥

नीचाश्रितो भूतनयो विलग्ने
करोति सान्द्रं मदनं सदैव ।
नीचांशके तैमिरिकं निशान्धं
पापस्य वर्गे त्वथ वक्रदृष्टिम् ॥ १०॥

.......... ।
मित्रांशके रोगसमेतदृष्टिं
वर्गोत्तमे दूरविलोकनं च ॥ ११॥

शत्रोर्गृहे वा यदि भूमिपुत्रो
मित्रं प्रसूते बहुदृ..........
समीपदृष्टिं च नवांशके वा
मूलत्रिकोणे च जलार्ददृष्टिम् ॥ १२॥

बुधा विलग्न याद् तुङ्गसंस्थो
नरं सुवाते सुमुखोरुनासम् ।
तुङ्गांशके वा सुरदाधरैष्ठं
षड्वर्गशुद्धः सुशरिरकान्तिम् ॥ १३॥

नीचाश्रितो वा यदि सोमपुत्र-
स्तनुस्थितो वक्रकुगन्धभाजम् ।
नीचांशके दीर्घकराकजिह्वं
.......... ॥ १४॥

मित्राश्रयस्था यदि सोमपुत्रो
लग्नं गतः शुभ्रशिरोरुहं च ।
मित्रस्य भागे त्वथ शुभ्रदृष्टि
वर्गित्तमस्थः सुहनुं सदैव ॥ १५॥

शत्रोर्गृहे वा यदि सोमपुत्रः
करोति मर्त्यं तनुगः करालम् ।
शत्रोर्विभागे चपलस्वभावं
त्रिकोणगो रोगविवृद्धकायम् ॥ १६॥

सुरेज्यमन्त्री यदि तुङ्गसंस्थो
लग्ने मनोज्ञं जनयेन्मनुष्यम् ।
उच्छांशके वा शुभबाहुहस्तं
षड्वर्गशुद्धः शुभचर्मभाजम् ॥ १७॥

नीचाश्रितो देवगुरुर्विलग्ने
खंजं सुवाते निरुजं नितान्तम् ।
नीचांशके खंजननासकं च
.......... वर्गे च सुभूषणाढ्यम् ॥ १८॥

मित्राश्र्यस्थो यदि मूर्तिसंस्थो
गुरुः प्रसूते वरवस्त्रभाजम् ।
मित्रांशके वा सुकटिं सुनाभिं
वर्गोत्तमस्थः सुभगोदरं च ॥ १९॥

शत्रोर्गृहे ता यदि देवपूज्यो
मूर्तिस्थितः स्वोदरिकं प्रसूते ।
शत्रोर्विभागे त्वथ फुल्लमेव
मूलत्रिकोणे प्रजनत्यलिङ्गम् ॥ २०॥

शुक्रः स्वतुङ्गे यदि लग्नसंस्थः
सुरूपजानुं मनुजं प्रसूते ।
स्वोच्छांशकस्थः शुभपाणिपादं
षड्वर्गशुद्धः सुविभक्तगात्रम् ॥ २१॥

नीचस्थितो वा यदि दानवेज्यो
मूर्तिस्थितः स्वल्पकचं प्रसूते ।

स्वल्पाटकं वा यदि नीचहागे
पापात्थवर्गे बलिरोमभाजम् ॥ २२॥

मित्रगृहस्थो यदि दैत्यपूज्यः
सौभाग्ययुक्तं शुभकीर्तिभाजम् ।
नरं प्रसूते सुनखं विभागे
वर्गोत्तमस्थो बहुरुपिणं च ॥ २३॥

शुक्रो यदा शत्रुगृहं प्रपन्नो
लग्नं गतः कुब्जतनुं प्रसूते ।
शत्रोर्विभागेऽतिकृशं विग..........
मूलत्रिकोणे नयनाभिरामम् ॥ २४॥

शनैश्चरो मूर्तिगतः स्वतुङ्गे
लग्नं गतः श्यामतनुं मनुष्यम् ।
तुङ्गांशके स्वे त्वथ भिन्नवर्णं
षड्वर्गशुद्धस्त्वथ गौर ..........अत्रम् ॥ २५॥

नीचस्थितः सूर्यसुतो विलग्ने
कासार्तमर्त्यं जनयेनमनुष्यम् ।
नीचाशकस्थः कफवातपातं
पापस्य वर्गे त्वथ पित्ततां च ॥ २६॥

मित्राश्रयस्थो यदिसूर्यसूनु-
र्लग्नस्थितो गौरवपुं प्रसूते ।
मित्रांशकस्थोऽस्थसायसार
वर्गोत्तमस्थस्त्वथ पीवराङ्गम् ॥ २७॥

शत्रोर्गृहस्थो रविजोऽतिरूप्यं
लग्नाश्रितः स्थूलनखं प्रसूते ।
सुस्थूलदन्तं रिपुभागसंस्थो
मूलत्रिकोणे तु सुदीर्घजानुम् ॥ २८॥

स्वोच्छस्थितः स्वभवने क्षितिपालतुल्यो
लग्नेऽर्कजे भवति देशपुराधिनाथः ।
शेषेषु दुःखमदपीडित एव बाल्ये
दारिद्र्यकामव्यसनो मलिनोऽलसश्च ॥ २९॥

इति श्रीवृद्धयवने तनुस्थानचिन्ता ॥

आध्याय २५
धनस्थानचिन्ताध्यायः
सूर्यो द्वितीये यदि तुङ्गसंस्थो
..........ते नृपमानजात्म् ।
उच्छांशके वा नृपसेवकं च
षड्वर्गशुद्धः शुभलोकदत्तम् ॥ १॥

नीचाश्रितो बासरपो द्वितीये
पापार्जितं धर्मधनं प्रसूते ।
नीचांशकस्थः स्थलजं सदैव
पापस्य वर्गे त्वथ चौर्यजं च ॥ २॥

मित्राश्रस्थो दिनपो द्वितीये
करोति जातं धनधान्यसम्भवम् ।
मित्रस्य भागे त्वथ लोहजातं
वर्गोत्तमस्थः परदारजातम् ॥ ३॥

शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-
र्द्वितीयगः स्वल्पधनं प्रसूते ।
कष्टान्तदेशेऽधमसवया च
मूलत्रिकोणे त्वथ भिक्षजं च ॥ ४॥

चन्द्रो द्वितीये यदि तुङ्गसंस्थे
मुक्तामणिप्रायभनं प्रसूते ।
तुङ्गांशके वा कनकं च रूप्यं
षड्वर्गशुद्धो विविधं हिरण्यम् ॥ ५॥

नीचाश्रितः शीतकरः प्रसूते
द्वितीयगो वित्तमसद्व्ययं च ।
नीचस्य भागे त्य् व्ययेन हीनं
पापोत्थवर्गे वसवां भयं च ॥ ६॥

मित्राश्रयस्थो यदि वा शशाङ्को

वित्तं प्रसूते सुतजं नराणाम् ।
मित्रस्य भागे कृषिकृत्प्रसूतं
वर्गोत्तमस्थः सुहृदर्जितं च ॥ ७॥

शत्रोर्गृहे वा यदि रात्रिनाथः
कोशाश्रितच्छौर्यधनं प्रसूते ।
तदांशके वाथ कुकर्मजातं
मूलत्रिकोणे त्वथ भार्यजोत्थम् ॥ ८॥

भौमः स्वतुङ्गे यदि कोशगः स्याद्
युद्धोद्भवं संजनयेद्धनं च ।
उच्छांशके वातिकृशं च कष्टात्
षड्वर्गशुद्धः स्वजनोद्भवम् च ॥ ९॥

नीचाश्रितो भूतनयस्तु नीचे
द्वीतीयगो निर्धनमेव सूते ।
नीचांशके बह्व्रणमेव नित्यं
पापोत्थवर्गे व्रणयुक्तदेहम् ॥ १०॥

मित्रगृहे वा यदि भूमिसुते
कोशाश्रितो मित्रबलेन जातम् ।
धनं प्रसूते सुहृदंशके च
वर्गोत्तमे देवगुरुप्रसादात् ॥ ११॥

शत्रोर्गृहे भूतनयो द्वितीये
धनं प्रसूते न कदाचिदेव ।
शत्रोर्विभागे धृणपापसङ्गान्
मूलत्रिकोणे तु जनोपरोधात् ॥ १२॥

सौम्यस्वतुङ्गे यदि कोशसंस्थः
..........नं भूरिधनस्य धत्ते ।
तुङ्गांशके सस्यचतुष्पदात्थ
षड्वर्गशुद्धो विविधैरूपयैः ॥ १३॥

नीचाश्रितः सोमसुतो धनस्थो
निकृष्टवित्तं कुरुते नराणाम् ।
नीचांशकस्थो रिपुतोऽतिदैन्यात्

पापोत्थवर्गे बहुवंचनाश्च ॥ १४॥

मित्राश्रितस्थे यदिसोमपुत्रो
द्वितीयगो वाजिजमेव वित्तम् ।
धत्ते नराणां चं सुहृद्विभागे
वर्गोत्तमे वा सुकृतं प्रसूते ॥ १५॥

बुद्धो यदा शत्रुगृहं प्रयातो
द्वितीयगः शत्रुनीषेवणेन ।
धनं भवेच्छत्रुवि..........
त्वल्पं त्रिकोणे वरलोकजातम् ॥ १६॥

जीवो द्वितीये यदि तुङ्ग
सदा धनं न्यायजितं प्रसूते ।
तुङ्गांशके च द्विजसाधुवृत्त
षड्वर्गशुद्धो नृपसंभवं च ॥ १७॥

नीचाश्रितो देवगुरुर्द्वितीये
धनं प्रसूते परदारजातम् ।
नीचांशके चान्त्यजलोकजातं
पापस्य वर्गे बहुकष्टजातम् ॥ १८॥

मित्राश्रयस्थो यदि देवमन्त्री
द्वितीयगो वस्त्रगजाश्वजं च ।
धत्ते तदंशे न कृषिप्रसूतं
वर्गोत्तमस्यः सुजनप्रदन्तम् ॥ १९॥

यदा द्वितीयेऽरिगृहे सुरेज्यो
विधत्तेऽरिनिषेवणेन ।
शत्र्वंशके शत्रुजनेन दत्तं
मूलत्रिकोणे निधिजं सदैव ॥ २०॥

शुक्रे द्वितीये यदि तुङ्गसंस्थः
सदाक्षयं भूरिधनं प्रसूते ।
तुङ्गांशके पूर्वजसंचितं च
षड्वर्गशुद्धो द्वितयं नितान्तम् ॥ २१॥

नीचाशितो दैत्यगुरुर्द्वितीये
धनं सुवाते श्रुतिजं नितान्तम् ।
द्यूतर्जितं नीचनवांशसंस्थः
पापस्य वर्ग् परदेशसऽगात् ॥ २२॥

मित्राश्र्यस्थो यदि दानवेज्यो
द्वितीयसंस्थो नृपजं विधत्ते ।
..........न्नं तदशं नृपपुत्रजात
राज्ञी..........मुत्थं यदि शुभवर्गे ॥ २३॥

शुक्रो द्वितीये यदि शत्रुसंस्थो
धनं प्रसूते वरकर्मजातम् ।
शत्रोर्विभागे त्वथ दैन्यजातं
मूलत्रिकोणे स्वसुतार्जितं च ॥ २४॥

शानिर्द्वितीये यदि तुङ्गसंस्थो
धनं प्रसूते तु कुकर्मजातम् ।
तदंशके कष्टविनिर्जितं च
षड्वर्गशुधो व्यसनोद्भवं च ॥ २५॥

नीचं गतो भास्करजः प्रसूते
निःकिंचनं नित्यमनेकदुःखम् ।
नरं तदंशेऽन्त्यजवित्तभाजं
..........वर्गे तु सुपापजं च ॥ २६॥

मित्राश्रयस्थो यदि सूर्यपुत्रो
द्वितीयगः स्वस्थधनं प्रसूते ।
मित्रस्य भागे त्वथ मृन्मयं च
वर्गोत्तमस्थो जलजं सदैव ॥ २७॥

सौरो यदा शत्रुगृहाश्रयस्थो
द्वितीयगः पापधनं प्रसूते ।
शत्रोर्विभगे बहुदासतोत्थं
मूलत्रिकोणे परपोष च ॥ २८॥

सहस्त्रनाथो दिनपः प्रदिष्टो
लक्षाधिपो रत्रिकरः सदैव ।

शताधिपो भूतनयः सदैव
कोटीश्वरः सोमसुतः सदैव ॥ २९॥

स्ववर्गाधिनाथः सुरराजमन्त्री
शुक्रो ह्यसंख्यः शनिर्भौमतुल्यः ।
स्वतुङ्गाः स्युर्यदि सर्व एव
अर्थान्तराले त्वनुपातजातम् ॥ ३०॥

स्ववर्गजं वित्तमहो दधत्ति
हित्वा हि शुक्रं बहुसङ्गजं च ।
स्वं स्वं धनं स्वासु दशासु सम्यक्
.......... ॥ ३१॥

इति श्रीवृद्धयवने धनस्थानचिन्ता ॥

---

आध्याय २६

सहजस्थानचिन्ताध्यायः

तृतीयसंस्थो यदि वासरेशो
मित्रं नृपं तुङ्गगतो विधत्ते ।
तुङ्गांशके वा नृपसंभवं च
षड्वर्गशुद्धस्त्वथ सार्वभौमम् ॥ १॥

नीचाश्रितो नीचधनं विधत्ते
मित्रं तृतीये यदि तीक्ष्णरश्मिः ।
नीचांशके भिक्षुकपुत्रवैरं
पापस्य वर्गे त्वथ वारणं च ॥ २॥

मित्राश्रयस्थो यदि वासरशी
मित्रं द्विजेन्द्रं कुरुते तृतीये ।
मित्रांशकस्थो जनयेत् सुशीलं
वर्गोत्तमस्थोऽद्भुतशास्त्ररक्तम् ॥ ३॥

रवितृतीयेऽरिगृहं प्रयातो
मित्रं विधत्ते रिपुवर्जिताङ्गम् ।
द्विषविभागे गुणवर्जितं च
मूलत्रिकोणे पतिमेव शान्तम् ॥ ४॥

तृतीयगः शीतकरः सुवाते
मित्रं स्वतुङ्गे कृपणस्वभावम् ।
..........मेव भागे परतर्ककं च
षड्वर्गशुद्धः परदाररक्तम् ॥ ५॥

नीचाश्रितो रात्रिपतिस्तृतीये
मित्रं स्वातेऽत्यजमेव नित्यम् ।
नीचस्य भागे त्वथ नर्तकं च
भण्डं च वर्गे खलसम्भवं च ॥ ६॥

मित्राश्रयस्थो यदि शीतरश्मि-
र्मित्रं सुवाते परवंचकं च ।
मित्रस्य भागे बहुदोषजं च
वर्गोत्तमस्थो घृणया विहीनम् ॥ ७॥

तृतीयगः शीतकरो विधत्ते
नराधमं शत्रुगृहं प्रयातः ।
शत्रोर्विभागे बहुमाययाढ्यं
मूलत्रिकोणे परदाररक्तम् ॥ ८॥

भौमस्तृतीये यदि तुङ्गसंस्थो
मित्रं विधत्ते वरभूमिपालम् ।
तुङ्गांशके वा नृपतेरमात्यं
षड्वर्गशुद्धो द्वितयं सदैव ॥ ९॥

नीचाश्रितो भूतनयस्तृतीये
मित्रं विधत्ते बहुकामसक्तम् ।
नीचांशकस्थो भृतकं च वैद्यं
पापोत्थवर्गे व्यसनाभिभूतम् ॥ १०॥

मित्राश्रयस्थो यदि भूमिपुत्र-
स्तृतीयगो भूरिसुखं प्रसूते ।
मित्रांशके वाक्षयजं कुमारं
वर्गोत्तमस्थः प्रचुरान्नपानम् ॥ ११॥

शत्रोर्गृहस्थो यदि भूमिपुत्रो

मित्रं प्रसूते सहजाश्रितं च ।
तस्थैव भागे च समृद्धिभाजं
मूलत्रिकोणे त्वथ दण्डनाथम् ॥ १२॥

सौम्यस्तृतीये यदि तुङ्गसंस्थो
.......... शान्तमतिं प्रसूते ।
तुङ्गांशके कंचकिन सम..........
षड्वर्गशुद्धः सुतरा कृत्..........म् ॥ १३॥

नीचारितः सोमसुतस्तृतीये
मित्रं विधत्ते वृजिनैः समेतम् ।
गोपालकं नीचविभागसंस्थः
पापस्य वर्गे गतसौहृदं च ॥ १४॥

मित्राश्रयस्थः शैजस्तृतीय
मित्रं सुवाते बहुकर्मभाजम् ।
भागे त्वथ नापितं च
..........खल........ रम् ॥ १५॥

शत्रोर्गृहस्थो यदि सोमपुत्रो
मित्रं तृतीये कुरुते सुनिन्धम् ।
तस्थैव भागे जनितातिगं च
मूलत्रिकोणेऽथ मलिम्लुचम् च ॥ १६॥

नीचस्तृतीये यदि तुङ्गसंस्थो
मित्रं सुवात् विनयेन हीनम् ।
उच्छांशके दम्भपरं नृशंसं
षड्वर्गशुद्धस्तु तथाप्रजं च ॥ १७॥

नीचाश्रितो देवगुरुस्तृतीये
मित्रं प्रसूते बहुपाचितारम् ।
तदंशके द्यूतरतं सदैव
.......... वर्गे गतबधुवर्गम् ॥ १८॥

जीवो यदा मित्रगृहे तृतीये
तदा प्रसूतेऽतिकृशं च मित्रम् ।
मित्रांशके पण्यपरं प्रधानं

वर्गोत्तमस्थः खलु दन्तकारम् ॥ १९॥

तृतीयगो देवगुरुर्य..........
शत्रोर्गृहे क्लीवसुखं सुवाते ।
तदंशके शिल्पिनमप्रधानं
मूलत्रिकोणे पतितं निकृष्टम् ॥ २०॥

शुक्रो यदा तुङ्गतस्तृतीये
तदा सुवाते पतितं च मित्रम् ।
तुङ्गांशके वा नृपसेवकं च
षड्वर्गशुद्धं कलहप्रियं च ॥ २१॥

नीचाश्रितो दैत्यगुरुस्तृतीये
मित्रं विधत्ते वधकं नृशंशम् ।
नीचांशके निचकुलप्रसूतं
पापस्य वर्गे पतितं नृशंसम् ॥ २२॥

मित्राश्रयस्थो भृगुजस्तृतीये
करोति मित्रं खलु भाण्डम्व ।
मितांशके वारणमप्रशस्तं
वर्गोत्तमस्थः शबरं कृतघ्नम् ॥ २३॥

रिपोर्गृहे भार्गवजः प्रसूते
तृतीयगः क्रीडनकं च मित्रम् ।
तदंशके शिल्पिनमप्रशस्तं
मूलत्रिकोणेऽथ जनैर्निरस्तम् ॥ २४॥

सूर्यात्मजस्तुङ्गतस्तृतीये
मित्रं सुवाते वरभूमिपालम् ।
तुङ्गांशके वित्तपतिं प्रसिद्धं
षड्वर्गशुद्धो बहुशास्त्ररक्तम् ॥ २५॥

नीचाश्रितः सूर्यसुततृतीये
मित्रं प्रसूते मलिनस्वभावम् ।
नीचांशके वंचनतत्परं च
पापस्य वर्गे घृनथा विहीनम् ॥ २६॥

मित्राश्रयस्थः खलु सूर्यपुत्रो
मित्रं प्रसूते सचिवं नयचम् ।
मित्रांशके वा गुणवित्तभाजं
वर्गोत्तमस्थ स्थितिमानयुक्तम् ॥ २७॥

शनिर्यदा शत्रुगृहाश्रयस्थ-
स्तृतीयगः पापरतं च मित्रम् ।
धत्ते तदंशे वृजिनं सुदीनं
मूलत्रिकोणे विजितारिपक्षम् ॥ २८॥

..........सावता प्रवि
दशाधिपः शीत्करस्तु ..........
सहस्रमित्रः क्षितिजो ..........उ........
शताधिपो देवपुरोहितश्च ॥२९॥

अशीतिनाथो भृगुन। ..........
सौरस्तु भौमेम ..........मितोऽधिको वा ।
स्वतुङ्गराशौ यदि वत्तमानाः
सर्वे ..........उ........अतस्य वशाद्दन्ति ॥ ३०॥

इति श्रीवृधयवने सहजस्थानचिन्ता ॥

---

आध्याय २७

## सुखस्थानचिन्ताध्यायः

..........
..........बहुदुष्टजातम् ।
तुङ्गांशकस्थोऽणुसुखं कदाचित्
षड्वर्गशुद्धः परदारश्चं च ॥ १॥

नीचाश्रितो वासरपश्चतुर्थे
सुखं विधत्ते न कदाचिदेव ।
निचांशके दुःखविमिश्रितं च
पापस्य वर्गे धृणदुःखमिश्रम् ॥ २॥

मित्राश्रयस्थो दिनकृश्चतुर्थे
सुखं विधत्ते वृजिनैः समेतम् ।

चौर्यद्भवं शत्रुविभागसंस्थो
वर्गोत्तमस्थोऽक्षजमेव नित्यम् ॥ ३॥

शत्रोर्गृहे वासरपश्चतुर्थे
युद्धे तु सौख्यं कुरुते नराणाम् ।
शत्रोर्विभागे परसेवया च
मूलत्रिकोणे वधवन्धजातम् ॥ ४॥

सुखस्थितः शीतकरः स्वतुङ्गे
सुखं विधत्ते गजवाजिजातम् ।
तुङ्गांशके हेमसमुद्भवं च
षड्वर्गशुद्धो विविधं सदैव ॥ ५॥

नीचाश्रितः शीतकरः ..........
सुखं सदा द्यूतजमेव पुंसाम् ।
नीचांशके भूरिकृषिप्रसूतं
पापस्य वर्गे बहुपापजातम् ॥ ६॥

मित्राश्रयस्थः खलु शीतरश्मिः
सुखस्थितो भूरिसुखं विधत्ते ।
सुताद्भव मित्राविभागसंस्थो
वर्गोत्तमस्थो वनितोद्भवं च ॥ ७॥

चतुर्थगो रात्रिपतिः प्रसूते
शत्रोर्गृहे सौख्यमनीतिजातम् ।
शत्रोर्विभागे कपटप्रसूत
मूलत्रिकोणे त्वथ धर्मजातम् ॥ ८॥

चतुर्थो भूतनयः स्वतुङ्गे
सुखं विधत्ते परसूदनेन
तुङ्गांशकस्थः परबन्धनेन
षड्वर्गशुद्धः परवंचनेन ॥ ९॥

सुखाश्रितो भूमिसुतस्तु नीचे
सौख्यं कदाचिन्न करोति पुंसाम् ।
नीचांशकस्थः परपोषणेन
पापत्य वर्गे वधबन्धनेन ॥ १०॥

मित्रारयस्थः क्षितिजश्चतुर्थे
..........परदेशयोगात् ।
मित्रांशकस्थः सुरतप्रसङ्ग..........
वर्गोत्तमस्थः परवित्तनाशात् ॥ ११॥

शत्रोर्गृहे स्याधदि भूमिपुत्र-
र्चतुर्थगः पुंश्चलजं च सौख्यम् ।
धत्ते तदंशे करयोनिजातं
मूलत्रिकोणे सुखमोहनाढ्यम् ॥ १२॥

सौम्यः सुखस्थः सुखमेव धत्ते
महाजनोत्थं यदि तुङ्गसंस्थः ।
तुङ्गांशके पार्थिवजं च पुंसां
षड्वर्गशुद्धो व्ययमेव पुंसाम् ॥ १३॥

नीचाश्रयस्थः शशिजो विधत्ते
चतुर्थगः क्लेशजमेव सौख्यम् ।
नीचांशकस्थः परसेवया च
.......... अतिविर्गहणेन ॥ १४॥

मित्राश्रयस्थः शशिजश्चतुर्थे
सुखं विधत्ते वरपुत्रजातम् ।
मित्रांशकस्थस्तु कलत्रजातं
वर्गोत्तमस्थो दुहितोद्भवं च ॥ १५॥

शत्र्वाश्रयस्थः शशिजश्चतुर्थे
सुखं विधत्ते क्रयविक्रयेण ।
तस्यैव भागे पशुपालनेन
मूलत्रिकोणे निजबन्धवोत्थम् ॥ १६॥

जीवश्चतुर्थे यदि तुङ्गसंस्थो
सुखं विधत्ते सकलं सदैव ।
तुङ्गस्य भागे च तथा तदर्धं
षड्वर्गशुधश्च सुधर्मयुक्तम् ॥ १७॥

नीचाश्रितो देवगुरुश्चतुर्थे

सौख्यं विधत्ते बहुनीचसङ्गात् ।
नीचांशकस्थश्च विचित्रभावात्
पापस्य वर्गे परपोषणेन ॥ १८॥

मित्राश्रयस्थे सुरराजपूज्ये
चतुर्थगे वंशजमेव सौख्यम् ।
भवेत्तदंशे बहुभृत्यजात
वर्गोत्तमस्थे भगिनीसमुत्थम् ॥ १९॥

शत्रोर्गृहथो यदि देवपूज्य..........
स्चतुर्थगो नीचनिषेवणेन ।
सौख्यं विधत्तेऽथ तदंशके वा
मूलत्रिकोणे नृपसङ्गमेन ॥ २०॥

शुक्रः स्वतुङ्गे यदि बन्धु..........
सुखं विधत्ते बहुवित्तजातम् ।
तुङ्गांशकस्थस्तु स्वरोष्ट्रजातं
षड्वर्गशुद्धश्च गजोद्भवं च ॥ २१॥

नीचाश्रयस्थो यदि दैत्यमन्त्री
सुखं विधत्ते परनारिजातम् ।
नीचांशके चैव विलासिनीनां
पापस्य वर्गे गुरुपत्निसङ्गात् ॥ २२॥

मित्राश्रयस्थो भृगुश्चतुर्थे
सौख्यं विधत्ते बहुगोधनोत्थम् ।
मित्रांशकेऽजाविकमेव नित्यं
वर्गोत्तमस्थो महिषीसमुत्थम् ॥ २३॥

शत्रोर्गृहस्थो यदि दैत्यपूज्यः
सुखं विधत्ते कुनिषेवणेन ।
तदंशके वा परदेशवासान्
मूलत्रिकोणे द्विजदेवसङ्गात् ॥ २४॥

शनिः सुखस्थो यदि तुङ्गसंस्थः
सुखं विधत्ते मृगपक्षिनाशात् ।
..........अके वा विषभक्षिणेन ........

षड्वर्गशुद्धः कृषिकर्मजातम् ॥ २५॥

नीचाश्रितो भास्करजः प्रसूते
चतुर्थगः सौख्यविना मनुष्यम् ।
नीचांशके लोकनिबन्धनेन
पापस्य वर्गे पररन्ध्रसङ्गात् ॥ २६॥

मित्राश्रयस्थो यदि ..........
विधत्ते स्वकलत्रभुक्तम् ।
मित्रांशके वा स्वकुतुम्बहीनं
वर्गोत्तमस्थः परपीडनेन ॥ २७॥

.......... रानजः प्रसूते
सुखं चतुर्थे परवंचनेन ।
तदंशके मानुषविक्रयेण
मूलत्रिकोणे क्रयविक्रयेण ॥ २८॥

सौख्यः सुरराजमन्त्री ..........
शताधिपः सोमसुतः सितश्च ।
..........अली
..........याधिपाः सूर्यशनैश्चराराः ॥ २९॥

स्वतुङ्गसंस्थ..........
सौख्यानि यच्छन्ति सदा ग्रहेन्द्राः ।
नीचाश्रिता हीनसुखा भवन्ति
षड्वर्गशुद्धाश्च यथा स्वतुङ्गे ॥ ३०॥

इति श्रीवृद्धयवने सुखस्थानचिन्ता ॥

---

आध्याय २८

सुतस्थानचिन्ताध्यायः

तुङ्गश्रितो वासरपः सुतस्थः
सुतान् विधत्तेऽल्पतरान् नृशंसान् ।
तुङ्गांशकस्यः सकलार्थसिद्धिं
षड्वर्गशुद्धः सुभगं मनोज्ञम् ॥ १॥

निचाश्रयथो दिनपः सुतस्थः
सुतान् प्रसूते च हि जातनष्टान् ।
नीचांशकस्थो विकलाङ्गभागान्
पापस्य वर्गे त्वथ गर्भिनष्टान् ॥ २॥

मित्राश्रयस्थो यदि तीक्ष्णरश्मिः
सुतान् प्रसूते पुरतः सुताव्रान् ।
मित्रांशकस्थस्तु सुशीलवृत्तान्
वर्गोत्तमस्थो व्यसनाधिकांश्च ॥ ३॥

सुताश्रितः शत्रुगृहे दिनेशः
सुतान् विधत्ते परदेशजातान् ।
शत्रोर्विभागे त्वथ जारजातान्
मूलत्रिकोणे गुणवर्जितांश्च ॥ ४॥

सुताश्रितः शितकरः ..........
कन्याः प्रसूते विपुलायताक्ष्याः ।
तुङ्गांशकस्थस्तु सुरूपयुक्ताः
षड्वर्गशुद्धः सुभगा मनोज्ञाः ॥ ५॥

नीचाश्रितो रात्रिपतिः ..........
कन्याः प्रसूते च सुरूपयुक्ताः ।
नीचांशकस्थश्च कुबुद्धियुक्ता
गतायुषाश्चैव हि पीतलाश्च ॥ ६॥

मित्राश्रयस्थः सुतगश्च चन्द्रः
कन्याः प्रसूते शुभशीलयुक्ताः ।
मित्रांशके शौचपराः सुदान्ता
वर्गोत्तमे भर्तृपराः सदैव ॥ ७॥

शत्र्वास्त्रयस्थः सुतगस्तु चन्द्रः
कन्या प्रसूतेऽतिखलस्वभावाः ।
शत्रोर्विभागे तु सुकुत्सिताङ्गा
मूलत्रिकोणे नितरां प्रगल्भाः ॥ ८॥

भौमः सुतस्थस्तनयान् विधत्ते
स्वतुङ्गसंस्थोऽल्पसुजिवितांश्च ।

तुङ्गस्य भागे बहुरोगभाजान्
षड्वर्गशुद्धः क्षतजार्द्रदेहान् ॥ ९॥

नीचाश्रितो भूतनयः सुतस्थः
सुतान् विधत्ते परदाररक्तान् ।
अदीर्घजीवांश्च तदंशकस्थः
पापस्य वर्गे बहुपापरक्तान् ॥ १०॥

मित्राश्रयस्थः क्षितिजः सुतस्थः
सुतान् विधत्ते कृपणस्वभावान् ।
मित्रांशकस्थः कुविधिप्रसक्तान्
वर्गोत्तमस्थो विजितारिपक्षान् ॥ ११॥

शत्र्वाश्रयस्थः सुतगो महीजः
करोति पुत्रान् व्रणरु..........
तदंशकस्थः सततं कुचैलान्
मूलत्रिकोणे परतर्ककांश्च ॥ १२॥

बुधः स्वतुङ्गे यदि पंचमस्थः
सुतान् विधत्ते सुभगान् मनोज्ञान् ।
उच्छांशके वा विनयेन युक्तन्
षड्वर्गशुद्धो विनयेन हीनान् ॥ १३॥

नीचाश्रितः सोमसुतः सुतस्थः
सुतान् विधत्ते बहुदुःखयुक्तान् ।
नीचांशकस्थ कन्यकां च
पापस्य वर्गे विकृतान् नृशंसान् ॥ १४॥

मित्राश्रयस्थो यदि पंचमस्थः
करोति सौम्यो निरुजान् सुपुत्रान् ।
मित्रांशकस्थो बहुशास्त्ररक्तान्
वर्गोत्तमस्थो नयसारदक्षान् ॥ १५॥

शत्र्वाश्रयस्था यदि सोमपुत्रः
सुतान् विधत्ते बहुबन्धुपक्षान् ।
तदंशकस्थः पिशुनस्वभावान्
मूलत्रिकोणे गुरुदेवभक्तान् ॥ १६॥

नीजः स्वतुङ्ग यदि पंचमस्थः
पुत्रान् विधत्ते बहुजीवभाजान् ।
तदंशकस्थः सुभगान् भनोज्ञान्
षड्वर्गशुद्धः प्रियदर्शनाश्च ॥ १७॥

नीचाश्रयस्थः खलु पंचमस्थो
जीवो विधत्ते तनयान् सुदुःखान् ।
तस्यैव भागे वृजिनैः समेतान्
पाओअस्य वर्गे गतसौहृदाम्श्च ॥ १८॥

मित्राश्रयस्यः सुतगः सुरेज्यः
सुतान् विधत्ते पतितान् सुरक्तान् ।
द्यूतप्रियान् तस्य विभागसंस्थो
मूलत्रिकोणेऽद्भुतविक्रमांश्च ॥ १९॥

.......... ॥ २०॥

शुक्रः सुतस्थो निजतुङ्गसंस्थः
कन्याः प्रऊते सुभगा मनोज्ञाः ।
तुङ्गांशकस्थो बहुपुत्रयुक्ताः
षड्वर्गशुद्धः शुभरूपयुक्ताः ॥ २१॥

नीचाश्रितो दैत्यगुरुः सुतस्थः
कन्या प्रसूते विविधाः सुरूपः ।
नीचांशकस्थः परर्कचिन्ताः
पापसुअ वर्गे कृपणस्वभावाः ॥ २२॥

मित्राश्रयस्थो भृगुजः सुतस्थः
सुता प्रसूते पतिभक्तियुक्ताः ।
मित्रांशके वा वतसत्ययुक्ता
वर्गोत्तमस्थः प्रभया समेताः ॥ २३॥

शत्र्वाश्रयस्थो भृगुजः सुतस्थः
सुताः सुवाते बहुपापयुक्ताः ।
तदंशके नष्टसुखाः कृतघ्ना
मूलत्रिकोणे हतशत्रपक्षाः ॥ २४॥

शनैश्चरः पंचमगः स्वतुङ्गे
पुत्रान् प्रसूते बहुशत्रुपक्षान् ।
तदंशके वा बहुयोगयुक्तान्
षड्वर्गशुद्धः सुतरां कृतघ्नान् ॥ २५॥

नीचाश्रितः सूर्यसुतः सुतस्यः
सुतान् विधत्ते च स्वभावन..........आन् ।
तदंशके वा ग..........
पापस्य वर्गे बहुरोगभाजान् ॥ २६॥

मित्राश्रयस्थो रविजः सुतस्थः
पुत्रान् विधत्ते कृषिकर्मसक्तान् ।
तदंशके वा पशपालनोत्थान्
वर्गोत्तमस्थो बहुलोकपांश्च ॥ २७॥

शत्र्वाश्रयस्थो रविजः प्रसूते
सुतस्थितः कापुरुषांश्च पुत्रान् ।
तदंशके भूततमानतीव
मूलत्रिकोणे बहुपानभाजान् ॥ २८॥

यदि भवति सुतर्क्षं युग्ममेवाबलानां
विषममथ नराणां प्रायशोजन्मदं स्यात् ।
युवतिपुरुषषण्ढा दृष्टितुल्या ग्रहेन्द्रा
बलमितपरिपाकं सन्ततेर्धारयन्ति ॥ २९॥

क्लीबोपमे पंचमगे तथाभे
षण्ढग्रहाः षण्ढनरं प्रसूते ।
षण्टाश्रितो स्यात् पुरुषः प्रशस्तः
..........नहीनो यदि वाबलाश्च ॥ ३०॥

इति श्रीवृद्धयवने सुतस्थानचिन्ता ॥

---

आध्याय २९
रिपुस्थानचिन्ताध्यायः
..........वासरपोऽरिसंस्थः

शत्रुं विधत्ते व्रतिनं सदैव ।
तुङ्गांशकस्थित अथ विप्रमेव
षड्वर्गशुद्धो नृपतिं सदैव ॥ १॥

नीचाश्रयस्थः सवितारिसंस्थः
शत्रुं विधत्ते कुमतिं कृतघ्नम् ।
नीचांशकस्थः प्रमदानुरक्तं
पापस्य वर्गे परतर्ककं च ॥ २॥

सुहृद्गृहस्थः सवितारिसंस्थः
शत्रुं विधत्ते वणिजानुरक्तम् ।
मित्रांशकस्थस्त्वथ गाजपाल
वर्गोत्तमस्थो बहुशिष्यभाजम् ॥ ३॥

शत्र्वाश्रयस्थो यदि तीक्ष्णरश्मिः
षष्ठे विधत्ते प्रमदासमुत्थम् ।
वैरं तदम्शे त्वथ पंश्चलीभी-
र्मूलत्रिकोणे च विलासिनीभिः ॥ ४॥

चन्द्रोऽरिसंस्थो यदि तुङ्गसंथः
शत्रुं विधत्ते बहुशास्त्ररक्तम् ।
उच्छांशके वा परदाररक्तं
षड्वर्गशुद्धोऽप्यथ पार्थिवं च ॥ ५॥

नीचाश्रितः शीतकरोऽरिसंस्थो
मित्रं न किंचित् कुरुते मराणाम् ।
निचांशकस्थश्च बहुप्रकारं
वैरं ववर्णेन खलोत्थवर्गे ॥ ६॥

मित्राश्रयस्थो यदि शीतरश्मिः
षष्ठस्थितोऽरिं नृपतिं प्रसूते ।
मित्रांशकस्थस्तु नरेन्द्रपुत्रं
वर्गोत्तमस्थः सततं नृशंसम् ॥ ७॥

शत्र्वाश्रयस्थो यदि शीतरश्मिः
शत्रुं विधत्ते विकृतस्वभावम् ।
तस्यैव भागे ह्यथ सैन्यनाथं

मूलत्रिकोणे गुरुवत्सनं च ॥ ८॥

तुङ्गाश्रितो भूतनयस्तु षष्ठे
शत्रुं न पुंसां कुरुते कदाचित् ।
तुङ्गांशके चाथ सुदीनचेष्टं
षड्वर्गशुद्धः परदेशभाजम् ॥ ९॥

भौमोऽरिसंस्थो यदि नीचसंस्थः
शत्रुं विधत्तेऽन्त्यजमेव पुंसाम् ।
नीचांशके वा कृषिकर्मरक्तं
पापस्य वर्गे धनधान्यहीनम् ॥ १०॥

मित्राश्रयस्थो यदि भूमिपुत्रः
षष्थे प्रसूते तनयेन वैरम् ।
मित्रांशके वा त्वथ बान्धवेन
वर्गोत्तमस्थो निजमातुलेन ॥ ११॥

भौमोऽरिसंस्थो यदि शत्रुराशौ
रिपुं विधत्ते गुरुदेवतारिम् ।
तस्यैव भागे घृणया विहीनं
मूलत्रिकोणे प्रियसाहसं च ॥ १२॥

सौम्योऽरिसंस्थो यदि तुङ्गसंस्थः
शत्रुं विधत्ते विकृतवभावम् ।
तुङ्गांशके वा धनिनं विरूपं
षड्वर्गशुद्धः सुरतानुकूलम् ॥ १३॥

बुधोऽरिसंस्थो यदि नीचराशौ
शत्रुं सुवाते विकलं विनेत्रम् ।
काणं तदंशे विकृतांघ्रिदंष्ट्रं
पापस्थ वर्गे द्विजधामरक्तम् ॥ १४॥

मित्राश्रयस्थो यदि सोमपुत्रः
षष्थे विधत्ते सचिवं हि मित्रम् ।
मित्राम्शकस्थः सचिवस्य पुत्रं
षड्वर्गशुद्धः परदाररक्तम् ॥ १५॥

शत्रोर्गृहस्थो यदि सोमपुत्रः
शत्रुं विधत्ते परविन्तरक्तम् ।
चौरं तदंशे सततं नृशंसं
मूलत्रिकोणे व्यसनाभिभूतम् ॥ १६॥

जीवः स्वतुङ्गे यदि षष्ठसंस्थः
शत्रुं प्रसूते बहुदोषभाजम् ।
तुङ्गांशके .......... रिविवर्जितं च
षड्वर्गशुद्धः प्रमदानुकूलम् ॥ १७॥

नीचाश्रये वा यदि देवपूज्यः
षष्थे प्रसूतेऽल्पसुखं च सक्तम् ।
तदंशके वा बहुपानरक्तं
..........वर्गे गुणवर्जितं च ॥ १८॥

मित्राश्रय.......... यदि देवमन्त्री
शत्रुं सुवात्तेऽ..........पतिं प्रसिद्धम् ।
तदंशके वा खरगर्दभाढ्यं
वर्गोत्तमस्थः श्रुतवर्जितं च ॥ १९॥

शत्वाश्र्यस्थः कुरुते सुरेज्यः
शत्रुं विहीनं निजबन्धुवर्गे ।
शत्रोर्विभागे विनयेन हीनं
मूलत्रिकोणे बहुपुत्रपौत्रम् ॥ २०॥

शुक्रः स्वतुङ्गे यदि शत्रुसंस्थः
शत्रुं विधत्ते जितशत्रुपक्षम् ।
तुङ्गांशके वा जितशत्रुदारं
षड्वर्गशुद्धः प्रणतारिपक्षम् ॥ २१॥

नीचाश्रयस्थो रिपुगोऽसुरेज्यः
शत्रुं प्रसूते बहुकन्यकाढ्यम् ।
नीचांशकस्थस्तु गजाधिनाथं
पापस्य वर्गे कृतपापसङ्गम् ॥ २२॥

मित्राश्रयस्थो रिपुगो विधत्ते
शुक्रो रिपुं बन्धववर्गनेव ।

तदंशके वा स्वकलत्रवर्गे
वर्गोत्तमस्थः श्वशुरं सदैव ॥ २३॥

शत्र्वाश्रयस्थोऽरिगतस्तु शुक्रो
रिपुं प्रसूते सुतरां नृशंसम् ।
तस्यांशके व्याधुविवर्जिताङ्गं
मूलत्रिकोणे धनवर्जितं च ॥ २४॥

शनैश्चरः षष्ठगतः स्वतुङ्गे
परैर्विहीनं जनयेन्मनुष्यम् ।
तुङ्गांशके स्वल्परिपुं जितारिं
षड्वर्गशुद्धः सुनतं परैश्च ॥ २५॥

नीचाश्रयस्थो यदि सूर्यपुत्रः
शत्रुं प्रसूते तरलं मनुष्यम् ।
नीचस्य भागे कनकाढ्यमेव
पापस्य वर्गे कृषिकर्मदक्षम् ॥ २६॥

मित्राश्रयस्थो रविजोऽरिसंस्थः
शठं रिपुं स्वल्पतनुं प्रसूते ।
मित्रस्य भागे हनिनं प्रधानं
वर्गोत्तमस्थो बहुकर्मयुक्तम् ॥ २७॥

शत्र्वाश्रयस्थो रविजो रिपुस्थः
शत्रुं सुवाते सततं गतार्थम् ।
शत्रोर्विभागे सुतदारहीनं
मूलत्रिकोणे परसङ्गतं च ॥ २८॥

दशाधिपस्तीक्ष्णकरः प्रदिष्तं
सहत्रनाथो रजनीपतिश्च
वक्रार्कजौ हीनपरौ सदैव
सेषास्तु चन्द्रेण समाः स्वतुङ्गे ॥ २९॥

इति श्रीवृद्धयवने रिपुस्थानचिन्ता ॥

आध्याय ३०

कलत्रस्थानचिन्ताध्यायः

दिनाधिपः सप्तमगः स्वतुङ्गे
करोति भार्यं कलहप्रियां च ।
तुङ्गांशकस्थः परकर्मरक्तां
षड्वर्गशुद्धतु दरिद्रयुक्ताम् ॥ १॥

नीचाश्रितः सप्तमगस्तु सूर्यो
भार्यां विधत्ते व्यधिचारिणीं च ।
नीचांशकस्थश्च सरोगयुक्तां
पापस्य वर्गे सततं कुशीलाम् ॥ २॥

मित्राश्रयस्थो दिनपः कलत्रे
करोति भार्यां सुतरां नृशंसाम् ।
मित्रस्य भागे सुविहीनचिन्तां
वर्गोत्तमस्थः सुरतप्रियां च ॥ ३॥

शत्र्वाश्रयस्थो यदि वासरेशः
करोति भार्यां व्यसनाभिभूताम् ।
शत्रोर्विभगे परहीनकृत्यां
मूलत्रिकोणे प्रियसाध्वसां च ॥ ४॥

चन्द्रस्तु काम् यदि तुङ्गसंस्थो
भार्यां विधत्ते सुभगां मनोज्ञाम् ।
तुङ्गांशके वा सुरदेवभक्तां
षड्वर्गशुद्धोऽतिमनोश्वरूपाम् ॥ ५॥

निशाकरः कामगतः स्वनीचे
भार्याम् विधत्ते बहुरोगभाजाम् ।
नीचांशके कुष्ठरुजा समेतां
पापस्य वर्गे पतिना विरुधाम् ॥ ६॥

मित्राश्रयस्थो यदि रात्रिनाथो
भार्यां प्रसूते प्रियवादिनीं च ।
मित्रांशके वा विनयेन युक्तां
वर्गोत्तमस्थो बहुकर्मयुक्ताम् ॥ ७॥

शत्र्वाश्रयस्थो यदि रात्रिनाथो

विरुद्धचेष्टां जनयेश्च भार्याम् ।
शत्रोर्विभागे विगतप्रभावां
मूलत्रिकोणे बहुभृत्यदक्षाम् ॥ ८॥

धरासुतः कातः कामगतेः स्वतुङ्गे
भार्यां विधत्ते गतरूपवित्ताम् ।
तुङ्गांशके वातिजराभिभूतां
षड्वर्गशुद्धः प्रचितप्रभावाम् ॥ ९॥

नीचाश्रयस्थः क्षितिजस्तु कामे
दारं विधत्ते प्रचुरप्रगल्भम् ।
नीचांशके वा बहुशत्रुपक्षां
पापस्य वर्गे निजवर्गहीनाम् ॥ १०॥

मित्राश्रयस्थः क्षितिजः कलत्रे
भार्यां सुवाते लघुचोलनां च ।
मित्रस्य भागेऽल्पसरोरुडाक्षीं
वर्गोत्तमस्थः प्रभुताविहीनाम् ॥ ११॥

शत्र्वाश्रयस्थो यदि भूमिपुत्रो
भार्यां विधत्ते कठिनस्वभावाम् ।
तदंशके वा हतबन्धिवर्गां
मूलत्रिकोणे परसङ्गतां च ॥ १२॥

कामाश्रयस्थः शशिजः स्वतुङ्गे
भार्यां विधत्तेऽद्भुतरूपयुक्ताम् ।
तुङ्गांशके वा बहुभोयुक्तां
षड्वर्गशुद्धः कृतमण्डनां च ॥ १३॥

नीचे च सौम्यः खलु सप्तमस्थः
करोति भार्यां कुनरानुरक्ताम् ।
नीचांशके वा व्यसनानुरक्तं
पापस्य वर्गे गुणवर्जितां च ॥ १४॥

मित्राश्रयस्थो यदि सोमपुत्रो
दारं प्रसूते बहुपुत्रपुत्रम् ।
मित्रांशके वा प्रचुरान्नपानां

वर्गोत्तमस्थः प्रभया समेताम् ॥ १५॥

शत्र्वाश्रयस्थे यदि कामगो ज्ञो
भार्यां सुवातेऽर्थविवर्जितां च ।
तदंशके वा धनधान्यहीनां
मूलत्रिकोणे जनवल्लभां च ॥ १६॥

जीवः कलत्रे यदि तुङ्गसंस्थः
करोति दारं प्रियदर्शनं च ।
तुङ्गांशकस्थो बहुसौख्ययुक्तां
षड्वर्गशुद्धः सुकुलोद्भवां च ॥ १७॥

नीचाश्रितो देवगुरुः कलत्रे
दारे विधत्ते न कुलोद्भवं च ।
नीचांशकस्थो बहुमानयुक्तां
पापस्य वर्गे पिशुनस्वभावाम् ॥ १८॥

मित्राश्रयस्थो मदने सुरेज्यो
दारं विधत्ते बहुसाधुमित्रम् ।
मित्रांशकस्थो मणिमौक्तिकाढ्यं
वर्गोत्तमस्थोऽतिविशुद्धकायाम् ॥ १९॥

शत्र्वाश्रयस्थो मदने सुरेज्यो
दारं विधत्ते चपलस्वभावम् ।
परांशकस्थोऽतिकठोरवाक्यां
मूलत्रिकोणे गुणवर्जितां च ॥ २०॥

शुक्रोश्चसंस्थो यदि सप्तमस्थो
भार्यां सुवते बहुमित्रपक्षाम् ।
तुङ्गांशकस्थो द्विजदेवभक्तां
षड्वर्गशुद्धस्तु पतिव्रतां च ॥ २१॥

नीचाश्रितो दैत्यगुरुः कलत्रे
कलत्रमुच्चैः कुरुते प्रान्नम् ।
नीचांशकस्थस्तु सुरूपनेत्रां
पापस्य वर्गे घृणया विहीनाम् ॥ २२॥

मित्राश्रयस्थः कुरुते च शुक्रः
कामे सुकामां सुभगां च भार्याम् ।
मित्रांशकस्थश्च सुशुद्धचिन्तां
वर्गोत्तमस्थो जनवल्लभां च ॥ २३॥

शत्र्वाश्रयस्थो भृगुजस्तु कामे
भार्यां उवाते सुतरां प्रहीनाम् ।
तदंशकस्थोऽप्रकृतस्वभावां
मूलत्रिकोणे सुसमन्वितां च ॥ २४॥

शनैश्चरस्तुङ्गतः कलत्रे
स्थूलं कलत्रं कुरुते नराणाम् ।
तुङ्गांशकस्थश्च सुकृष्णगात्रां
षड्वर्गशुद्धो बहुदुःखभाजाम् ॥ २५॥

नीचाश्रितः कामगतस्तु कोणो
दारं प्रसूते विकरालगात्रम् ।
नीचांशकस्थश्च विहीनधर्मां
पापस्य वर्गे पररक्तचिन्ताम् ॥ २६॥

मित्राश्रयस्थः प्रकरोति सौरः
कामाश्रितः कोपपरं कलत्रम् ।
मित्रस्यभागे गुणवर्जिताङ्गां
पापस्य वर्गेऽतिखलस्वभावाम् ॥ २७॥

शत्र्वाश्रयस्थो रविजः कलत्रे
दारं प्रसूते बहुपापरक्तम् ।
तस्यैव भागे पतिनिन्दितां च
मूलत्रिकोणे विधनां सदैव ॥ २८॥

पञ्चाधिपो देवगुरुः सितश्च
सोमो विसंख्यः शशिजो गणानाम् ।
एकाधिपाः सूर्यशनैश्चराराः
स्वतुङ्गगाः स्युर्यदि सद्ग्रहेन्द्राः ॥ २९॥

इति श्रीवृद्धयवने कलत्रस्थानचिन्ता ॥

आध्याय ३१

मृत्युस्थानचिन्ताध्यायः

सूर्ये यध मृत्युतश्च तुङ्गे
मृत्युं विधत्तेऽग्निनिवेशनेन ।
भक्त्या तदंशे जनलज्जमेव
षड्वर्गशुद्धस्त्वथवा प्रमादात् ॥ १॥

नीचाश्रितो वासरपोऽष्टमस्थो
मृत्युं विधत्ते वनपावकेन ।
नीचांशके दम्भनकर्मतश्च
पापस्य वर्गे तु प्रदीपनेन ॥ २॥

मित्राश्रयस्थो दिनपोऽष्टमस्थो
मृत्युं विधत्ते विषभक्षणेन ।
मित्रांशकस्थश्च निबन्धनेन
वर्गोत्तमस्थो निशि तापसेन ॥ ३॥

शत्र्वाश्रयस्थो दिनपोऽष्टमस्थः
करोति मृत्युं रुधिरप्रकोपात् ।
तदम्शके वा बहुकासशोषान्
मूलत्रिकोणे वनितापराधात् ॥ ४॥

चन्द्रोऽष्टमस्थो यदि तुङ्गसंस्थः
करोति मृत्युं सलिलप्रवेशात् ।
तुङ्गांशकस्थः करकाभिघातात्
षड्वर्गशुद्धस्त्वशनिप्रपातात् ॥ ५॥

नीचाश्रितो रत्रिपतिः करोति
छिद्रे विनाशं वनिताकरेण ।
नीचांशकस्थः कफपित्तदोषात्
पापस्य वर्गे त्वथ सन्निपातात् ॥ ६॥

मित्राश्रयस्थो रजनीपतिश्च
करोति मृत्युं जठरप्रकोपात् ।
तस्यैव भागे गुदरोगतश्च

वर्गोत्तमस्थः पशुपादघातात् ॥ ७॥

शत्र्वाश्रयस्थो विधुरेव धत्ते
मृत्युं नराणां बहुभृत्यरोगात् ।
तदंशकस्थः पशुशृङ्गसङ्गान्
मूलत्रिकोणे क्षयरोगतश्च ॥ ८॥

भौमोऽष्टमस्थो यदि तुङ्गसंस्थः
सङ्गाममृत्युं कुरुते नराणाम् ।
तुङ्गांशकस्थस्त्वथ शस्त्रकर्म
षड्वर्गसुद्धस्त्वथ गोग्रहेण ॥ ९॥

नीचाश्रयस्थो धरणिज छिद्रे
स्वहस्तमृत्युं कुरुते नराणां
नीचांशकस्थश्च निजायुधेन
पापस्य वर्गे द्विजपर्श्वतश्च ॥ १०॥

..........अः क्षितिजोऽष्टमस्थः
करोति मृत्युं दृषदाश्रयेण ।
मित्रस्य भागे त्वथ गोष्ठसङ्गाद्
वर्गोत्तमस्थस्त्वथ कूपपातात् ॥ ११॥

शत्र्वाश्रय्स्थः क्षितिजोऽष्टमस्थो
भूकूपपाताश्च करोति मृत्युम् ।
तस्यांशकस्थस्त्वथ गुप्तिरोधान्
मूलत्रिकोणे विषभक्षणेन ॥ १२॥

सौम्योऽष्टमस्थो यदि तुङ्गसंस्थो
करेण मृत्युं प्रकरोति पुंसाम् ।
तुङ्गांशकस्य कफजैर्विकारैः
षड्वर्गशुद्धोऽनिलसम्भवैश्च ॥ १३॥

नीचारयस्थोऽष्टमगस्तु सौम्यः
करोति मृत्युं व्रणवैकृतेन ।
नीचांशकस्थश्च महाभयेन
पापस्य वर्गे प्रियविप्रयेण ॥ १४॥

मित्राश्रयस्थो यदि सोमपुत्रो
मृत्युं विधत्ते हृदयप्रकोपात् ।
मित्रस्य भागेऽक्षिरुजा नराणां
वर्गोत्तमस्थस्त्वथ गुह्यरोगात् ॥ १५॥

शत्र्वाश्रय्स्थः शशिजः प्रसूते
मृत्युं नराणां दृढबन्धनेन ।
तस्यैव भागे जठरोत्थरोगान्
मूलत्रिकोणेऽग्निव्रणेन पुंसाम् ॥ १६॥

जीवोऽष्टमस्थो यदि तुङ्गसंस्थो
मृत्युं विधत्ते विविधैश्च रोगैः ।
तुङ्गंशकस्थस्त्वथ मूलरोगात्
षड्वर्गशुधः श्रवणप्रकोपात् ॥ १७॥

गुरुः स्वनीचे यदि चाष्टमस्थो
मृत्युंविधत्ते स्वजनस्य हस्तात् ।
तस्यैव भागेऽथ विषाग्निसङ्गात्
पापस्य वर्गे त्वतिसारतश्च ॥ १८॥

मित्राश्रयस्थो यदि देवमन्त्री
रन्ध्रे विनशं कुरुते स्वभृत्यात् ।
तस्यैव भागे रुधिरप्रकोपाद्
वर्गोत्तमस्थः सुरतानुसङ्गात् ॥ १९॥

शत्र्वाश्रयस्थो यदि देवमन्त्री
रन्ध्रे विनाशं कुरुते सकोपात् ।
तस्यैव भागे शिरसः प्रकोपान्
मूलत्रिकोणे बहुभक्षणेन ॥ २०॥

शुक्रोऽष्टमस्थो यदि तुङ्गसंस्थः
पिपासयान्तं कुरुते नराणाम् ।
तुङ्गांशकस्थश्च मुखस्य शोषात्
षड्वर्गशुद्धो वरदुःखतश्च ॥ २१॥

नीचाश्रितो दैत्यगुरुश्च रन्ध्रे
मृत्युं विधत्ते गुरुसन्निपातात् ।

नीचांशकस्थस्त्वथ ववश्ररोगात्
पापस्य वर्गे वनसत्त्वतश्च ॥ २२॥

मित्राश्रयस्थो भृगुजः प्रसूते
स्थानेऽष्टमे नाशमदेप्रसङ्गात् ।
मित्रांशकस्थो विषकण्टकेन
वर्गोत्तमस्थत्वथ लूतया च ॥ २३॥

शत्र्वाश्रयस्थो भृगुजोऽष्टमस्थः
करोति मृत्युं विषकण्टकेन ।
तदंशकस्यः सुरतप्रकोपान्
मूलत्रिकोणे प्रचुरप्रकोपात् ॥ २४॥

शनैश्चरस्तुङ्गतोऽष्टमस्थो
मृत्युम् विधत्तेऽतिबुभुक्षया च ।
तुङ्गस्य भागे गुरुलंघनेन
प्रायोपवेशाद्रसवर्गौद्धः ॥ २५॥

नीचाश्रितः सूर्यसुतोऽष्टमस्थो
मृत्युं विधत्ते निजबन्धुवर्गात् ।
तस्थैव भागे रिपुहस्ततश्च
पापस्य वर्गेऽत्र परीक्षयेण ॥ २६॥

मित्राश्रयथो रविजः प्रसूते
मृत्युं महादद्रुकृतैर्विकारैः ।
तस्यैव भागे पिटकैश्च मृत्युं
वर्गोत्तमस्थो व्रणवैकृतेन ॥ २८॥

शत्र्वाश्र्यस्थो रविजोऽष्टमस्थो
मृत्युं विधत्ते हयपादघातात् ।
तस्यैवभागे करिणः प्रसङ्गान्
मूलत्रिकोणे खरतः सकाशात् ॥ २९॥

इति श्रीवृद्धयवने मृत्युस्थानचिन्ता ॥

आध्याय ३२

धर्मस्थानचिन्ताध्यायः

धर्माश्रितो वासरपः स्वतुङ्गे
धर्मं नृणां तापसमेव धत्ते ।
तुङ्गांशसंस्थस्त्वथ दम्भदं च
षड्वर्गशुद्धस्त्वथ वज्जया च ॥ १॥

नीचाश्रयस्थे दिनपस्तु धर्मे
धर्मेण हीनं जनयेन्मनुष्यम् ।
नीचांशकस्थश्च कुकर्मरक्तं
पापस्य वर्गे परधर्मरक्तम् ॥ २॥

मित्राश्रयस्थो दिनपस्तु धर्मे
कौलोत्थधर्मं कुरुते नराणाम् ।
मित्रांशके वैकृतिकं तथैव
वर्गोत्तमस्थोऽतिलघुप्रमाणम् ॥ ३॥

शत्र्वाश्रयस्थो दिनपस्तु धर्मे
कृतघ्नधर्मं कुरुते नराणाम् ।
तदंशकस्थस्त्वथ चौरजं च
मूलत्रिकोणेऽतिसुखोत्थमेव ॥ ४॥

चन्द्रः स्वतुङ्गे यदि धर्मसंस्थः
प्रसाद्धर्मं कुरुते नराणाम् ।
तदंशसंश्थश्च तदागजं च
षड्वर्गशुद्धो द्विजा..........दानजं च ॥ ५॥

.......... ॥ ६॥

मित्राश्रयस्थो हिमगुश्च धर्मे
धर्मं विधते स्वकुटुम्बद..........
तदंशके मित्रजनोत्थमेव ..........
वर्गोत्तमस्थोऽत्र समृद्धिदम् ॥ ७॥

श्त्र्वाश्रयस्थो हिमगुश्च धर्मे
धर्मं प्रसूते विटपात्रदानात् ।
तदंशकस्थः प्रमदानुसङ्गान्
मूलत्रिकोणे बहुवित्तदानात् ॥ ८॥

भौमः स्वतुङ्गे यदि धर्मसंस्थो
धर्मं प्रसूते रणजं नराणाम् ।
तुङ्गांशकस्थः परसेवया च
षड्वर्गशुद्धो गुरुपोषणेन ॥ ९॥

नीचाश्रयस्थः क्षितिजस्तु धर्मे
धर्मं विधत्ते ..........
तदण्शकस्थः परदारलाभात्
पापस्य वर्गे जनतापरोधात् ॥ १०॥

मित्राश्रयस्थ क्षितिजस्तु धर्मे
धर्मं विधत्ते सुहृदप्रकोपात् ।
तस्यैव भागे बहुकोपतश्च
वर्गोत्तमस्थः परसेवया च ॥ ११॥

शत्र्वाश्रयस्थः क्षितिजस्तु धर्मे
धर्मं विधत्ते न कदाचिदेव ।
तदांशकस्थः कनचौरणानां
मूलत्रिकोणे नमितार्जितेन ॥ १२॥

धर्माश्रितः सोमसुतः स्वतुङ्गे
धर्मं विधत्ते वरशत्रुजातम् ।
तदंशकस्थो द्विजदेवतानां
षड्वर्गशुधो व्रतपालनेन ॥ १३॥

नीचाश्रयस्थः शशिजस्तु धर्मे
धर्मं प्रसूते कपदेन पुंसाम् ।
तदंशकस्थः कुहकप्रयोगैः
पापस्यवर्गेऽथ छलेन नित्यम् ॥ १४॥

मित्राश्रयस्थ शशिजस्तु धर्मे
धर्मं प्रसूते गृहदानतश्च ।
मित्रांशके तापसमेव नित्यं
वर्गोत्तमस्थो बहुवस्त्रदानात् ॥ १५॥

शत्वश्र्यथः शशिजस्तु धर्मे

धर्मं विधत्तेऽक्षविवर्जितं च ।
तस्यैव भागे गुरुलोकाभान्
मूलत्रिकोणे बहुशान्त्यमेव ॥ १६॥

धर्माश्रितो देवगुरुः स्वतुङ्गे
धर्मं विधत्ते प्रचरं सदैव ।
तदंशकस्थो ..........
षड्वर्गशुद्धो द्रुतमेव पुंसाम् ॥ १७॥

नीचास्थितो देवगुरुश्च धर्मे
.......... सुवाते कृतकं नराणाम् ।
नीचांशकस्थो गुरुणानुरोधात्
पापस्य वर्गे बहुतीर्थसङ्गात् ॥ १८॥

मित्राश्रयस्थः सुरराजमन्त्री
धर्मं विधत्ते बहुधर्ममार्गात् ।
मित्रांशकस्थो वनितामतेन
वर्गोत्तमस्थस्तनयानुसङ्गात् ॥ १९॥

शत्र्वाश्रयस्थः कुरुते सुरेज्यो
धर्मे नराणां सुनयेन धर्मम् ।
तदंशकस्थो गुरुपोषणेन
मूलत्रिकोणे घृणयानुरोधात् ॥ २०॥

शुक्रोश्चसंस्थो यदि धर्मसंस्थो
धर्मं प्रसूते वरदानजातम् ।
..........आन्नजं तस्य विभागसंस्थः
षड्वर्गशुद्धः पितृतर्पणेन ॥ २१॥

नीचांशकस्थो भृगुजश्च धर्मे
धर्मं प्रसूते परदेशसङ्गात् ।
तदंशकस्थोऽध्वगलोकसङ्गात्
वर्गोत्तमस्थः सुमुखैरनेकैः ॥ २२॥

मित्राश्रयस्थो भृगुजस्तु धर्मे
धर्मं सुवातेऽल्पफलं नराणाम् ।
तस्थैव भागे च विनिसयेन

पापस्य वर्गे परवंचनेन ॥ २३॥

शत्र्वाश्रयस्थो भृगुजश्च धर्मे
धर्मं प्रसूते परलोकसङ्गात् ।
तदंशकस्थोऽरिनिषेवणेन
मूलत्रिकोणे कृषिकर्मलाभात् ॥ २४॥

शनैश्चरस्तुङ्गतस्तु धर्मे
धर्मं विधत्ते वयसि तृतीये ।
तदंशकस्थोऽल्पतरं परं च
षड्वर्गौद्धस्त्वथ भक्तिबाह्यम् ॥ २५॥

नीचाश्रितः सूर्यौतस्तु धर्मे
धर्मेण हीनं जनयेन्मनुष्यम् ।
तदंशकस्थः परधर्मरक्तं
पापस्य वर्गे कवलोद्भवं च ॥ २६॥

मित्राश्रयस्थोऽर्कसुतस्तु धर्मे
धर्मं विधत्ते सततं सुगर्हम् ।
तदंशकस्थस्त्रयज..........
वर्गोत्तमस्थो नृपसेवया च ॥ २७॥

शत्र्वाश्रयस्थोऽर्कसुतस्तु धर्मे
कृच्छ्रेण धर्मं जनयेत् सुसूक्ष्मम् ।
तदंशस्थः परदर्शनोत्थं
मूलत्रिकोणे गुरुलब्धमानात् ॥ २८॥

इति श्रीवृद्धयवने धर्मस्थानचिन्ता ॥

---

आध्याय ३३
कर्मस्थानचिन्ताध्यायः
कर्माश्रितस्तीक्ष्णकरः स्वतुङ्गे
करोति कर्म व्रतकृत्यमेव ।
तदंशकस्थो वधबन्धजं च
षड्वर्गशुद्धः सकलं कलाजम् ॥ १॥

नीचाश्रितस्तीक्ष्णकरोऽम्बरस्थो
नृणां विधत्ते बहुदासकर्म ।
तस्यैव भागे वणिजोद्भवं च
वर्गोत्तमस्थो वणिजप्रसूतम् ॥ २॥

मित्राश्रयस्थो दिनकृत् खसंस्थः
करोति पुंसां कृषिजं च कर्म ।
मित्रस्य भगे कुनृपस्य सेवजं
पापस्य वर्गे वधबन्धजम् ॥ ३॥

शत्र्वाश्रयस्थो दिनपो नराणा
ददाति कर्माशुभमेव नित्यम् ।
तस्यैव भागे जनगर्हितं च
मूलत्रिकोणे खरसेवजं च ॥ ४॥

कर्माश्रितः शीतकरः स्वतुङ्गे
करोति कर्म प्रथितं नृलोके ।
तस्यैव भागे द्विजदेवजं च
षड्वर्गशुद्धो वरदानभाजम् ॥ ५॥

नीचाश्रितः शीतकरोऽम्बरस्थो
ददाति कर्मतिसलज्जमेव ।
तस्यैव भागे क्रयविक्रयोत्थं
पापस्य वर्गे व्यसनोद्भवं च ॥ ६॥

मित्राश्रयस्थो यदि शीररश्मिः
कर्माश्रितः कर्म ददाति सौम्यम् ।
तस्यैव भागे बहुशास्त्रभाजं
वर्गोत्तमस्थो मखजं सदैव ॥ ७॥

शत्र्वाश्रयस्थोऽम्बरगो निशेशः
कर्म प्रसूते सुतरां नृशंसम् ।
तस्यैव भागे वनितोद्भवं च
मूलत्रिकोणे नृपदैत्यजातम् ॥ ८॥

भौमोऽम्बस्तस्थो यदि तुङ्गसंस्थो
युद्धोद्भवं कर्म ददाति पुंसाम् ।

तस्यांशके द्यूतसमुद्भवं च
षड्वर्गशुद्धः स्मरजं नितान्तम् ॥ ९॥

नीचाश्रितो भूतनयोऽम्बरस्थः
कर्म प्रसूते परदारजातम् ।
तदंशकस्थो गणिकोद्भवं च
पापस्य वर्गे ह्युभयं सदैव ॥ १०॥

मित्राश्रयस्थः क्षितिजोऽम्बरस्थः
कर्म प्रसूतेऽक्षममुद्भवं च ।
तस्यांशकस्थो बहुभारजातं
वर्गोत्तमस्थः प्रणयेन हीनम् ॥ ११॥

शत्र्वाश्रयस्थः क्षितिजो नभोगः
कर्म प्रसूते बहुदैन्यजातम् ।
तस्यैव भागे त्वथ भिक्षजं च
मूलत्रिकोणेऽम्बरकाष्ठजातम् ॥ १२॥

सौम्यः स्वतुङ्गे यदि कर्मसंस्थः
कर्म प्रसूते धनधान्यजातम् ।
तस्यैव भागे च चतुष्पदोत्थं
षड्वर्गोद्धो गजवाजिजातम् ॥ १३॥

नीचाश्रितः सोमसुतोऽम्बरस्थः
कर्म प्रसूते निजमेव पुंसाम् ।
तस्यैव भागे परदेशजातं
पापस्य वर्गे खलजं सदैव ॥ १४॥

मित्राश्रयस्यः शशिजोऽम्बरस्थः
कर्म प्रसूते हयविक्रयोत्थम् ।
तस्यैव भागे रजतं नराणां
वर्गोत्तमस्थोऽद्भुतमित्रजातम् ॥ १५॥

शत्र्वाश्रयस्थः शशिजोऽम्बरस्थः
कर्म प्रसूते बहुकष्टजातन् ।
तस्यैव भागे गुणवर्जितं च
मूलत्रिकोणे सुयशोद्भवं च ॥ १६॥

जीवोऽम्बरस्थो यदि तुङ्गसंस्थो
ददाति कर्म प्रचुरं प्रधानम् ।
तदंशकस्थो द्विजपूजनोत्थं
षड्वर्गशुद्धः सुजनार्थनोत्थम् ॥ १७॥

नीचाश्रितो देवगुरुः ससंस्थः
करोति कर्माधमलोकसेव्यम् ।
तदंशकस्थोऽद्भुतचौर्यजातं
पापस्य वर्गेऽर्थविवर्जितं च ॥ १८॥

मित्राश्रयस्थो दशमे सुरेज्यः
करोति कर्माणि शुभानि नित्यम् ।
तदंशसंस्थो नृपतेः समुत्थं
वर्गोत्तमस्थो महिषीगवोत्थम् ॥ १९॥

शत्र्वाश्रयस्थो दशमे सुरेज्यः
कर्म प्रसूते सततं कृतघ्नम् ।
तस्थैव भागे परवंचनेन
मूलत्रिकोणे नृपतेरभीष्टम् ॥ २०॥

तुङ्गाश्रयस्थोऽम्बरगो भृगुश्च
मर्म प्रसूते जनवल्लभं च ।
तस्यैव भागे मणिमौक्तिकाढ्यं
षड्वर्गशुद्धः कनकोद्भवं च ॥ २१॥

नीचाश्रयस्थः भृगुजः खसंस्थः
कर्म प्रसूते वनिताश्रितं च
तस्यैव भागेऽल्पसुखं नितान्तं
पापस्य वर्गे गुरुदुःखजं च ॥ २२॥

मित्राश्रयस्थो भृगुजोऽम्बरस्थः
करोति कर्म प्रभुतासमेतम् ।
तस्यैव भागे निजबन्धुजातं
वर्गोत्तमस्थो बहुगौरवाढ्यम् ॥ २३॥

शत्र्वाश्रयस्थो भृगुजोऽम्बरस्थः

कर्म प्रसूते विरजं नृशंसम् ।
तस्यैव भागे बहुचिन्तयाढ्यं
मूलत्रिकोणेऽनृतसंयुतं च ॥ २४॥

तुङ्गाश्रितः सूर्यसुतोऽम्बरस्थः
कर्म प्रसूतेऽतिमृदुस्थिरं च ।
तस्यैव भागे बहुशिल्पजं च
षड्वर्गशुद्धः प्रियसाध्वसं च ॥ २५॥

नीचाश्रितः सूर्यसुतोऽम्बरस्थः
कर्म प्रसूते द्विजद्रोहजातम् ।
तस्यैव भागे नृपसेवजं च
पापस्य वर्गे सनृशंसरूपम् ॥ २६॥

मित्राश्रितो भास्करजश्च खस्थः
करोति कर्म प्रभुताविहीनम् ।
तस्यैव भागे नृपसेवजं च
वर्गोत्तमस्थो मृगया समेतम् ॥ २७॥

शत्र्वाश्रयस्थोऽर्कोतोऽम्बरस्थः
कर्म प्रसूते बहुकष्टजातम् ।
तस्यैव भागे परपौशुनोत्थं
मूलत्रिकोणे भिषजोद्भवं च ॥ २८॥

इति श्रीवृद्धयवने कर्मस्थानचिन्ता ॥

---

आध्याय ३४

लाभस्थानचिन्ताध्यायः

लाभाश्रितस्तीक्ष्णकरः स्वतुङ्गे
लाभं विधत्ते गजवाजिजं च ।
तस्यैव भागे महिषिसमुत्थं
षड्वर्गशुद्धः कनकोद्भवं च ॥ १॥

नीचाश्रितो वासरपस्तु लाभे
लाभं विधत्ते जलपादपानाम् ।
तस्यैव भागे च कुधान्यकानां

पापस्य वर्गे परयोषितां च ॥ २॥

मित्राश्रयस्थो दिनपस्तु लाभे
लाभं प्रसूते सुहृदां सदैव ।
मित्रांशकस्थः कुलयोषितानो
वर्गोत्तमस्थ प्रवरार्यकाणाम् ॥ ३॥

शत्र्वाश्रयस्थो दिनकृश्च लाभे
लाभं प्रसूते रथकम्बलानाम् ।
तदंशकस्थः खलमानवानां
मूलत्रिकोणे गुणिनां नितान्तम् ॥ ४॥

लाभाश्रितः शीतकरः स्वतुङ्गे
लाभं विधत्ते मणिमौक्तिकानाम् ।
तस्यैव भागे द्रविणान्नकानां
षड्वर्गशुद्धः प्रियमानुषाणाम् ॥ ५॥

नीचाश्र्यस्थो हिमगुश्च लाभे
लाभं प्रसूते कुकलत्रकाणाम् ।
तदंशकस्थस्तु सुसेवकानां
पापस्य वर्गे परपैशुनानाम् ॥ ६॥

मित्राश्रयस्थो हिमगुश्च लाभे
लाभं विधत्ते बहुबन्धवानाम् ।
तस्यैव भागे नदनर्तकानां
वर्गोत्तमस्थः प्रवरार्थकानाम् ॥ ७॥

शत्र्वाश्रयस्थो हिमगुश्च लाभे
लाभं प्रसूते बहुकन्दजानाम् ।
तदंशकस्थो हि महीरुहाणां
मूलत्रिकोणे क्षितिमृद्गृहाणाम् ॥ ८॥

भौमः स्वतुङ्गे यदि लाभसंस्थो
लाभं विधत्ते च चतुष्पदानाम् ।
तस्यैव भागेऽत्र सुभक्षकाणां
षड्वर्गशुद्धो नृपमण्डलानाम् ॥ ९॥

लाभाश्रितो भूतनयस्तु नीचे
लाभं विधत्ते बहुशौर्यजातम् ।
तस्यैव भागे बहुवंचनोत्थं
पापस्य वर्गे वधबन्धुजातम् ॥ १० ॥

मित्राश्रयस्थः क्षितिजस्तु लाभे
लाभं विधत्ते नृपलोकजातम् ।
तदंशकस्थस्तु महाजनोत्थं
वर्गोत्तमस्थो ह्युभयं सदैव ॥ ११ ॥

शत्र्वाश्र्यस्थः क्षितिजस्तु लाभे
लाभं सुवाते बहुवचकानाम् ।
तस्यैव भागे पर्तर्ककानां
मूलत्रिकोणेऽद्भुतभूषणानाम् ॥ १२ ॥

सौम्यः स्वतुङ्गे यदि लाभसंस्थो
लाभं सुवाते बहुशास्त्रजातम् ।
तस्यैव भागे विविधैरुपायैः
षड्वर्गशुद्धस्त्वथ सर्वविधाम् ॥ १३ ॥

लाभाश्रितः सोमसुतस्तु नीचे
लाभं विधत्ते बहुनीचसङ्गात् ।
तस्यैव भागे कृतकानुसङ्गात्
पापस्य वर्गेऽन्त्यजलोकपार्श्वात् ॥ १४ ॥

मित्राश्रयस्थः शशिजस्तु लाभे
लाभं विधत्ते परलोकजातम् ।
तस्यैव भागे निजविधयातो
वर्गोत्तमस्थो व्यवहारतश्च ॥ १५ ॥

शत्र्वाश्रयस्थः शशिजस्तु लाभे
करोति लाभं वितथोपचारात् ।
तस्यैव भागे कपटैरनेकै-
र्मूलत्रिकोणे क्रयविक्रयाभ्याम् ॥ १६ ॥

जीवः स्वतुङ्गे यदि लाभसंस्थो
नरेन्द्रलाभं कुरुते नराणाम् ।

तस्यैव भागे नृपसेवकानां
षड्वर्गशुद्धः प्रचुरप्रभावात् ॥ १७॥

नीचाश्रितो देवगुरुश्च लाभे
लाभं नराणां कुरुते धनं च ।
नीचांशकस्थो भृतकाह्वयानां
पापस्य वर्गे बहुकष्टतश्च ॥ १८॥

मित्राश्रयथः कुरुते सुरेज्यो
लाभं च लाभे रजतोद्भवं च ।
तस्यांशकस्थो बहुधातुजातं
वर्गोत्तमस्थः सुजनोद्भवं च ॥ १९॥

शत्र्वाश्र्यस्थः कुरुते सुरेज्यो
लाभं च लाभे पुरुषाधमानाम् ।
तस्यैव भागे गुणवर्जितानां
मूलत्रिकोणे विविध ..........जानाम् ॥ २०॥

शुक्रः स्वतुङ्गे यदि लाभसंस्थो
लाभं सुवाते सुतबान्धवोत्थम् ।
तस्यांशकस्थो नृपकन्यकोत्थं
षड्वर्गशुद्धो द्वितयस्य चास्य ॥ २१॥

नीचाश्रयस्थो भृगुजस्तु लाभे
लाभं विधत्ते च कुपश्यकानाम् ।
तदंशकस्थस्तु कुबुद्धिकानां
पापस्य वर्गे द्विजनिन्दितानाम् ॥ २२॥

मित्राश्रयथो भृगुजस्तु लाभे
करोति लाभं वरवाहनानाम् ।
तस्यैव भागे वरसुन्दरीणां
वर्गोत्तमस्थः प्रियदर्शनानाम् ॥ २३॥

शत्र्वाश्रय्थो भृगुजश्च लाभे
करोति लाभं हतबान्धवानाम् ।
तस्यैव भागे गतसौहृदानां
मूलत्रिकोणे सुखिनां सदैव ॥ २४॥

सौरोच्छसंस्थो यदि लाभसंस्थो
लाभं विधत्ते पुरुषोत्तमानाम् ।
तस्यैव भागे धनधान्यकानां
वर्गोत्तमस्थः प्रवरार्चितानाम् ॥ २५॥

नीचाश्रितः सूर्यौतस्तु लाभे
लाभं विधत्ते बहुपातकानाम् ।
तस्यैव भागे जननर्दितानां
पापय वर्गे मतिवर्जितानाम् ॥ २६॥

मित्राश्रयस्थोऽर्कसुतस्तु लाभे
लाभं विधत्ते बहुमित्रनातम् ।
तस्यैव भागे वनितासमुत्यं
वर्गोत्तमस्थः शुभकर्यलाभम् ॥ २७॥

शत्र्वाश्रयस्थोऽर्कसुतस्तु लाभे
लाभं विधत्ते बहुवित्तजं च ।
तस्यैव भागे कृमिजं सदैव
मूलत्रिकोणे स्थिरधर्मजातम् ॥ २८॥

इति श्रीवृद्धयवने लाभस्थानचिन्ता ॥

---

आध्याय ३५

व्यायस्थानचिन्ताध्यायः

व्ययस्थितो वासरपः स्वतुङ्गे
व्ययं विधत्ते श्रु..........लो........सङ्गात् ।
तस्यैव भागे गुरुसेवकानां
षड्वर्गशुद्धो द्विजदेव.......... र्यात् ॥ १॥

नीचारयस्थो व्ययगोदिनेशो
व्ययं प्रसूते कुजनात् कुसङ्गात् ।
तस्यैव भागे वनितानिरोधाद्
वर्गोत्तमस्थो नृपसङ्गामाश्च ॥ २॥

मित्राश्रयस्थो व्ययगो दिनेशो

व्ययं विधत्ते बहुमित्रकार्ये ।
तस्यैव भागे कुकलत्रतश्च
पापस्य वर्गेऽन्त्यजकारणेन ॥ ३॥

शत्र्वाश्रयस्थो व्ययगो दिनेशो
व्ययं विधत्ते गणिकानुसङ्गात् ।
तस्यैव भागे कुजनानुरागान्
मुलत्रिकोणे जनतः सदैव ॥ ४॥

चन्द्रो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं प्रसूतेऽक्षविदेवनेन ।
तस्यैव भागे क्रयविक्रयाभ्यां
षड्वर्गशुद्धो द्विजसेवनाश्च ॥ ५॥

नीचाश्रयस्थः शशभृद्व्ययस्थो
व्ययं प्रसूते परमारिसङ्गात् ।
तस्यैव भागे परलोकसङ्गात्
पापस्य वर्गे बहुपापतश्च ॥ ६॥

मित्राश्रयस्थो व्ययगः शशाङ्को
व्ययं विधत्ते सुहृदां प्रसङ्गात् ।
त्स्यैव भागे निजबन्धुमानाद्
वर्गोत्तमस्थः प्रियसङ्गमाश्च ॥ ७॥

शत्र्वाश्रयस्थो व्ययगः शशाङ्को
व्ययं विधत्ते रिपुलोकतश्च ।
तस्यैव भागे बहुधा च सर्वं
मूलत्रिकोणे निजबन्धुतश्च ॥ ८॥

भौमो व्ययस्थो यदि तुङ्गसम्स्थो
व्ययं विधत्ते रणजैर्विकारैः ।
तस्यैव भागे परवंचनेन
षड्वर्गशुद्धो रणजाद्विकारात् ॥ ९॥

नीचारयस्थः क्षितिजो व्ययस्थो
व्ययं विधत्तेऽन्त्यजलोकसङ्गात् ।
तस्यैव भागे व्यसनैरनेकैः

पापस्य वर्गे खलसङ्गमेन ॥ १०॥

मित्राश्रयस्थः क्षितिजो व्ययस्थो
व्ययं सुवाते वितथं नराणाम् ।
तस्यैव भागे पितृकर्मजातं
वर्गोत्तमस्थः सुहृदानुरागात् ॥ ११॥

शत्र्वाश्रयस्थः क्षितिजो व्ययस्थो
व्ययं सुवाते च चतुष्पदोत्थम् ।
तस्यैव भागे बहुरोगात..........
मूलत्रिकोणे वरबन्दितश्च ॥ १२॥

सौम्यो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं विधत्ते बहुगीतवाधैः ।
तस्यैव भागे गुणिनां प्रसङ्गात्
षड्वर्गोद्धोऽग्निपरिग्रहेण ॥ १३॥

नीचाश्रयस्थो व्ययगश्च सौम्यो
व्ययं प्रसूते धनसङ्गमेन ।
तस्यैव भागेऽधमलोकजातं
पापस्य वर्गे नृपलोकदानात् ॥ १४॥

मित्राश्रथः शशिजो व्ययस्थो
व्ययं सुवाते भुमित्रसङ्गात् ।
तस्यैव भागे निजबान्धवानां
वर्गोत्तमस्थो व्रतिनां सदैव ॥ १५॥

शत्र्वाश्रयस्थः शशिजो व्ययस्थो
व्ययं सुवाते सुतजं सदैव ।
तस्यैव भागे सुतदारजं च
मूलत्रिकोणे वरभोगतश्च ॥ १६॥

वीवो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं प्रसूते गुरुलोकदानात् ।
तस्यैव भागे गुरुसेवकानां
षड्वर्गशुद्धो निजबान्धवानाम् ॥ १७॥

नीचाश्रितो देवगुरुर्व्ययस्थो
व्ययं सुवाते व्यवहारजातम् ।
तस्यैव भागे तु कुसीदजातं
पापस्य वर्गे वणिजोत्थमेव ॥ १८॥

मित्राश्रयस्थो व्ययगः सुरेज्यो
व्ययं विधत्ते परवादतश्च ।
तस्यैव भागे परदेशसङ्गात्
वर्गोत्तमस्थः प्रणयानुरोधात् ॥ १९॥

शत्र्वाश्रयस्थो व्ययगः सुरेज्यो
व्ययं सुवाते व्यसनैर्विचित्रैः ।
तस्यैव भागे मतिविभ्रमेण
मूलत्रिकोणे सुरतोपरोधात् ॥ २०॥

शुक्रो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं प्रसूते व्रतजैर्विकारैः ।
तस्यैव भागे बहुशास्त्ररगात्
षड्वर्गशुद्धः प्रियसङ्गमेन ॥ २१॥

नीचाश्रयस्थो भृगुजो व्ययस्थो
व्ययं विधत्ते नृपलोकसङ्गात् ।
तस्यैव भागे पररोषतश्च
पापस्य वर्गे द्यूतश्च नित्यम् ॥ २२॥

मित्राश्रयस्थो भृगुजो व्ययस्थो
व्ययं विधत्ते बहुभक्षणेन ।
तस्यैव भागे बहुपानयोगाद्
वर्गोत्तमस्थः क्षितिजैर्विकारैः ॥ २३॥

शत्र्वाश्रय भृगुजो व्ययस्थो
व्ययं प्रसूते रणकर्मयोगात् ।
तस्यैव भागे जनविप्लवेन
मूलत्रिकोणे वितथोपचारैः ॥ २४॥

मन्दो व्ययस्थो यदि तुङ्गसम्स्थो
व्ययं सुवातेऽधमकर्मजातम् ।

तस्यैव भागेऽधम्मित्रसङ्गात्
षड्वर्गशुद्धो निजबन्धुदोषात् ॥ २५॥

नीचाश्रितः सूर्यसुतो व्ययस्थो
व्ययं प्रसूतेऽन्त्यजमान्तश्च ।
तस्यैव भागेऽद्भुतवादसङ्गात्
पापस्य वर्गे निजबन्धनेन ॥ २६॥

मित्राश्रयस्थो रविजः प्रसूते
व्ययं विधत्ते बहुमित्ररोधात् ।
तस्यैव भागे सुतदासदोषाद्
वर्गोत्तमस्थः प्रणयप्रकोपात् ॥ २७॥

शत्र्वाश्र्यस्थोऽर्कसुतो व्ययस्थो
व्ययं सुवाते करणानुरोधात् ।
तस्यैव भागे बहुलौल्यदोषान्
मूलत्रिकोणे प्रियसङ्गमाश्च ॥ २८॥

इति श्रीवृद्धयवने व्यायस्थानचिन्ता ॥

---

आध्याय ३६
लग्नदर्शनचाराध्यायः
लग्नेऽर्कदृष्ते सुनृशंसचेष्टो
भवेन्मनुष्यः पुरुषस्वभावः ।
सदाभिमानी नतिधर्मसंस्थो
रुजान्वितो द्वेषरतः सुभीतः ॥ १॥

चन्द्रेक्षिते धर्मपरो मनुष्यो
भवेद्विलग्ने वरयानभोगी ।
स्त्रीभोगभोगी प्रभया समेतः
प्रियंवदः शास्त्रकलानुरक्तः ॥ २॥

कुजेक्षिते श्लेष्मविकारदोषैः
सम्पीड्यते रक्तसमुद्भवैश्च ।
लग्ने मनुष्यः परिभूतदेहः
सदातुरस्त्रासससमन्वितश्च ॥ ३॥

बुधेन दृष्टे सुरसत्यभागी..........
भवेन्नरः सत्यपरः सुशीलः ।
नरेन्द्रपूज्यः प्रथितः पृथिव्यां
प्रियंवदो दानप्रोऽल्पकायः ॥ ४॥

लग्ने सुरेज्येन विलोकिते च
भवेन्नरो रत्नगजाश्वभाजः ।
नानार्थलाभैः सहितः प्रगल्भः
प्रधानसेव्यो द्विजदेवभक्तः ॥ ५॥

शुक्रेक्षिते सत्यपरो मनुष्यो
भवेन्नरः पुण्यपरः कृतज्ञः ।
यज्या विवेकी सुदृढ्यप्रतापी
हन्ता विपक्षः प्रणतः प्रसन्नः ॥ ६॥

सौरेण दृष्टेऽल्पसुखो विलग्ने
भवेन्मनुष्यो भयसङ्कुलात्मा ।
रोगान्वितः स्वल्पसु..........
नीचानुरक्तः सततं कृतघ्नः ॥ ७॥

इति स्त्रीवृद्धयवने लग्नदर्शनचारः ॥

---

आध्याय ३७

अनफायोगाध्यायः

सूर्यं विना रात्रिपतेर्व्ययस्थो
यदा ग्रहः स्याद्बहवोऽथवा स्युः ।
स्यातामथ द्वौ त्वनफाख्ययोग
उत्पद्यते रूपगुणप्रमाणः ॥ १॥

भौमे व्ययस्थे शशिनः प्रचण्डो
भवेन्मनुष्यः परवित्तहारी ।
.......... परेषमतिपुष्तकायः
सौर्यान्वितः प्राणधरो गुरुश्च ॥ २॥

चन्द्रस्य सौम्ये व्ययगे प्रसन्नो

विद्याधिकः शास्त्रपरः सदैव ।
विभुः प्रतापी प्रमदानुकुलः
प्रभूतमित्रः प्रणतारिपक्षः ॥ ३॥

चन्द्रस्य जीवे व्ययगे विनितो
नरो भवेद्धर्मपरः कृतज्ञः ।
प्रभावयुक्तो ललनास्वभीष्टः
सुरूपकायो नृपवल्लभश्च ॥ ४॥

शुक्रे व्ययस्थे शशिनो निरीहो
गुणप्रधानः प्रणयेन हृष्तः ।
भवेन्मनुष्यः सुरतानुकुलः
प्रियंवदः कामविशारदश्च ॥ ५॥

करोति चन्द्राद्व्ययगोऽर्कपुत्रो
नरं नितान्तं प्कटस्वभावम् ।
स्थूलं प्रभूताभरणैः समेतं
जितारिपक्षं क्षमयान्वितं च ॥ ६॥

व्ययस्थितौ रात्रिपतेर्ज्ञभौमौ
नरं प्रसूते प्रणतं सुरूपम् ।
विद्वेषहीनं सुतखिन्नयुक्तं
नयानुरक्तं प्रियसङ्गमं च ॥ ७॥

जीवावनेयौ कुरुते मनुष्यं
व्ययस्थितो रात्रिपतेः प्रगल्भम् ।
सुवाजिसारं जितशत्रुसंघं
नतं गुरूणां सततं विधिज्ञम् ॥ ८॥

सौरावनेयौ दधतो मनुष्यं
व्ययाश्रितौ नै नृपतेः क्षतारिम् ।
प्रभूतकोशं सुतसत्ययुक्तं
विनीतवेषाभरणं सदैव ॥ ९॥

चन्द्राद्व्ययस्थौ यदि जीवससौम्यौ
नरं दधाते प्रथितं नृलोके ।
दयाधिकं शास्त्रकथानुरक्तं

ससंमतं साधुजनस्य नित्यम् ॥ १०॥

चन्द्राद्व्ययस्थौ यदि शुक्रसौम्यौ
नरं दधाते प्रियविप्रकृत्यम् ।
स्वदाररक्तं नृपमानभाजं
जितेन्द्रियं शौचपरं सुविज्ञम् ॥ ११॥

चन्द्राद्व्ययस्थौ यदि सौरसौम्यौ
नरं प्रसूते प्रभुतासमेतम् ।
प्रभूतमित्रं प्रथिताभिमान्
गुणाधिकं देवगुरुर्प्रभक्तम् ॥ १२॥

चन्द्राद्व्ययस्थौ यदिजीवशुक्रौ
नरं प्रसूतेऽद्भुतरूपगात्रम् ।
कृतानुरक्तं पितृमातृभकतं
शास्त्रप्रियं प्राणभृतं वरिष्ठम् ॥ १३॥

चन्द्राद्व्ययस्थौ यदि जीवसौरौ
रनं दधाते सुतवित्ततुष्टम् ।
गुणानुरक्तं नृपकार्यदक्षं
विनीतवाक्यं रणकोविदं च ॥ १४॥

चन्द्राद्व्ययस्थौ यदि  शुक्रसौरौ
नरं प्रसूते स्थिरतासमेतम् ।
प्रभूतदारं गतरोगवित्तं
महाव्ययं शास्त्रपरं सदैव ॥ १५॥

जीवारसौम्या व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः प्रणतं मनुष्यम् ।
नृपप्रियं सर्वकुलप्रधानं
प्रजधिकं कीर्तिसमन्वितं च ॥ १६॥

शुक्रारसौम्या व्ययगा यदा स्युः
कुर्युर्नरं सत्यपरं दयालुम् ।
हस्त्यश्वयानासन्भोजनाढ्यं
विहीनशत्रुं गुणसङ्ग्रहं च ॥ १७॥

सौरारसौम्या व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्दृढतासमेतम् ।
नरं प्रशस्तं नितरां प्रगल्भं
ख्यातं प्रियं बान्धववल्लभं च ॥ १८॥

शुक्रारजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्व्रतिनं मनुष्यम् ।
मातापितृभ्यां प्रणतं च शूरं
नीरोगधं नृपतेरभीष्टम् ॥ १९॥

सौरारजीवा व्ययगा यदा स्यु-
चन्द्रय कुर्युः कृपया समेतम् ।
नरं सतां प्रीतिकरं विधिज्ञं
प्रभूतसस्यं द्रविणं सुसत्यम् ॥ २०॥

सौरारशुक्रा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः सुभगं मनुष्यम् ।
यशयानुरक्तं हयवाहनज्ञं
प्रभूतकीर्तिं सुतरां सुरूपम् ॥ २१॥

शुक्रज्ञजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः सुतलालसं च ।
नरं सदा दानपरं हयाढ्यं
प्रियातिथिं सर्वसमं सुसत्यम् ॥ २२॥

सौरज्ञजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः प्रवरं मनुष्यम् ।
रोगैर्विहीनं शुभचक्षुःश्रोत्रं
नानायुधानां प्रविचक्षणं च ॥ २३॥

सौरशयशुक्रा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्विनयप्रधानम् ।
नरेन्द्रयानं विविधान्नपानं
भोगान्वितं सर्वकलासु दक्षम् ॥ २४॥

सुरेज्यशुक्रार्कसुता व्ययस्थाः
कुर्युर्नरं भूरिधनं विनीतम् ।

श्रियान्वितं प्राणपरं सलज्जं
जितेन्द्रियं विप्रपरं नयज्ञम् ॥ २५॥

सुरेज्यशुक्रऽयकुजा व्ययस्था-
श्चन्द्रस्य कुर्युर्बहुवाहनाढ्यम् ।
नरं प्रसन्नं विनयप्रधानं
सुसंमतं सर्वकलासु दक्षम् ॥ २६॥

सुरेज्यसौरज्ञकुजा व्ययस्थाः
कुर्युर्नरं पुण्यप्रं क्षतारिम् ।
नृपप्रसादेन सुतुष्टचिन्तं
वुख्यातक्रमाणमलोलुपं च ॥ २७॥

सुरेज्यशुक्रारदिनेशपुत्रा ..........
व्ययस्थिता रात्रिपतेर्यदा स्युः ।
कुर्युस्तदा भूरिसुतं मनुष्यं
विद्याधिकं रोगविवर्जितं च ॥ २८॥

शुक्रारसौम्यार्कसुता व्ययस्थाः
कुर्युः शशाङ्कस्य सतामभीष्तम् ।
नरं प्रचण्डं प्रभुतासमेतं
गजाश्ववस्त्राभरणैः समेतम् ॥ २९॥

शुक्रऽयजीवार्कसुता व्ययस्था-
श्चन्द्रस्य कुर्युर्व्यसनैर्विमुक्तम् ।
नरं प्रसूते प्रियवाक्यदक्षं
विदग्धनारीसहितं सदैव ॥ ३०॥

सुरेज्यशुक्रज्ञशनैश्चरारा-
श्चन्द्राद्व्ययस्थाः सततं च कुर्युः ।
प्रभूतभावं हतशत्रुदर्पं
नरं नितान्तं जनसंमतं च ॥ ३१॥

इति श्रीवृद्धयवनेऽनफायोगाध्यायः ॥

आध्याय ३८

सुनफायोगाध्यायः
सूर्यं विना रात्रिपतेर्धनस्थो
यदा ग्रहः स्याद्बहवोऽथवा स्युः ।
स्यातानय द्वौ सुनफाख्ययोग
हस्यद्यते रूपगुणैः सदैव ॥ १॥

चन्द्रस्य भौमौ यदि वित्तसंस्थो
नरं प्रसूते सुतरां धनाढ्यम् ।
धर्मध्वजं प्राणभृतां वरिष्ठं
प्रभूतमित्रं जनवल्लभं च ॥ २॥

द्वितीयगः सोमसुतो यदा स्या-
श्चन्द्रस्य धत्ते सुभगं मनुष्यम् ।
प्रभूतवित्तं धनधान्ययुक्तं
गुणानुरक्त जनसंमतं च ॥ ३॥

गुरुर्भवेच्छयदि वित्तसंथ-
श्चन्द्रस्य धत्ते प्रणतं मनुष्यम् ।
स्वभावशुद्धं प्रियसाधुकृत्य
महाजनैः शंसितमेव नित्यम् ॥ ४॥

चन्द्रस्य शुक्रो यदि वित्तसंस्थो
नरं विधत्तेऽद्भुतकृत्यदक्षम् ।
जनानुरक्तं विभवैः समेतं
सुशंसितं ब्राह्मणसंमतं च ॥ ५॥

चन्द्रस्य सौरो वित्तसंस्थो
नरं विधत्ते बहुलाभभाजम् ।
प्रभूतहस्त्यग्वगणैः समेतं
कुलप्रधानं शुभकर्मरक्तम् ॥ ६॥

धनस्थितौ रात्रिपतेर्यवक्रौ
नरं सदा दम्भधृतं कृतज्ञम् ।
विदग्धवाक्यं बहुधर्मभाजं
गतव्ययं पार्थिववल्लभं च ॥ ७॥

सुरेज्यवक्रौ यदि वित्तसंस्थौ

चन्द्रस्य मर्त्यं दधतः प्रधानम् ।
मनस्विनं शत्रुजनैर्विहीनं
सदा प्रसुष्टं बहुधर्मभाजम् ॥ ८॥

शुक्रावनेयौ यदि वित्तसंस्थौ
चन्द्रस्य वित्तं दधतो नराणाम् ।
नराक्रमं भूरियशःप्रतापं
शत्रुक्षयं बान्धवसङ्गमं च ॥ ९॥

सौरावनेयौ यदि वित्तसंस्थौ
चन्द्रस्य धत्तः सुभगं मनुष्यम् ।
विद्याविवेकागमशास्त्ररक्तं
महाप्रभावं प्रचुरार्थयुक्तम् ॥ १०॥

सुरेज्यसौम्यौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां दधतः प्रतापम् ।
धर्मार्थसिद्धिं प्रियतां च लोके
पूज्योत्तमानां जगतां जनानाम् ॥ ११॥

दैत्येज्यसौम्यौ यदि वि..........स्थौ
धनं तदा संदधतो नराणाम् ।
चन्द्रस्य मित्राश्वगजैः ..........ए.......अं
सुसाधुवादं नयसङ्गह च ॥ १२॥

शनैश्चरज्ञौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां दधतः क्षमां च ।
धर्मस्य वृद्धिं गुरुदेवभक्तिं
जितेन्द्रियत्वं बहुसस्यलाभम् ॥ १३॥

सुरेज्यशुक्रौ यदि वित्तसंस्थौ
..........पुंसां दधतो मतिं च ।
सुसाधुसन्मानमरिप्रणाश..........
सुशीलतां साधुजनेन सख्यम् ॥ १४॥

सुरेज्यसौरौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां द्धतोऽद्भुतानि ।
सौख्यानि दारात्मजसम्भवानि

सहाश्ववस्त्रौघसुवर्णसंघैः ॥ १५॥

धनस्थितौ शुक्रदिनेशपुत्रौ
चन्द्रस्य धत्तो धनपुत्रदारान् ।
गुणानुरागं प्रियतां च लोके
सुशीलतां भूरिपुराधिपत्यम् ॥ १६॥

जीवज्ञभौमा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति विभुं च पुंसाम् ।
पुराधिपत्यं जनताधिपत्यं
विद्वज्जनिः सङ्गममिष्टलाभम् ॥ १७॥

शुक्रज्ञभौमा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति सुखं नराणाम् ।
प्रियातिथित्यं जनतोपरोधं
विदग्धतां वीर्यविशुद्धिमेव ॥ १८॥

सौरश्चभौमा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति नरं धनाढ्यम् ।
निर्मुक्तवैरं सुतबन्धुमान्यं
..........आभरणं विदग्धम् ॥ १९॥

जीवारशुक्रा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति नृणां प्रहर्षम् ।
गुणानुरागं विजयं प्रमोदं
विदग्धतां वैरिनिनाशनं च ॥ २०॥

.......... ॥ २१॥

मन्दारशुक्रा धनगा यदा स्यु-
र्नरं प्रकुर्वन्ति सुशीलचेष्टम् ।
जनानुकूलं विभवैः समेतं
धर्मध्वजं चारुविशालनेत्रम् ॥ २२॥

जीवज्ञशुक्रा धनगा यदा स्यु-
श्चन्द्रस्य कुर्वन्ति सदा प्रभुत्वम् ।
कृतज्ञतां साधुजरोन्द्रियत्वं

विद्वज्जनैः सङ्गमनं सदैव ॥ २३॥

जीवज्ञसौरा धनगा यदा स्यु-
श्चन्द्रस्य कुर्वन्ति यशोर्थलाभम् ।
नरेन्द्रसत्यं प्रियतां च लोके
कीर्तिं सदा साधुसमागमं च ॥ २४॥

शुक्रज्ञसौरा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति कलत्रभाजम् ।
नरेन्द्रपूज्यं प्रियतां च लोके
तीर्थानुरागं सततं नराणाम् ॥ २५॥

जीवार्किशुक्रा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति गजाश्चलाभम् ।
मनोविशुद्धिं सुकलत्रलाभं
विवेकतां तीर्थरति ..........अत्वम् ॥ २६॥

सुरेज्यशुक्रज्ञकुजा धनस्था-
श्चन्द्रस्य कुर्वन्ति सुपार्थिवेभ्यः ।
प्रभूतलाभं स्मृतिशास्त्रसारं
सदा नराणां प्रविवेकमेव ॥ २७॥

सुरेज्यसौरज्ञकुजा धनस्था-
श्चन्द्रस्य कुर्वन्ति बहुप्रतापम् ।
सुतार्थलाभं सुजनप्रहर्ष-
मघ्यं च भूपादिसमागमं च ॥ २८॥

सौम्यारशुक्रार्कसुता धनस्था-
श्चन्द्रस्य कुर्वन्ति महाधनानि ।
नृणां सुचेष्टा विवि..........
कलत्रपुत्रार्थनिषेवणं च ॥ २९॥

सुरेज्यशुक्रारदिनेशपुत्रा-
श्चन्द्रस्य कुर्वन्ति धनाश्रिताश्च ।
धनं प्रभूतं जनतानुरागं
प्रसिद्धिमोजोद्धतलाभमेव ॥ ३०॥

सुरेज्यशुक्रास्यदिनेशपुत्रा
..........आश्रिता रात्रिपतेर्नराणाम् ।
कुर्वन्ति राज्यं बहुवित्तलाभं
सुसत्यतां भोगविवृद्धिमेव ॥ ३१॥

इति श्रीवृद्धयवने सुनफायोगाध्यायः ॥

---

आध्याय ३९
दुर्धारायोगाध्यायः
सूर्यं विना द्वाद्शवित्तसंथै-
श्चन्द्रस्य योगोऽत्र हि दुर्धराख्यः ।
अशीतियुक्तं सतमेव तेषां
पृथक् प्रदिष्टं उशुभं समग्रम् ॥ १॥

बुधे व्ययस्थे धनगे च भौमे
..........जातोऽत्र मनुश्यधर्मः ।
भवेद्धि..........प्रचुरप्रताप........
क्षितीश्वराणामतिवल्लभश्च ॥ २॥

भौमे व्ययस्थे शशैजे धनस्थे
मर्त्यः प्रभवेद्विनीतः ।
शास्त्रानुरक्तः प्रणतः प्रगल्भः
सदानुरक्तः सुरसत्त्वमानाम् ॥ ३॥

जीवे व्ययस्थे .......... क्षितिजे धनस्थे
चन्द्रस्य मर्त्योऽत्र भवेत् सुरूपः ।
श्रियान्वितः सत्यरतः कृतज्ञः
प्रियंवदः शास्त्रकथानुरक्तः ॥ ४॥

जीवे धनस्थे क्षितिजे व्ययस्थे
चन्द्रस्य जातोऽत्र भवेन्मनुष्यः ।
कुलप्रधानो विजेदेवभक्तः
सदा विनीतो जनवल्लभश्च ॥ ५॥

भौमे व्ययस्थे भृगुजे धनस्थे
चन्दस्य जातः सुभगो मनुष्यः ।

भवेद्विदग्धश्च सभासमेतः
प्रभूतवित्तः सुतरां श्रुतश्च ॥ ६॥

शुक्रे व्ययस्थे क्षितिजे धनस्थे
चन्द्रस्य जातोऽत्र भवेन्मनुष्यः ।
.......... रतुष्रः प्रवराश्वकोशो
दाक्षिण्यविद्यावौभोगभाजः ॥ ७॥

सौरे व्ययस्थे क्षितिजे धनस्थे
निशापतेः पुण्यपरो मनुष्यः ।
भवेन्निरिहः क्षतशत्रुपक्षः
प्रियातिथिः कान्तिपरः कृतज्ञः ॥ ८॥

सदा विभोगी नृपमोहनश्च
नरेन्द्रपूज्यः सुभगः प्रतापी ।
भौमे व्ययस्थेऽर्कसुते धनस्थे
चन्द्रस्य जातो मनुजः सदैव ॥ ९॥

जीवे व्ययस्थे शशिजे धनस्थे
चन्द्रस्य जातः प्रियवान् मनुष्यः ।
सुसाधुवन्द्यः श्रुतिबुद्धियुक्तः
कृपासमेतः सततं सुभोगी ॥ १०॥

जीवे धनस्थे शशिजे व्ययस्थे
चन्द्रस्य जातः सुजनानुयायी ।
नरो भवेद्रोगविमुक्तदेहः
सन्तुष्टचित्तो विनयान्वितश्च ॥ ११॥

सौम्ये व्ययस्थे भृगुजे धनस्थे
चन्द्रस्य मर्त्यः प्रभवेत् सुदारः ।
प्रियातिथिः सत्यदयान्वितश्च
सम्पूजितः शीलधनप्रभावात् ॥ १२॥

सौम्ये धनस्थे भृगुजे व्ययस्थे
चन्द्रस्य जातः प्रथिताभिमानः
भवेन्मनुष्यः सुजनप्रवीणो
भोक्ता विभागी विनयेन युक्तः ॥ १३॥

मन्दे व्ययस्थे शशिजे धनस्थे
चन्द्रस्य जातः पतितागमश्च ।
भवेन्मनुष्यः प्रथितोऽभिमानी
नीतिप्रियः प्राणभृतां वरिष्ठः ॥ १४॥

.......... ॥ १५॥

जीवे व्ययस्थे भृगुजे धनस्थे
चन्द्रस्य जातोऽत्र भवेन्मनुष्यः ।
सम्पूर्णकायः कृतैर्विहीनो
सतामभीष्टो नृपवल्लभश्च ॥ १६॥

जीवे धनस्थे भृगुजे व्ययस्थे
सङ्ग्रामदक्षस्तु भवेन्मनुष्यः ।
च्न्द्रस्य नानाविधहेमभाजो
जनप्रधानः प्रथितोऽभिमानी ॥ १७॥

जीवे व्ययस्थेऽर्कसुते धनस्थे
चन्द्रस्य जातो बहुबुद्धिभाजः ।
भवेन्मनुष्यः श्रुतिशास्त्ररक्तः
कलासु दक्षो गुणसागरश्च ॥ १८॥

जीवे धनस्थेऽर्कसुते व्ययस्थे
मनस्वनां मुख्यतमो नरः स्यात् ।
चन्द्रस्य दाता सुकृपः प्रगल्भः
सुशीलवित्तार्जनतत्परश्च ॥ १९
शुक्रे व्ययस्थेऽर्कसुते धनस्थे
चन्द्रस्य जातो बहुपुण्यसेवी
भवेमनुष्यः सततं गुणाढ्यः
प्रभूतकोशः प्रचुरप्रगल्भः ॥ २०॥

शुक्रे धनस्थेऽर्कसुते व्ययस्थे
भवेन्मनुष्यो भयतः सुवीरः ।
सदान्यदेशार्जितवित्ततुष्टः
क्षितीश्वरस्याभिमतः सुधामः ॥ २१॥

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितौ जीवबुधौ मनुष्यः ।
भवेत् प्रधानः शुभकर्मरक्तः
प्रभूतलाभः सुतरां सुभोगी ॥ २२॥

चन्द्रस्य भौमो यदि रिष्फसंस्थो
धनस्थितौ जीवबुधौ मनुष्यः ।
भवेन्नृपाणां कर्णैः कनिष्ठः
सुवस्त्रविद्यागमसद्यभाजः ॥ २३॥

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितौ भार्गवसोमपुत्रौ ।
नरो भवेन्नीतिपरस्तथाढ्यः
प्रभूतमित्राभरणैश्च दक्षः ॥ २४॥

चन्द्रस्य भौमो व्ययगो यदा स्याद्
धनस्थितौ भार्गवसोमपुत्रौ ।
भवेन्मनुष्यः प्रणयप्रधानः
प्रियंवदः पार्थिववर्धितश्च ॥ २५॥

निशापतेर्भूतन्यो व्ययस्थो
धनस्थितौ मन्दशशाङ्कपुत्रौ ।
यदा तदा सत्यपरो मनुष्यो
भवेद्विदग्धो वनितासखश्च ॥ २६॥

भौमः शशाङ्कस्य यदा ध्नस्थो
व्ययस्थितौ सौम्यदिनेशपुत्रो ।
तदा प्रगल्भः प्रचुरान्नपानः
प्रभूतकोशः प्रभवेन्मनुष्यः ॥ २७॥

निशापतेर्भूतनयो व्ययस्थो
धनाश्रितौ जीवभृगू प्रधानः ।
नरो भवेत् सत्यपरोऽत्र जात
मुदारचेष्टः प्रणतः प्रसिद्धः ॥ २८॥

भौमो धनस्थे रजनीपतेश्च
व्ययस्थितौ भार्गवदेवपूज्यौ ।

भवेन्मनुष्यः प्रथिताभिमानो
रत्नार्थसस्यादिहिरण्यसारः ॥ २९॥

व्ययस्थिते भूमिसुते हिमांशो-
र्धनाश्रयस्थौ यदि जीवसौरौ ।
तदा मनुष्यः प्रभवेत् सुशीलः
कलासु दक्षः क्षतशत्रुपक्षः ॥ ३०॥

धनस्थितौ भूतनये हिमांशौ-
र्व्ययस्थितौ सौरौरेशपूज्यौ ।
स्यातां तदा स्यात् सुतदारवित्तैः
सन्तुष्टचिन्तः प्रवरो मनुष्यः ॥ ३१॥

हिमद्युतेर्भूतनयो व्ययस्थो
यदा धनस्थौ भृगुसूर्यपुत्रौ ।
तदा भवेत् पुण्यपरो मनुष्यो
गुणानुरक्तः प्रचिताभिमानः ॥ ३२॥

धने यदि स्यात् इतिजो व्ययस्थौ
शुक्रार्कपुत्रौ प्रचुरप्रतापः ।
भवेश्च जातः परदेशकृत्यो
विख्यातकीर्तिः श्रुतिसंयुतश्च ॥ ३३॥

हिमद्युते सोमसुतो व्ययस्थौ
धनस्थितौ वक्रसुरेशपुज्यौ ।
तदा भवेन्मुख्यतमः स्ववर्गे
प्रियंवदः प्राज्ञत्मः प्रभुत ॥ ३४॥

.......... ॥ ३५॥

चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
हनस्थितौ वक्रभृगू प्रधानः ।
तदा मनुष्यः स्मृतिवाक्यरक्तः
श्रुतिप्रधानो नयनाभिरातः ॥ ३६॥

हिमद्युतेः सोमसुतो धनस्थो
व्ययस्थितौ भौमभृगू प्रधानः

नरो भवेत् सर्वसहः कृतघ्नः
स्वदारसन्तुष्टमनाः सदैव ॥ ३७॥

सौम्यः शशाङ्कस्य यदा व्ययस्थो
धनस्थितौ सूर्यजभूमिपुत्रौ ।
नरोऽत्र जातः प्रभवेत् सुरूपः
प्रियंवदोऽनल्पमतिः सुधर्मः ॥ ३८॥

सौम्यो धनस्थो हिमगोर्यदा स्यात्
स्यातां कुजार्कि यदि रिष्फगौ तौ ।
तदा भवेद्भूरिधनो मनुष्यः
प्रियातिथिः सत्यपरो दयावान् ॥ ३९॥

सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ शुक्रसुरेशपूज्यौ ।
तदा नरः स्याद्बहुवित्तयुक्तो
विवेकविद्यागमशास्त्रलुब्धः ॥ ४०॥

व्ययस्थितौ शुक्रसुरेशपूज्यौ
हनस्थितो ज्ञो रजनीपतेश्च ।
तदा मनुष्यः प्रभवेत् कृतज्ञो
देवद्विजानां सततं प्रसक्तः ॥ ४१॥

सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ सूरिशनैश्चरौ तु ।
तदा विनितः प्रणतारिपक्षः
सुरूपगात्रः प्रचुरान्नपानः ॥ ४२॥

सौम्यौ धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ जीवदिनेशपुत्रौ ।
तदा मनुष्यः सुकृतानुरक्तो
भवेन्महात्मा बहुवित्तभाजः ॥ ४३॥

चन्द्रस्य सौम्यो यदि रिष्फसंस्थः
शुक्रार्कजौ वित्तगतौ मनुष्यः ।
तदा भवेत् साधुसमाग्मोक्तः
प्रभूतमित्रो घृणयाधिकश्च ॥ ४४॥

धनस्थितः सोमसुतो हिमांशो-
र्व्ययस्थितौ शुक्रशनैश्चरौ तु ।
भवेन्मनुष्यः सुसुतः सुविज्ञः
प्रियासमेतः प्रियसाधुवादः ॥ ४५॥

जीवो व्ययस्थो यदि शीतरश्मि-
र्धनस्थितौ भूमिजचन्द्रपुत्रौ ।
सुरूपदारोऽत्र भवेन्मनुष्यो
दृढ्यव्रतज्ञः सुरतानुकूलः ॥ ४६ ॥

चन्द्रस्य जीवो यदि वित्तसंस्थो
व्ययस्थितौ भूमिशशाङ्कजौ च ।
भवेत्तदा विज्ञत्मो मनुष्यः
प्रभूतशास्त्रार्थसमृद्धबुद्धिः ॥ ४७॥

चन्द्रस्य जीव् यदि रिष्फसंस्थो
धनस्थितौ शुक्रधरित्रिपुतौ ।
तदा भवेन्नातिविधानदक्षो
लज्जाधिकः स्नेहपरो मनुष्यः ॥ ४८॥

धनस्थितो देवगुरुर्हिमांशो-
र्व्ययस्थितौ शुक्रकुजौ मनुष्यः ।
भवेत् प्रजातः सततं नयश्चः
प्रभूतकोशो मखकर्मरक्तः ॥ ४९॥

हिमद्युतेर्देवगुरुर्व्ययस्थो
धनस्थितौ वक्रशनैश्चरौ तु ।
भवेन्नरः प्राणभृतां वरिष्ठो
हस्त्यश्वभागी सुदृढ्याङ्गयष्टिः ॥ ५०॥

चन्द्रस्य जीवो धनगो यदा स्याद्
व्ययाश्रितौ सूर्यजभूमिपुत्रौ ।
भवेन्मनुष्यः सुतरां सुकर्मा
जितारिवर्गो गुणगौरवश्च ॥ ५१॥

हिमद्युतेर्देवगुरुर्व्ययस्थो

धनारयस्थौ सितसोमपुत्रौ ।
शूरश्च युक्तो मतिमान् प्रसिद्धो
भवेन्मनुष्यः खलताविहीनः ॥ ५२॥

प्रालेयरश्मेर्धनगः उरेज्यो
व्ययस्थितौ शुक्रशशाङ्कपुत्रौ ।
भवेन्नरो रोषकलिप्रयुक्तः
प्रियाधिकः प्राप्तधनः सदैव ॥ ५३॥

चन्द्रस्य जीवो यदि रिष्फसंस्थो
धनस्थितौ सौम्यशनैश्चरौ तु ।
भवेन्मनुष्यः श्रुतचिन्तयुक्तः
सत्यान्वितः पार्थिववल्लभश्च ॥ ५४॥

चन्द्रस्य जीवो यदि वित्तसंस्थो
व्ययस्थितौ सोमससूर्यपुत्रौ ।
तदा विवेकी प्रभवेन्मनुष्यः
कल्पः कविः पापविवर्जितश्च ॥ ५५॥

नोवोऽन्त्यसंस्थो यदि शीतरश्मे-
र्धनथितौ शुक्रशनैश्चरौ तु ।
तदातिशूरोऽत्र भवेन्मनुष्यो
नीरोगदेहः स्मितपूर्ववक्त्रः ॥ ५६॥

जीवो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भार्गवसूर्यपुत्रौ ।
नयप्र..........वित्तसारो
भवेन्नृपः सत्यशुचिः प्रगल्भः ॥ ५७॥

चन्द्रस्य शुक्रो यदि रिष्फसंस्थो
धनाश्रितौ सोमजभूमिपुत्रौ ।
तदा भवेन्मातृप्रभक्तः
शास्त्रानुरक्तो रणकर्मदक्षः ॥ ५८॥

चन्द्रस्य शुक्रो यदि वित्तसंस्थो
व्ययस्थितौ भौमशशाङ्कपुत्रौ ।
तदा भवेद्दानपरो मनुष्यः

प्रक्षीणपापो बहुपुत्रपौत्रः ॥ ५९॥

चन्द्रस्य शुक्रो व्ययगो यदा स्याद्
धनस्थितौ भौमसुरेज्यसंज्ञौ ।
तदा मनस्वी निजदाररक्तो
महाकविः सत्यशुचिः सदैव ॥ ६०॥

शुक्रो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भूमिजदेवपूज्यौ ।
तदा प्रभूतद्रविणस्य नाथो
भवेत् सुरूपः सुतरां मनुष्यः ॥ ६१॥

नक्षत्रनाथस्य सितो व्ययस्थो
धनस्थितौ भौमदिनेशपुत्रौ ।
तदा मनुष्यः क्षितिवित्तनाथो
भवेत् प्रसूतश्च सुतैः समेतः ॥ ६२॥

नक्षत्रनाथस्य सितो धनस्थो
व्ययस्थितौ सौरिधरित्रिपुत्रौ ।
भवेन्नरः शिल्पकलासु दक्षः
क्षमाधिकः कृयपरः प्रसन्नः ॥ ६३॥

नक्षत्रनाथस्य सितो व्ययस्थो
धनस्थितौ सौम्यसुरेशपूज्यौ ।
भवेन्मनुष्यः क्षतजातिपक्षो
दक्षः क्षमी प्राणसमन्वितश्च ॥ ६४॥

नक्षत्रनाथस्य इतो धनस्थो
व्ययस्थितौ सौम्यसुरेशपूज्यौ ।
भवेन्मनुष्यः सततं सुशीलः
सभावशुद्धः प्रियधर्मकृत्यः ॥ ६५॥

शुक्रो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ सूर्यजसोमपुत्रौ ।
भवेन्मनुष्यः प्रियसाहुकृत्यो
मायाविहीनः स्फुटवाक्यवक्ता ॥ ६६॥

शुक्रो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ मन्दशशाङ्कपुत्रौ ।
नरो भवेद्भूरियशोनिधानो
नानाश्वसंघाधिपतिः प्रगल्भः ॥ ६७॥

शुक्रः शशाङ्कस्य यदा व्ययस्थो
धनस्थितौ सौरसुरेन्द्रपूज्यौ ।
नरो भवेत् प्रीतिपरः प्रसन्नः
सतामभीष्टः सुरतानुरक्तः ॥ ६८॥

शुक्रः शशाङ्कस्य् यदा धनस्थो
व्ययाश्रितौ जीवदिनेशपुत्रौ ।
तदा मनुष्यः परपक्षहन्ता
भवेन्निरीहो हतकमषश्च ॥ ६९॥

मन्दः शशाङ्कस्य यदा व्ययस्थो
धनाश्रितौ भूमिजसोमपुत्रौ ।
[तदा मनुष्यः परपक्षहन्ता]
सतुष्टचिन्तः प्रबलो विशङ्कः ॥ ७०॥

मन्दः शशाङ्कस्य यदा धनस्थो
व्ययस्थितौ भूमिजसोमपुत्रौ ।
तदा मनुष्यः प्रभुतासमेतो
मखांशभुक् शास्त्रकलासु दक्षः ॥ ७१॥

शनिर्व्ययस्थो यदि शीतरश्मेः
सुरेज्यभौमौ धनगौ भवेताम् ।
तत्राभिजातः प्रथितः स्ववर्गे
सतामभीष्टः सुतसौख्यभाजः ॥ ७२॥

शनिर्नस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भौमौरेन्द्रपूज्यो ।
भवेन्नरः शास्त्रपरः प्रसिद्धिः
सदा सुशीलः कृपया समेतः ॥ ७३॥

शनैश्चरो रात्रिपतेर्व्ययथो
धनस्थितौ भार्गवमङ्गलास्यौ ।

भवेन्मनुष्यः सततं मनस्वी
प्रसन्नमुर्तिनजनानुरक्तः ॥ ७४॥

शनैश्चरो रात्रिपतेर्धनस्थो
व्ययस्थितौ भार्गवभूमिपुत्रौ ।
भवेन्नरश्चारूविशालनेत्रो
गम्भीरवाक्यो मलिमानृ.......... ॥ ७५॥

निशोपतेः सूर्यसुतो व्ययस्थो
धनस्थितौ सौम्यसुरेन्द्रपूज्यौ ।
भवेन्मनुष्यः कृषिलब्धवित्तो
वानिज्यदश्चः कालदोषमुक्तः ॥ ७६ ॥

चन्द्रस्य सौरो यदि वित्तसंस्थो
व्याश्रितौजीवशशाङ्कपुत्रौ ।
तदा नरो भोगविवृद्धगात्रः
सदा सुभक्तो विजदेवतानाम् ॥ ७७॥

चन्द्रस्य सौरो यदि रिष्फसंस्थो
धनस्थितौ शुक्रबुधौ तदा स्यात् ।
नरोऽतिमान्यः प्रभुतासमेतः
सुधर्मशीलः सततं विनीतः ॥ ७८॥

चन्द्रस्य सौरो यदि वित्तसंस्थो
व्ययस्थितौ भार्गवसोमपुत्रौ ।
भवेत् सुशीलः पशुमुख्यवृत्तिः
प्रसन्नमूर्तिर्मनुजः सुसत्यः ॥ ७९॥

शनैश्चरो रिष्फगतो हिमांशो-
र्धनाश्रितौ जीवसितौ यदा च ।
नरो भवेत् प्रीतिपरः प्रजानां
सदैव भक्तो द्विजपुङ्गवानाम् ॥ ८०॥

शनशिचरो वित्तगतो हिमांशो-
र्व्ययस्थितौ जीवसितौ यदा च ।
तदा प्रसूतः प्रबलः प्रसिद्धो
नरो भवेन्नीतिपरः सुलज्जः ॥ ८१॥

इति द्विविकल्पः ॥

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थिताः सौम्यसुरेज्यशुक्राः ।
तदा भवेद्भूमिपतिर्मनुष्यो
हतारिपक्षो हतकल्मषश्च ॥ ८२॥

भौमो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिताः सौम्यसुरेज्यशुक्राः ।
भवेदसत्य्ः पुरुषोऽत्र जातः
कुलप्रधानः सुविशारदश्च ॥ ८३॥

चन्द्रस्य भौमो यदि रिष्फसंस्थो
धनाश्रिताः सौरसुरेज्यसौम्याः ।
तदा भवेच्छौचपरो मनुष्यः
प्रभूतवित्तः प्रभुतासमेतः ॥ ८४॥

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितो जीवबुधार्कपुत्राः ।
तदा सुरूपः सुभगो मनुष्यो
भवेत् सुदान्तः सुतरां विवेकी ॥ ८५॥

व्ययस्थितो भूतनयो हिमांशो-
र्धनस्थिताः शुक्रबुधार्कपुत्राः ।
विदग्धचेष्टः प्रभवेन्मनुष्यः
श्रुतिप्रियः प्राज्ञतमः प्रधानः ॥ ८६॥

धनस्थितो भूतनयो हिमांशो-
बुधार्कपुत्रास्फुजिदो व्ययस्थाः ।
भवेन्नरः प्राप्तिधनातिभव्यो
वियाधिकः कीर्तिसमन्वितश्च ॥ ८७॥

चन्द्रस्य भौमो यदि रिष्फसंस्थो
धनस्थिताः शुक्रसुरेज्यसौराः ।
भवेद्विनीतः प्रथितोऽभिमानी
नरो विधिज्ञः प्रणतः प्रसिद्धः ॥ ८८॥

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितो जीवसितार्कपुत्राः ।
भवेत् सतामिष्टतमोऽभिरामः
शास्त्रानुरक्तः कृपयाधिकश्च ॥ ८९॥

चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
धनस्थिता भौमसितामरेज्याः ।
सुसत्यचेष्टः प्रभवेन्मनुष्यो
नीरोगगात्रस्त्रपयाधिकश्च ॥ ९०॥

बुधो हिमांशोर्यदि वित्तसंस्थो
व्ययस्थिताः शुक्रकुजामरेज्याः ।
भवेत् सुभक्तो निजबन्धुवर्गे
सतामभीष्टः प्रचुरान्नपानः ॥ ९१॥

सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिता वक्रसुरेज्यसौराः
विख्यातकर्मा सुभगो मनुष्यो
भवेत् प्रतापी गुणसागरश्च ॥ ९२॥

सौम्यो धनस्थो य्दि शीतरश्मे-
र्व्ययस्थिता मन्दौरेज्यवक्राः ।
महाधनो बुद्धियुतो मनुष्यो
भवेत् प्रधानो नियमैः समेतः ॥ ९३॥

व्ययस्थितः सोमसुतो हिमांशो-
र्धनस्थिताः शुक्रकुजार्कपुत्राः ।
भवेन्मनुष्यो नितरां विदग्धः
प्रियातिथिः शास्त्रपरः कृतज्ञः ॥ ९४॥

धनस्थितः सोमसुतो हिमांशो-
र्व्ययश्रिताः सौरसितावनेयाः ।
भवेदभीष्टः प्रणतः प्रिसिद्धो
हतारिपक्षः सततं सुधर्मः ॥ ९५॥

चन्द्रस्य सौम्यो व्ययगो यदा स्याद्

धनस्थिता जीवसितार्कपुत्राः ।
भवेद्विनीतः सुतदारयुक्तः
प्रसन्नमूर्तिः प्रथिताभिमानः ॥ ९६॥

चन्द्रय सौम्यो धनगो यदा स्याद्
व्ययस्थिताः सौरिसितामरेज्याः ।
भवेन्मनुष्यो अद्भुताविक्तरूप
उदारचेष्टः सततं विधिज्ञः ॥ ९७॥

व्ययस्थितो देवगुरुर्हिमांशो-
र्धनस्थिताः सौम्यसितावनेयाः ।
नरो भवेदत्र सलज्जकर्मा
विशेषशास्त्रार्थयुतः सदैव ॥ ९८॥

धनस्थितो देवगुरुर्हिमांशो-
र्व्ययस्थिता भार्गववक्रसौम्याः ।
भवेन्नरः शत्रुवधानुरक्तः
क्रियापरः पुण्यसमन्वितश्च ॥ ९९॥

जीवो व्ययस्थितो यदि शीतरश्मे-
र्धनस्थिता मन्दबुधावनेयाः ।
भवेन्मनुष्यो बहुगोवृषाढ्यो
हस्त्यश्वभागी मतिमानुदारः ॥ १००॥

जीवो धनस्थो यदि शीतरश्मे-
र्व्ययस्थिताः सौम्यकुजार्कपुत्राः ।
तदा मनुष्यो यशसा समृद्धो
वह्नन्नभाग्रोगविवर्जितश्च ॥ १०१॥

.......... ॥ १०२॥

चन्द्रय जीवो यदि वित्तसंस्थो
व्ययस्थिता भार्गवसौरभौमाः ।
तदा मनुष्यः प्रणयानुरक्तक्तो
विवेकयुक्तः प्रमदाप्रियश्च ॥ १०३॥

चन्द्रस्य जीवो यदि रिष्फसंस्थो

धनस्थिताः सौम्यसितार्कपुत्राः ।
तदा मनुष्यः परमाप्तभावो
भवेत् सुधामा विजितारिसंघः ॥ १०४॥

जीवः शशाङ्कस्य यदा धनस्थो
..........सौम्यसितार्कपुत्राः ।
तदा मनुष्यः सुभगग् सुशीलः
कृती विदग्धः सततं प्रगल्भः ॥ १०५॥

शुक्रो यदा रात्रिपतेर्व्ययस्थो
धनस्थिता भौमबुधामरेज्याः ।
तदा मनुष्यः सुचिरप्रसन्नः
प्रभूरसत्त्वः सुजनानुरक्तः ॥ १०६॥

शुक्रो यदा रात्रिपतेर्धनस्थो
व्ययस्थिता भौमबुधामरेज्याः ।
तदा मनुष्यो नृपतेरभीष्टः
सदा सुभोगी रणकर्म .......... ॥ १०७॥

शुक्रो यदा रात्रिपतेर्व्ययस्थो
धनाश्रिता भौमबुधार्कपुत्राः ।
तदा मनुष्यः सुतविक्रमाढ्यः
प्रभूतभृत्यः परमप्रभावः ॥ १०८॥

शुक्रो यदा रश्मिमर्धनस्थो
व्ययस्थिता मन्दबुधावनेयाः ।
भवेन्मनुष्यः प्र..........इताभिमानः
सन्तुष्टचिन्तः प्रचुरप्रभावः ॥ १०९॥

शुक्रो यदा रात्रिपतेर्व्ययस्थो
धनस्थिता जीवकुजार्कपुत्राः ।
भवेन्नरो धर्मपचानुगमी
प्रियाश्रमो बान्धवसंमतश्च ॥ ११०॥

शुक्रो यदा रात्रिपतेर्धनस्थो
व्ययस्थिताः सौरिकुजामतेज्याः ।
भवेन्नरः सर्वकलासु दक्षो

नरः प्रतापी परदर्पडा च ॥ १११॥

शुक्रो यदा रात्रिपतेर्व्ययस्थो
धनस्थिता जीवबुधार्कपुत्राः ।
भवेत् प्रजातो मतिसौख्यदायी
नरः प्रधानः परहीनपक्षः ॥ ११२॥

शुक्रो यदा रात्रिपतेर्धनस्थो
व्ययस्थिता मन्दबुधामरेज्याः ।
भवेज्जयी विवङ्गविधानदक्षो
नरो नितान्तं प्रभुतासमेतम् ॥ ११३॥

मन्दो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिता भौमबुधामरेज्यः ।
भवेविनीतः प्रथितो ..........
प्रभूतपुत्रस्त्रपया समेतः ॥ ११४॥

मन्दो धनस्थो यदि शीतरश्मे-
र्व्ययस्थिता भौमबुधामरेज्याः ।
तदार्थभागी सुभगो ..........
भवेत् सुदान्तो द्विजवल्लभश्च ॥ ११५॥

चन्द्रस्य सौरो यदि रिष्फसंस्थो
धनस्थिताः शुक्रबुधावमेयाः ।
प्रभूततामन्त्रसुतार्थभागी
तदा नरः स्याद्बहुशास्त्रसवी ॥ ११६॥

चन्द्रस्य सौरो यदि वित्तसंस्थो
व्ययाश्रिता भार्गवसौम्यभौमाः ।
भवेत्तदा दम्भरुषाविहीनः
सत्वाध्कः काव्यकरो मनुष्यः ॥ ११७॥

चन्द्रस्य सौरो व्ययगो यदा साद्
धनाश्रिताः शुक्रकुजामरेज्याः ।
तदा विपक्षक्षयुकृन्मनुष्यो
भ्वेत् सुमेधा नृपतेरभीष्टः ॥ ११८॥

सौरो धनस्थो यदि शीतरश्मे-
र्व्ययश्रिता भौमसितामरेज्याः ।
नानार्थभागी प्रियवाङ्मनुष्यो
भवेत् सदा दान्दयासमेतः ॥ ११९॥

सूर्यात्मजो रिष्फगतो हिमांशो-
र्धनस्थिताः सौम्यसितामरेज्याः ।
भवेत् प्रतापः जनतासुताढ्यो
नरः ..........उ........ र्हः प्रियदः प्रजानाम् ॥ १२०॥

सूर्यात्मजो वित्तगतो हिमांशो-
र्व्ययस्थिताः शुक्राबुधामरेज्याः ।
नरो भवेन्मनुष्यतमः कुलस्य
स्वदाररक्तः परवर्जितश्च ॥ १२१॥

एवं त्रिविकल्पः ॥

व्ययस्थितो भूमिसुतो हिमांशो-
र्धनस्थिताः सौरसितज्ञजीवाः ।
भवेन्नरः पार्थिववंशजात्यो
जातोऽत्र योगे सचिवः समृ.......... ॥ १२२॥

धनस्थीतो भूमिसुतो हिमांशो-
र्व्ययस्थिताः सौरैतज्ञजीवाः ।
भवेद्धनानामधिपः सुरूपः
प्रभूतमित्रः सततं सुशीलः ॥ १२३॥

चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
धनस्थिताः सौरसितारजीवाः ।
भवेन्मनुष्यः क्षतशत्रुपक्षो
विदग्धनारिरतलब्धसौख्यः ॥ १२४॥

चन्द्रस्य सौम्यो यदि वित्तसंस्थो
व्ययस्थिताः सौरसितार्जीवाः ।
भवेत् सदा प्रितिपरो मनुष्यः
प्रभूतकोशः सुभगो मनोज्ञः ॥ १२५॥

व्ययस्थितो देवगुरुर्हिमांशो-
र्धनस्थिता भौमसितज्ञसौराः ।
तदार्थसस्याश्वगजप्रधानो
भवेन्मनुष्यो विविधप्रमोदः ॥ १२६॥

धनस्थितो देवगुरुर्हिमांशो-
र्व्ययस्थिता वक्रसितज्ञसौराः ।
नरो भवेत् प्राज्ञतरः सलज्जः
सतामभीष्टः सुधनः सुदारः ॥ १२७॥

शुक्रः शशाङ्कस्य यदा व्ययस्थो
धनस्थिता भौमगुरुज्ञसौराः ।
सुपुण्यशीलोऽत्र भवेन्मनुष्यः
प्रियात्मजो।दीक्षितलोकभक्तः ॥ १२८॥

शुक्रः शशाङ्कस्य यदा धनस्थो
व्ययस्थिता भौमगुरुज्ञसौराः ।
प्रभूतवित्तोऽत्र भवेन्मनुष्यः
प्रधानमित्रः कृषिकर्मसक्तः ॥ १२९॥

सौरः शशाङ्कस्य यदा व्ययस्थो
धनस्थिता भौमसितज्ञजीवाः ।
तदा विवेकागमशास्त्ररक्तः
क्रियासु दक्षः सततं विधिज्ञः ॥ १३०॥

सौरः शशाङ्कस्य यदा भनस्थो
व्ययस्थिता भौमसितज्ञजीवाः ।
तदा सुतारामतहागकर्म-
क्रियासमेतः प्रियसाहसश्च ॥ १३१॥

एवं चतुर्विकल्पः ॥

सौम्यावनेयौ यदि रिष्फसंस्थौ
धनस्थितौ भार्गवदेवपूज्यौ ।
सुरेज्यपूजानिरतो मनुष्यः
कुलप्रधानः प्रणतः सुधामः ॥ १३२॥

.......... ॥ १३३॥

यधाव..........यौ यदि रिष्फसंस्थौ
हनरिपतौ जीवदिनेशपुत्रौ ।
तदा मनुष्यः सुतदारतुष्टो
भवेन्महात्मा गुरुदेवभक्तः ॥ १३४॥

बुधावनेयौ यदि वित्तसंथौ
व्ययस्थितौ जीवदिनेशपुत्रौ ।
भवेदरोगः शुभका..........
प्रियंवदो नीतिपरो मनुष्यः ॥ १३५॥

बुधावनेयौ यदि रिष्फसंस्थौ
शुक्रार्कपुत्रौ धनगौ हिमांशोः ।
जनानुरागर्जितभूमिवित्तः
उसंमितः सत्यरुचिर्मनुष्यः ॥ १३६॥

बुधावनेयौ यदि वित्तसंस्थौ
शुक्रार्कपुत्रौ व्ययगौ हिमांशोः ।
सुरूपगात्रः प्रभवेन्मनुष्यः
सौभाग्यविद्यासहितः सदैव ॥ १३७॥

भौमामरेज्यौ यदि रिष्फसंस्थौ
सितेन्दुपुत्रौ धनगौ हिमांशो ।
भवेन्मनुष्यः सततं प्रगल्भः
प्रभूत वित्तान्नचतुष्पदाढ्यः ॥ १३८॥

भौमामरेज्यौ यदि वित्तसंस्थौ
सितेन्दुपुत्रौ व्ययगौ हिमांशोः ।
भवेन्मनुष्यः प्रथिताभिमानो
नयप्रधानः सततं सुधीरः ॥ १३९॥

सुरेज्यभौमौ यदि रिष्फसंस्थौ
सौरेन्दुजौ वित्तगतौ सुधांशोः ।
भवेन्मनुष्यो बहुभोगभागी
नरेन्द्रपूज्यः कृतनिश्चयश्च ॥ १४०॥

सुरेज्यभौमौ यदि वित्तसंस्थौ
सरेन्दुजौ रिष्फगतौ सुधांशोः ।
ज्ञानशीलः क्रममार्गगामी
जितेन्द्रियः स्यात् सुभगो मनुष्यः ॥ १४१॥

जीवावनेयौ यदि रिष्फसंस्थौ
धनाश्रितौ सूर्यजदैत्यपूज्यौ ।
भवेन्मनुष्यः पिशुनाधिनाथः
प्रभूतकोशः प्रचुरप्रतापः ॥ १४२॥

जीवावनेयु यदि वित्तसंस्थौ
रिष्फाश्रितौ सूर्यजदैत्यपूज्यौ ।
भवेन्मनुष्यः सुतरां प्रसूतो
नयानुकूलः सुमनोज्ञरूपः ॥ १४३॥

चन्द्रस्य शुक्रावनिजौ व्ययस्थौ
धनाश्रितौ जीवशशाङ्कपुत्रौ ।
यदा तदा सत्यपरो मनुष्यः
शुचिर्भवेत् पुण्यपरः सदैव ॥ १४४॥

चन्द्रस्य शुक्रावनिजौ वित्तसंस्थौ
व्ययस्थितौ जीवशशाङ्कपुत्रौ ।
यदा तदा मुख्यतमः सुरूपो
गुणानुरक्तः प्रथितः सुसत्यः ॥ १४५॥

चन्द्रस्य शुक्रावनिजौ व्ययस्थौ
धनाश्रितौ सौम्यदिनेशपुत्रौ ।
नरोऽत्र जातः कृतभूरिदानः
कुलप्रधानः प्रचुरान्नपानः ॥ १४६॥

चन्द्रस्य शुक्रावनिजौ धनस्थु
व्ययस्थितौ सौम्यदिनेशपुत्रो ।
नरोऽत्र जातः प्रभुतासमेतो
भवेत् सुरूपः प्रमदाप्रियश्च ॥ १४७॥

शुक्रावनेजौ व्ययगौ हिमांशो-
र्धनाश्रितौ सौरसुरेन्द्रपूज्यौ ।

नरोऽत्र जातः कमलायताक्षः
कुलप्रधानः प्रियसौहृदश्च ॥ १४८॥

शुक्रावनेयौ धनगौ हिमांशो-
र्व्ययाश्रितौ सौरसुरेन्द्रपूज्यौ ।
भवेन्मनुष्यः सुतसौख्ययुक्तः
.......... ॥ १४९॥

भौमार्कपुत्रौ व्ययगौ हिमांशो-
र्धनस्थितौ जीवशशाङ्कपुत्रौ ।
नरोऽत्र जातो विनयप्रसन्नः
कुलाधिकः काव्यरतो दयालुः ॥ १५०॥

भौमार्कपुत्रौ धनगौ हिमांशो-
र्व्ययाश्रितौ जीवशशाङ्कपुत्रौ ।
भवेन्मनुष्यः शुभबुद्धिवित्तः
सतामभीष्टः सदयः सुशीलः ॥ १५१॥

चन्द्रस्य भौमार्कसुतु व्ययस्थौ
धनाश्रितौ भार्गवसोमपुत्रौ ।
भवेन्नरः साधुतमः सुरम्यः
प्रभूतकीर्तिर्जयमानभाजः ॥ १५२॥

चन्द्रस्य भौमार्कौअतु धनस्थौ
व्ययाश्रितौ भार्गवसोमपुत्रौ ।
प्रभवेद्विनीतोऽत्र नरः कृपालु-
श्चतुष्पदाच्छादनभोजनाढ्यः ॥ १५३॥

चन्द्रस्य सौरक्षितिजौ व्ययस्थौ
धनाश्रितौ भार्गवदेवपूज्यौ ।
नरो विनीतो हतशत्रुवित्तः
सदान्नदो धर्मसमन्वितश्च ॥ १५४॥

चन्द्रस्य सौरक्षितिजौ धनस्थौ
व्ययाश्रितौ भार्गवदेवपूज्यौ ।
भवेद्विनीतोऽत्र पुमान् विदग्धः
प्रभूतसौख्यः प्रविभक्तगात्रः ॥ १५५॥

जीवेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनस्थितौ शुक्रदिनेशपुत्रौ ।
भवेत् पुमान् नीतिपरः सुकामी
पुताधिकारः परपक्षमारः ॥ १५६॥

जीवेन्दुपुत्रौ धनगौ हिमांशो-
र्व्ययस्थितो शुक्रदिनेशपुत्रौ ।
जनानुरक्तः सुरदेवभक्तो
भवेन्नरः शास्त्रविशार्दश्च ॥ १५७॥

शुक्रेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनाश्रितौ मन्दसुरेन्दुपूज्यौ ।
जातोऽत्र भोगी सुनयप्रधानो
भवेन्मनुष्यः ..........मप्रभावः ॥ १५८॥

शुक्रेन्दुपुत्रा धनगौ हिमांशो-
र्व्ययस्थितौ सौरसुरेन्दुज्यौ ।
भवेद्विधिज्ञः सततं नयज्ञः
प्रजानुरक्तः पुरुषः प्रगल्भः ॥ १५९॥

.......... ॥ १६०॥

.......... ॥ १६१॥

एवं विवेकल्पः
सौम्यावनेयौ व्ययगौ सुधांशो-
र्धनस्थिता शुक्रसुरेज्यसौराः ।
भवेन्नरः शिल्पकलासु दक्षो
भूपालला‍भैः सततं सुपूज्यः ॥ १६२॥

व्ययस्थिताः शुक्रौरेज्यसौरा
धनाश्रितौ भौमबुधौ हिमांशोः ।
भवेत् प्रभूताश्वगजाधिनथो
नरो विवेकी जितशत्रुपक्षः ॥ १६३॥

जीवावनेयौ व्ययगौ हिमांशओ-

र्धनस्थिताः शुक्रबुधार्कपुत्राः ।
भवेन्मनुष्यो द्विजदेवभक्तः
प्रसन्नचेताः प्रणतो नयज्ञः ॥ १६४॥

शुक्रज्ञसौरा व्ययगा हिमांशो-
र्धनस्थितौ भौमसुरेन्द्रपूज्यौ ।
.......... ॥ १६५॥

व्ययस्थितौ उक्रधरित्रिपुत्रौ
धनस्थिता मन्दबुधामरेज्यैः ।
नरोऽत्र जातः प्रभवेत् सुविज्ञः
सतामभीष्टः प्रियदर्शनश्च ॥ १६६॥

व्ययस्थिता ..........
.......... रित्रिपुत्रौ ।
त्रज्ञाधिकः पुण्यजनः सदैव
भवेन्मनुष्यः शुभकर्मरक्तः ॥ १६७॥

वक्रार्कपुत्रौ व्ययगौ हिमांशो-
र्धनस्थिता शुक्रबुधामरेज्याः ।
भवेन्मनुष्यो नृपमानपुष्टः
शौर्यान्वितः श्वसविवर्जिताङ्गः ॥ १६८॥

वक्रार्कपुत्रौ धनगौ हिमांशो
र्व्ययस्थिताः शुक्रबुधामरेज्याः ।
भवेन्मनुष्यः कृषिकर्मभोगी
गुणाधिकः कल्पतरुस्वरूपः ॥ १६९॥

त्रीवेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनस्थिता मन्दसितावनेयाः ।
भवेन्मनुष्यः प्रचुरान्नपानः
स्मिताभिभाषी दृढसौहृदश्च ॥ १७०॥

व्ययस्थिता मन्दिसतावनेया
धनस्थितौ जीवशशाङ्कपुत्रौ ।
नरोऽत्र जातः सुतरां विवेकी
महानुरागी गुणसंयुतश्च ॥ १७१॥

सितेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनस्थिता मन्दकुजामरेज्याः ।
भवेधनाप्तियुतः सदैव
नरोऽत्र जातो वनितानुरागः ॥ १७२॥

व्ययस्थिता मन्दकुजामरेज्या
धनस्थितौ शुक्रशशाङ्कपुत्रौ ।
भवेन्नरः स्त्रीदयितः शुभ्ज्ञः
कृतज्ञताविष्कृतमानसश्च ॥ १७३॥

सौम्यार्कपुत्रौ व्ययगौ हिमांशो-
र्धनस्थिता भौमसितामरेज्याः ।
शुचिः प्रगल्भोऽत्र भवेन्मनुष्यः
शुभाकृतिस्तीर्थरतः सुसौम्यः ॥ १७४॥

व्ययस्थिता भौमसितामरेज्या
हनस्थितौ मन्दशशाङ्कपुत्रौ ।
नरो भवेत् सद्विभवैः समृदः
प्रियातिर्थिब्राह्मणसंमतश्च ॥ १७५॥

शुक्रामरेज्यौ व्ययगौ हिमांशो-
र्धनस्थिता मन्दबुधावनेयाः ।
भवेन्मनुष्यः प्रथिताभिमानः
सतामभीष्टः कृतकोपचारः ॥ १७६॥

व्ययस्थिता मन्दबुधावनेया
धनाश्रितौ जीवैतौ हिमांशोः ।
भवेन्नरः कीर्तिसुखैः स..........
प्रभूतमित्रो द्रविणस्वभावः ॥ १७७॥

सौरामरेज्यौ व्ययगौ हिमांशो-
र्धनस्थिता भार्गवभौमसौम्यः ।
नरोऽत्र जातः सुतरां कृतज्ञो
भवेद्बहुद्रव्यसमृद्धिभागी ॥ १७८॥

सौरामरेज्यौ धनगौ हिमांशो-

व्र्ययस्थिता भार्गवभौमसौम्याः ।
भवेश्च जातो नृपतेरभीष्टः
शुभप्रियः स्यात् सुमतिः कृतज्ञः ॥ १७९॥

शुक्रार्कपुत्रौ व्ययगु हिमांशो-
र्धनस्थिता जीवबुधावनेयाः ।
भवेत् सुधामा पुरुषोऽत्र जातः
..........मूर्तिः प्रियसाधुमानी ॥ १८०॥

शुक्रार्कपुत्रौ धनगौ हिमांशो
र्व्ययस्थिता जीवबुधान्नेयाः ।
नरोऽत्र जातः प्रभवेत् सुचित्तः
सुदारपुत्रार्थचतुष्पदाढ्यः ॥ १८१॥

इति श्रीवृद्धयवने दुर्धरायोगाध्यायः ॥

Enchoded and proofread by Radu Canahai clradu at yahoo.com

---

*mInarAja shrIvRiddhayavanajAtaka pUrvakhaNDa*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*